THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 376

न्यायलीलावती

श्रीवल्लभाचार्यविरचिता

श्रीभगीरथठक्कुरकृतविवृतिसनाथेन श्रीवर्धमानोपाध्यायकृत-
प्रकाशेन समुल्लासिता

श्रीशङ्करमिश्ररचितकण्ठाभरणेन च समन्विता ।

काशीहिन्दुविश्वविद्यालयाध्यापकेन

पण्डितश्रीहरिहरशास्त्रिणा

टिप्पण्यादिभिः सम्पादिता ।

NYĀYA LĪLĀVATĪ

BY

VALLABHĀCHĀRYYA

With the commentaries of Vardhamānopādhyāya,
S'aṅkara Miśra and Bhagīratha Ṭhakkura.

Edited by Pt. Harihara S'āstrī,
[illegible]r, Benares Hindu University.

FASCICULUS II-२.

[PUBL]ISHED & SOLD BY THE SECRETARY,
[CHOWK]HAMBA SANSKRIT SERIES OFFICE,
[Vidya Vilas P]ress, North of Gopal Mandir, Benares.

1927

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥
स्तबकः—३७६

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

द्रव्यकर्मवृत्तिः रूपवृत्तिसत्तान्यजातित्वात् रूपत्ववदिति बाधकात्।

न्यवत्त्वात् कर्म्मवत् । उपदेशश्चे यत्र सामान्यवत्त्वे सति संयोगवि-
भागात्मककार्यद्वयाभावस्तद् गुणत्वव्यञ्जकमित्यसाधारणव्यञ्जक-
विषयोऽतो नान्योन्याश्रयः । यत्र विशुद्धसन्ततिजन्यत्वं तत्र

न्यायलीलावतीकण्ठाभरणम्

वान्तरत्वं सत्ताव्याप्यत्वम् । तथा च रूपं रूपत्वतद्व्याप्येतरसत्ताव्या-
प्यजातिमत् जातिमत्त्वात् द्रव्यवत् कर्म्मवद्वेति साधनार्थः । ननु
तथापि कथमनुगतधीरुपदेशं विनेत्यत आह—उपदेशश्चेति । सामा-
न्यवत्त्वं जातिमत्त्वम् । संयोगविभागात्मककार्य्यद्वयाभाव इति । उभयाजनक-
त्वमित्यर्थः । सामान्यवान् संयोगविभागोभयसमवायिकारणत्वासम-
वायिकारणत्वशून्यो गुण इत्युपदेशः पर्य्यवस्यति । एवं च न कर्म्म-
साधारण्यं न वा गुणो गुण इत्युपदेशे योऽन्योन्याश्रयः स इहे-
त्यर्थः । यद्वा संयोगविभागोभयकारणताविरोधिनी सामान्यसमा
नाधिकरणकारणता गुणत्वव्यञ्जिका । न चादृष्टेश्वरज्ञानादौ तदुभय
निमित्तकारणे गुणत्वं न स्यादिति वाच्यम्, निमित्तकारणतान्यतदुभ-
यकारणत्वस्य विवक्षितत्वात् । तदुभयसमवायिकारणत्वं तदुभयास-
मवायिकारणत्वं निमित्तकारणतातिरिक्ततदुभयकारणत्वभिन्नसामा-
न्यसमानाधिकरणकारणत्वं च जातिव्यञ्जकम् । तथा च द्रव्यत्वं क-
र्म्मत्वं गुणत्वं च जातित्रयं सिद्ध्यति । न च तदुभयसमवायिकारण-
त्वभिन्नकारणतावच्छेदकतया गुणकर्म्मसाधारणी तदुभयासमवायि-
कारणताभिन्नकारणतावच्छेदकतया च द्रव्यगुणकर्म्मसाधारणी च
एका जातिः सिद्ध्येदिति वाच्यम्, अननुभवात् । अनुभवानुसारेणैव
व्यवस्थापकानुसरणात् । अन्यथा यावति रूपकारणता तावत्येका
यावति स्पर्शकारणता तावत्यपरा जातिः स्यादेवं गुरुत्वपरत्वापरत्वा-
दिसमवायिकारणतावच्छेदिका च जातिः स्यादिति । उपदेशव्यङ्ग्यत्वे
जातेर्दृष्टान्तमाह—यत्रेति । नन्वेवं द्रव्यगुणकर्म्मसाधारणमर्थत्वमपि

न्यायलीलावतीप्रकाशः

द्रव्यकर्म्मवृत्तिः रूपवृत्तिसत्तान्यजातित्वात् रूपत्ववदिति बाधकात् ।

ब्राह्मण्यमितिवत् अर्थत्वमपि स्यादिति चेन्न, तस्य सत्तासम्ब-

न्यायलीलावतीकण्ठाभरणम्

जातिः स्यादित्यत आह—अर्थत्वमिति । अन्यथा त्रयाणामर्थशब्दवा-च्यत्वे किं प्रवृत्तिनिमित्तं स्यादिति भावः । सत्तावत्त्वमेवोपाधिरर्थ-त्वमिति परिहरति—नेति। प्रवृत्तिनिमित्तमप्ययमेवोपाधिरिति भावः।

न्यायलीलावतीप्रकाशः

ननु चाप्रयोजकं सामान्यवत्त्वं द्रव्यमात्रे द्रव्यगुणयोर्वा द्रव्यत्वतद्व्या-प्यान्यसत्ताव्याप्यजात्यनुमितेरपि तत एवापत्तेः। न च द्रव्यत्व-कर्मत्वान्य(१)सत्तासाक्षाद्व्याप्यजातिमत्त्वमुपाधिः साध्यव्यापकताग्रा-हकमानाभावात्। भावे वा गुणत्वसाधकेऽपि रूपाद्यवृत्तिजातिमत्त्व-मुपाधिः स्यात्। न चास्योपाधेर्द्रव्यकर्ममात्रवृत्तित्वात् द्रव्यत्वकर्म-त्वदृष्टान्तेन साध्याव्यापकत्वमनुमेयम्, अप्रयोजकत्वात्। न च सा-मान्यवत्त्वाविशेषेऽपि संयोगविभागलक्षणविरुद्धाविरुद्धकार्यकारित्वा-द्गुणकर्मणोर्वैजात्यं साध्यम्। रूपादीनां ह्येकजातीयकार्यकारित्वेनैकजा-तीयत्वं साध्यते कर्मविलक्षणकार्यकारितया तद्वैजात्यं वा। आद्ये व्यभिचारः। द्रव्यकर्मणोस्तथात्वेऽपि वैजात्यात् सत्तया सिद्धसा-धनं च। अन्त्ये रूपादीनामेकजातीयत्वासिद्धेरर्थान्तरम्। सामान्ये

न्यायलीलावतीप्रकाशविवृतिः

अन्यूनातिरिक्तव्यक्तिकजात्यनङ्गीकारादत आह—द्रव्यगुणयोर्वेति । न च द्रव्यत्वगुणत्वान्येति । क्वचिद्गुणत्वस्थाने कर्मत्वेति पाठः । स च द्रव्यकर्मणोरिति पूर्वफक्किकापाठपक्षे सत्तामादाय साधन-व्यापकत्वमिति सत्ताव्याप्येति । पृथिवीत्वादिकमादाय तथात्वमि-ति साक्षादिति । गुणवत्त्वमुपाधिमादाय तथात्वमिति जातीति । द्रव्यत्वादिकमादाय तथात्वमिति अन्यत्वपर्यन्तम् । न चास्येति । अ-व्यवहितोपाधेरित्यर्थः । द्रव्यकर्ममात्रवृत्तित्वं द्रव्यकर्मेतरावृत्तित्व-मात्रमन्यथा दृष्टान्ते साधनवैकल्यापत्तेरिति ध्येयम् ।

विरुद्धेति । यथायोग्यमत्रान्वयः । एकजातीयेति । अविरुद्धत्वेनैवैकजा-तीयत्व(२)मिति भावः । व्यभिचार इति । विरुद्धत्वेनैवैकजातीयत्वादिति

(१) द्रव्यत्वगुणत्वान्य । (२) 'यत्वादि' ।

न्धित्वपर्यायत्वात्। अन्यथा बुद्धित्वज्ञानत्वादिनानासामान्यापत्तेः। न चात्र व्यतिरेकशङ्का निरुपाधित्वादिति न न्यूनम्। षडेव पदार्था इत्युद्देशः।

न्यायलीलावतीकण्ठाभरणम्

ननु अर्थत्वं जातिरेव किं न स्यादित्यत आह—अन्यथेति। सत्तया सह अन्यूनानतिरिक्तव्यक्तिकत्वमेवास्य जातित्वे बाधकमित्यर्थः। तर्हि सत्तैव जातिः कथं स्यादिति नाशङ्कनीयम्, अनुगतमतिबलेन तज्जातित्वस्य सर्व्वसिद्धत्वात् त्रयाणामर्थपदाभिधेयत्वस्य वैशेषिकपरिभाषामात्रसिद्धत्वात्। ननु रूपादयो रूपत्वादिव्यतिरिक्तावान्तरजातिमन्त इत्यत्र विपक्षे बाधकं नास्तीत्यत आह—न चात्रेति। व्यभिचारशङ्काप्युपाधिशङ्कया स्यात्। सा च योग्यायोग्योपाधिनिरासेन निरस्तेत्यर्थः। नवानां द्रव्यत्वेनैकत्वे चतुर्विंशतेश्च गुणत्वेन एकत्वे पञ्चानां कर्म्मत्वेन एकत्वे साधिते निरस्तमाधिक्यमिति न न्यूनं षडेव पदार्था इत्याह—इतीति।

न्यायलीलावतीप्रकाशः

व्यभिचारश्च, अदृष्टेश्वरज्ञानादौ विरुद्धकार्यकारितया गुणत्वाभावापत्तेः।

अत्राहुः। संयोगविभागोभयासमवायिकारणत्वसमवायिका-

न्यायलीलावतीप्रकाशविवृतिः

भावः। नन्वेवमप्यविरुद्धकार्यमात्रकारणत्वेनैकजातीयत्वसाधनमविरुद्धमेवेत्यरुचेराह—सत्तयेति। अर्थान्तरमिति। रूपत्वादिकमादायैव पर्यवसानादिति भावः। अत्राहुरिति। मूलानुमाने विपक्षबाधकमिति शेषः। संयोगविभागेत्यसमवायिकारणत्वमात्रान्वयि। एवं च समवायिकारणत्वोभयासमवायिकारणत्वशून्य इत्यर्थः। अनेन च कर्मणो द्रव्यस्य च का(वा?) रणं तत्रापि संयोगजसंयोगविभागजविभागकारणयोः संयोगविभागयोरेवाव्याप्तिवारणाय उभयोपादानम्। ईश्वरज्ञानसंग्रहायासमवायीति। सामान्यादावतिव्याप्तिवारणाय जातिमतीति। न चा(च?)प(पा?)रिमाण्डि(ण्ड ?) ल्यासंग्रहस्तत्र कारणत्वाभावादिति वाच्यम्, महत्त्वजात्यभावसाक्षात्कारे प्रत्यासत्तिघटकतया तस्यापि

न्यायलीलावतीप्रकाशः

रणत्वशून्ये जातिमति यत्कारणत्वं तदसति बाधके जातिरूपधर्मावच्छेद्यमिति गुणत्वं सामान्यमवश्यमङ्गीकार्यं रूपत्वादीनां मिथोऽव्यभिचारात्। सत्तायाश्चातिप्रसञ्जकत्वात्। एवं च रूपान्तरेण कारणतया द्रव्यकर्मसाधारणी यदि जातिः सिद्ध्यति सिद्ध्यतु। संयोगविभागौ प्रति समवायिकारणतया नवसु द्रव्यत्वम्। तदुभयं प्रत्यसमवायिकारणत्वेन पञ्चसु कर्मत्वं तेनैव द्रव्यकर्मविभागः सङ्गतः। यद्वा निमित्तकारणतातिरिक्तेन रूपेण या संयोगविभागोभयकारणता तद्विरोधिनी या सामान्यसमानाधिकरणा कारणता सा गुणत्वव्यवस्थापिका। द्रव्ये च न तादृशकारणताविरोधिनी कारणता, क्वचिद्

न्यायलीलावतीप्रकाशविवृतिः

कारणत्वात्। रूपान्तरेणेति। निमित्तकारणतातिरिक्तेन संयोगविभागोभयकारणत्वेन संयोगविभागोभयासमवायिकारणत्वशून्यवृत्तिकारणताभिन्नजातिसमानाधिकरणत्वेन वेत्यर्थः। जातिसमानाधिकरणसमवायिकारणताभिन्नकारणत्वावच्छेदकत्वेन गुणकर्म्मणोरप्येकजातिसिद्धौ सङ्करभयादयं प्रसङ्ग एव नेत्याशयेनाह—यदीति। तया जात्या विभागे नवत्वव्याघात इत्यत आह—संयोगविभागाविति। अभावद्वयगर्भतयाऽपरितुष्यन् कल्पान्तरमाह—यद्वेति। अत्रेश्वरज्ञानादिसंग्रहाय निमित्तकारणतातिरिक्तेनेति विशेषणम्। संयोगविभागसङ्ग्रहायोभयेति। उभयकारणता च स्वरूपयोग्यता, तेन न विनश्यद्वस्थकर्मण्यतिव्याप्तिः। जात्यादिवारणाय सामान्यसमानाधिकरणेति। ननु क्वचित्संयोगे विभागे च निमित्तत्वाद् द्रव्यस्यातिव्याप्तिरत आह—क्वचिदिति। क्वचिदेव संयोगे निमित्तत्वं न तु सर्वत्र(१) समवेते संयोगे विभागे च समवायित्वान्न तद्विरोधिनी कारणता द्रव्यस्येति भावः। यद्वा क्वचिन्निमित्तकारणत्वेन हेतुना तादृशकारणताविरोधिनी कारणतेति न। कुतः? समावेशात्। समवायिकारणत्वेन सममिति योजना। ननु कल्पद्वयमप्ययुक्तं कार्याविशेषितायाः कारणताया जात्यव्यवस्थापकत्वात्। चतुर्विंशतिगुणसाधारणस्य च कार्यस्याभावादिति।

अत्र मिश्राः। कार्यविशेषोऽपि कारणतायामनुगमार्थमाद्रियते

(१) स्वसमवेतसंयोगविभागे च सम०।

न्यायलीलावतीप्रकाशः

द्रव्यस्य तन्निमित्तकारणत्वेन समावेशात् । सामान्यस्य तादृशी कारणतापि न सामान्यसमानाधिकरणा । न चैवं समवायिकारणता-

न्यायलीलावतीप्रकाशविवृतिः

प्रकृते चोक्तरूपमेव कारणतायामनुगमकमिति किं कार्यविशेषादरेण । अत एव समवायिकारणतावच्छेदकतयैव द्रव्यत्वसिद्धिरुपेयते । न चैवं प्रकारान्तरेणानन्तजात्यापत्तिः । द्रव्यकर्मोभयवृत्तिजातौ बाधकस्य वक्ष्यमाणत्वात्सामान्यादौ तस्यैव(१) बाधकत्वात् । विना च बाधकमिष्टापत्तेरिति वदन्ति । तच्चिन्त्यम् । एवं सति रसरूपादिसमानाधिकरणतानुरोधेनापि जात्यापत्तेः,स्पर्शसमानाधिकरणकारणतानुरोधेनापि चतुःसाधारणजातिसिद्धौ पूर्वग्रन्थविरोधाच्च । आपादितजातीनां व्याप्यव्यापकभावेन सङ्करशङ्काया अभावात् । न चैवं गन्धासमानाधिकरणद्रव्यत्वसमानाधिकरणकारणतानुरोधेनापि जातिसिद्धौ सङ्करान्नवा जातय इति वाच्यम्, असमवायिकारणत्वेन कतिपयगुणकर्मसाधारणजातिसिद्धौ सङ्क(र?)स्य गुणत्वेऽपि तुल्यत्वादिति ।

केचित्तु द्रव्यत्वाभिव्यक्तिरेवानुगतं कार्यमिति तदप्ययुक्तम् । तादृशकार्यकारणतापि निर्विशेषितैव वा(२)जातिनिय(या ?) म-(मि?) का, विशेषणान्तरविशिष्टा वा । आद्ये कर्मसाधारण्यापत्तिः, अन्त्ये वातिप्रसङ्ग एव, रूपत्वासमानाधिकरणोक्तरूपकारणतानुरोधेन तद्भिन्नगुणेष्वेक(३)जात्यापत्तेः । तस्माद् गुणपदशक्यतावच्छेदकत्वेन तत्सिद्धिरसति बाधके पदवाच्यतायामनुगतजातिनिमित्तत्वादिति तात्पर्यम्(४) । वस्तुतः प्रत्यक्षमेव गुणत्वे मानमित्यग्र 'उपदेशश्चे'त्यादिमूल एव व्यक्तमिति ।

सामान्यस्येति । **सामान्यादेरित्यर्थः** । समवायिकारणतातिरिक्तेति । **सम-**

---

(१) तस्यैव । (२) द्वितीयादशपुस्तके वाकारो नास्ति । (३) 'णेष्वेव जा'।

(४) शक्यतावच्छेदकत्वेन जातिंसिद्धौ विभुपदशक्यतावच्छेदकतया विभुचतुष्टयमात्रवृत्तिजातिसिद्धिप्रसङ्गः स्यादिति दीधितिकृद्भिस्तथा जातिसिद्धिर्नाभ्युपेयते, तेषां मते शक्यतावच्छेदकाननुगमो न दोषायेति । परन्तु रघुदेवभट्टाचार्य्येण शिरोमणिकृत–"पदार्थतत्त्वनिरूपणे" गुणत्वजातिखण्डनपरग्रन्थव्याख्यानावसरे 'इदमत्र बोध्यम् । असति बाधके गुणपदशक्यतावच्छेदकत्वेन गुणत्वजातेः सिद्धौ बाधकाभावः ।......इदं 'पूर्णाय परमात्मने' इत्यत्रेश्वरे आत्मपदव्यपदेशं कुर्वतो दीधितिकृतोऽपि सम्मतम् । अन्यथा आत्मपदशक्यतावच्छेदकत्वं विना ईश्वरसाधारणात्मत्वजातायुक्त्यन्तराभावेन तथा व्यपदेशाऽसङ्गतः स्यादिति" । इति स्वहस्तितम् ।

न्यायलीलावतीप्रकाशः

तिरिक्तकारणत्वेन गुणकर्मणोरेका जातिः सिद्ध्येत् तस्य जात्यव्यवस्थापकत्वात्। अन्यथा निमित्तकारणतातिरिक्तकारणत्वेन संयोगमन्तर्भाव्य जातिसिद्धौ जातिसङ्करापत्तिः। गुणत्वे प्रत्यक्षं मानमाह—उपदेशश्चेति। संयोगेति। विभागपूर्वकसंयोगासाधारणकारणत्वाभावो गुणत्वव्यञ्जक इत्यर्थः। तेन संयोगस्येश्वरज्ञानस्यादृष्टस्य चोभयजनकत्वेपि न तत्र गुणत्वाभावः। नान्योन्येति। गुणत्वेनानुगतधर्मेणोपदेशसिद्धिः, ततश्च गुणत्वसिद्धिरित्यन्योन्याश्रयो नैवमित्यर्थः। अर्थत्वमपीति। जातिरिति शेषः। सत्तेति। सत्तया सहान्यूनानतिरिक्तवृत्तित्वान्नार्थत्वं जातिरित्यर्थः। अत्रेति। द्रव्यत्वगुणत्वसाधकमान इत्यर्थः। निरुपाधित्वादिति। निरुपाधावश्यमव्यभिचारस्थितेरित्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

वायिकारणताविरोधीत्यर्थोऽन्यथा द्रव्यसाधारण्यापत्तेः। अत्र सामान्यवत्त्वे सतीति विशेषणम्। अन्यथेति। यद्यपीयं जातिः पदार्थत्रय(१) एव स्यादिति गुणकर्मवृत्तिजातिव्यापकत्वादेव न संकीर्णता (२) तथापि ज्ञानाद्यवृत्तित्वेन तद्व्यापकतया पूर्वजातिसङ्कीर्णेति द्रष्टव्यम्। संयोगमिति। संयोगादिकमित्यर्थः। 'जातिसिद्धौ' द्रव्यत्वजातिसिद्धौ। यद्यपि कर्मवृत्तित्वेनैव सङ्करसम्भवे संयोगमन्तर्भाव्येति व्यर्थम्, तथापि संयोगमादायापि सङ्करः सम्भवत्येवेत्येतदुक्तम्। केचित्तु संयोगमन्तर्भाव्य संयोगं समानाधिकरणीकृत्येत्यर्थस्तथा चैतत्पदमहिम्नैव द्रव्यवृत्तित्वसिद्धिरित्याहुः। तन्न। एवं सति कर्मवृत्तित्वादेः साङ्कर्यप्रयोजकस्यानुपन्यासात् (३)। यद्यप्येवं कार्याविशेषितकारणताया (४) जात्यव्यवस्थापकत्वे गुणत्वव्यवस्थापनमप्यशक्यं तथापि सति विपक्षबाधके कारणताया जातिव्यवस्थापकत्वं विपक्षबाधकं च क्वचिदन्यत् प्रकृते चानुगतगुणव्यवहार एव विपक्षे बाधकम्। न चानुशङ्कितजातावेतादृशं चानुगतकार्यं वा विपक्षबाधकमस्तीति हृदयम्।

यथाश्रुतस्येश्वरज्ञानादावव्याप्तेराह—विभागेति। अत्रासाधारणपदेनादृष्टवदात्मसंयोगस्येश्वरज्ञानादेश्च साधारणस्य(५) संग्रहः।

---

(१) र्थत्रयेऽपि स्या। (२) कीर्णा त.। (३) स्यानुपदं न्यासात्।
(४) कार्येण विशेषितकारणतायाः। (५) साधारणकारणस्य।

पृथिवी तावत्पृथिवीत्वजातियोगान्न भिद्यते, तत्र मानाभावात् । पृथिवीत्यनुगतव्यवहारादिति चेन्न, घृतादौ तदभावात् । तत्रापि निपुणेनोपलभ्यते इति चेत्, न, जलादावपि तुल्यत्वात् । सन्देहेऽपि भागासिद्धत्वात् । गन्धवत्त्वात् तदनुमानमिति चेन्न, तस्य वाय्वादिसाधारण्यात् । वाय्वादावौपाधिकी गन्धप्रतीतिरिति चेन्न, चम्पककर्पूर(१)भागानामनागमनात् । आगमने(२)

न्यायलीलावतीकण्ठाभरणम्

ननु एतावता पदार्थविभागः समाहितो नवैव द्रव्यानीति तु न युक्तमिति शङ्कते—पृथिवी तावदिति । जलादित्रयोदशभेदः पृथिव्याः पृथिवीत्वजात्या न सम्भवति पृथिवीत्वजातौ मानाभावादित्यर्थः । घृतादाविति । न हि लौकिकानामत्र पृथिव्याकारोऽनुगत प्रत्यय इत्यर्थः । ननु परीक्षकानां तावदस्तीत्यत आह—तत्रापीति । कस्याचित् सिद्धान्तिनो निपुणस्य करकारूपजलादावपि पृथिवीव्यवहार इत्याह—जलादाविति । यद्वा सुगन्धि जलमिति प्रतीत्या जलेऽपि पृथिवीत्वव्यवहार इत्यर्थः । यद्वाऽतद्गुणसंविज्ञानबहुव्रीहिणा सुवर्णाद्युक्तं तदनुमानमिति घृतादौ पृथिवीत्वानुमानमित्यर्थः । सुरभिः समीरण इतिप्रतीतिबलमाश्रित्याह—तस्येति । गन्धवत्त्वं गन्धसमवायित्वमभिमतं वायौ च गन्धस्य संयुक्तसमवाय इत्याह—औपाधिकीति । कर्पूरादिरुपाधिर्वाच्यः, स च न वायुसंयुक्तो दृश्यते येन तथा स्यादित्याह—कर्पूरेति । ननु सूक्ष्मा एव कर्पूरादिभागा वायुसहचारिण इति न दृश्यन्ते

न्यायलीलावतीप्रकाशः

नवत्वं द्रव्याणां मिथोभेदकसिद्धाविति भेदकमाक्षिपति—पृथिवीति । घृतादाविति । तथा च भागासिद्धिरिति भावः । निपुणेनापि घृतादौ पृथिवीत्वानुभवोऽसिद्ध एव । तादृशोऽपि यदि गमकस्तदा जलादावपि तत्सिद्ध्येदित्याह—जलादाविति । सन्देहेऽपीति । घृतादौ पृथिवीत्वे सन्देहेऽपि भागासिद्धिसन्देहादिति भावः । औपाधिकीति । चम्पकाद्युपाधेरन्वयव्यतिरेकानुविधानादिति भावः । चम्पकेति । इन्द्रियाणां

(१) कर्पूरचम्पकेति कण्ठाभरणसम्मतः पाठः । (२) आगमने वेत्यपि पाठः ।

न्यायलीलावतीकण्ठाभरणम्

इत्यत आह--आगमने वेति । उपलभ्यमानगन्धाश्रया भागा यदि दूरोपलभ्यमानचम्पकयुतसिद्धाः स्युश्चम्पकावयवा न स्युरित्यर्थः। चम्पकविभागहेतुक्रियावन्तो यदि स्युश्चम्पकावयवा न स्युरिति

न्यायलीलावतीप्रकाशः

प्राप्यकारितया अनागतचम्पकभागानां गन्धाग्रहणादिति भावः। आगमने वेति । विवादाध्यासिताश्चम्पकावयवा यदि चैत्रघ्राण-संयुक्तत्वेऽसति (१) चैत्रघ्राणग्राह्यगन्धाधिकरणानि भवेयुः,चम्पकाव-

न्यायलीलावतीप्रकाशविवृतिः

संयोगसङ्ग्रहाय विभागपूर्वकेति । न च विभागविशिष्टेत्येव सम्यगिति वाच्यम्, हिमवद्विन्ध्ययोर्न विभाग इति संयोग-स्यापि विभागकारणतया संयोगाऽव्याप्तेः । संयोगश्च संयोगं जनयित्वा विभागं जनयतीति तत्सङ्ग्रहः। असाधारणत्वं च (१) संयोग-मात्रवृत्तिधर्म्मावच्छिन्नकार्यताप्रतियोगिककारणताश्रयत्वम्, न तु तत्मात्रकारणत्वम् । व्यावर्त्यद्रव्यकर्मणोरतथात्वेन प्रतियोग्यप्र-सिद्धेः। जातिसामानाधिकरण्यं च मूलोक्तमेव विशेषणमतो न जात्यादावतिव्याप्तिशङ्का। यद्यप्येवं स्पर्शवत्त्वादिव्यङ्ग्यमपि सामान्यं स्यादेव तथापि रूपादौ गुणत्वानुभववत् न पृथिव्यादौ तादृशजा-त्यनुभव इति हृदयम्।

अवयवानामागमनं दलच्छिद्रतापादकमिति व्यधिकरणम-तोऽन्यथा तर्कमाह—विवादाध्यासिता इति । चैत्रघ्राणग्राह्यगन्धाधि-करणानीत्यर्थः । आपाद्ये चम्पकपदं तद्देशवृत्तिचम्पकपरम्, अतो नाघ्रायमानचम्पकान्तरावयवे तस्मिन्नेव वा चम्पके आनीया-घ्राते सति तदवयवे व्यभिचारः । सत्यन्ते च चैत्रपदमेतद्देशव-र्त्तिपरम्। तेन चैत्रेण गत्वाघ्राते तद्देशवर्त्तिचम्पकावयवे न व्यभि चारः। न चैवमपि तस्माच्चम्पकादाकृष्य(२)घ्राते तदवयवे व्यभि-चार इति वाच्यम्, वैयधिकरण्यमात्रपरिहाराय विवक्षेति। सच्छि-द्रत्वापादानस्यैवाभिप्रेतत्वेनापाद्ये चम्पकपदस्याच्छिद्रचम्पकपर-त्वात्। अच्छिद्रत्वं च योग्यावयवविगमस्तथा तत आकृष्यानीतेऽ वयवे तस्य सच्छिद्रत्वादच्छिद्रावयवाभावोऽस्त्यवेति न व्यभिचारः।

(१) चैत्रघ्राणासंयुक्तत्वे सतीति विवृतिसम्मतः पाठः।

(२) असाधारणकारणत्वं च।

(३) ०कृष्यानीयाघ्राते।

चम्पकदलानां सच्छिद्रत्व(१)प्रसङ्गात्(२)। कर्पूरे च भवनोदरमधिवासयति माषकादित्रुटिप्रसङ्गात्। न चापरपरमाणुप्रवेशात्तुल्यायव्ययत्वमिति(३) वाच्यम्, एकमाषस्या(४)क्षयताप्रसङ्गात्। नापि पाकजः स्पर्शः, पाकजत्वासिद्धेः। पार्थिवविशेषगुणत्वात्तत्सि-

---

न्यायलीलावतीकण्ठाभरणम्

वा प्रसङ्गः। कर्पूरे [चे?]ति। माषकमिति। कर्पूरं यदि वाय्वाकृष्टकतिपयभागं स्यात् न्यूनं स्यादित्यर्थः। अपरापरपरमाणुप्रवेशान्न त्रुटिरित्याशङ्क्याह--न चेति। एकेति। माषकमितं कर्पूरं यदि भागान्तरपूरितं स्यात् पूर्वाधिकगुरुत्वाधिकरणं स्यादित्यर्थः। नापीति। पृथिव्या इतरभेदक इति शेषः। अत्र स्वरूपासिद्धिमाह—पाकजत्वेति। पृथिवीस्पर्शः पाकजः तद्विशेषगुणत्वादितिसिद्धेर्न स्वरूपासिद्धिरित्याह--पार्थिवेति।

न्यायलीलावतीप्रकाशः

यवा न स्युरित्यर्थः(५)। कर्पूरे चेति। प्रचुरतरभागाविगमश्च तावद्गुरुत्वाधिकरणं चेति व्याहतमित्यर्थः। नापीति। भेदक इति शेषः। पाकानन्तरं घटादिरूपादौ वैजात्यानुभववत् संख्यादौ तदननुभवादपाकजत्वप्रती-

न्यायलीलावतीप्रकाशविवृतिः

अत्र च सत्यन्तं गत्वाघ्राते तदवयवे व्यभिचारवारणाय। न चाग्रिमदलस्थचैत्रविशेषणमेवैतद्देशवर्त्तित्वमस्त्विति वाच्यम्, तस्य प्रयोगान्तरत्वेन यथोक्तदोषाभावात्। यदि चाग्रिमचैत्रविशेषणमेव तत् पदं तदा व्याप्तिग्रहौपयिकत्वेन सत्यन्तसार्थकता। अप्राप्तस्यैव गन्धस्य ग्रहे तत्सच्छिद्रत्वाभावेन व्याप्त्यसिद्धिशङ्कायाश्चैत्रघ्राणसंयोगित्वप्रयुक्तग्रहणविषयगन्धाधिकरणत्वविशिष्टे आपादकेऽप्रसङ्गात्। न च सत्यन्तमात्रमेव सम्यगिति वाच्यम्, परमाणुमात्रस्य चम्पकात्प्रच्युतौ नानिष्टमिति योग्यावयवविगमपर्यन्तस्यापाद्यतया चम्प-

---

(१) सच्छिद्रत्वं च पूर्वापेक्षया न्यूनावयवत्वम्।

(२) सच्छिद्रताप्रसङ्गादिति पाठान्तरम्। (३) ०ति न्याय्यम्० (४) ०स्याव्यय०।

(५) चैत्रघ्राणसंयुक्तचम्पकभागवारणायासत्यन्तम्। तत्रैव चम्पक इति पूरणीयम्। तथा च यदि तत्र चम्पके चैत्रघ्राणसंयोगाभावदशायां चैत्रघ्राणग्राह्यगन्धाधिकरणानि स्युः, तदा तच्चम्पकावयवा न स्युः, तच्चम्पकस्यासत्त्वकाले च न संयोगाभाववत्त्वम्। इति दीधितिः।

द्धिरिति चेन्न, व्यावर्त्यजलरूपसंख्यादीनामपाकजत्वाप्रतीतौ विशेषणवैयर्थ्यात्। अवैलक्षण्यात्तत्प्रतीतौ तु अत्रापि तद्विपर्ययावसायात्

न्यायलीलावतीकण्ठाभरणम्

पार्थिवपदव्यवच्छेद्यं जलरूपादि विशेषपदव्यवच्छेद्यं च संख्यादि तदा स्याद्यदि तेषां विपक्षवृत्तित्वानिश्चयः स्यादिति। न चैवमित्याह–व्यावर्त्येति। अवैलक्षण्यादिति। जलरूपादयः संख्यादयश्चाग्निसंयोगात् पूर्वं यथाऽनुभूतास्ततो विलक्षणास्तदनन्तरं नानुभूयन्त इति तेषामवैलक्षण्यादपाकजत्वमिति यदि तदा पृथिवीस्पर्शोऽपि पाकानन्तरं विलक्षणो नानुभूयत इति स कथं पाकजः स्यादित्यर्थः। अत्रापीति। पार्थिवस्पर्शोऽपीत्यर्थः। अवैलक्षण्यं च पाकजपूर्वापरसा-

न्यायलीलावतीप्रकाशः

तिरित्याह—अवैलक्षण्यादिति। 'तत्प्रतीतौ' संख्याद्यपाकजत्वप्रतीतौ। 'अत्रापि' पार्थिवस्पर्शोऽपि। विपर्ययावसायादपाकजत्वनिश्चयादित्यर्थः। अवैलक्षण्यं च स्वासमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिसमानाधि-

न्यायलीलावतीप्रकाशविवृतिः

करच्युतपरमाणौ व्यभिचारात्, तस्य विगतयोग्यावयवतद्देशवर्त्तिचम्पकावयवत्वात्। न चैवमपि विशेष्यदलस्थचैत्रपदव्यर्थता, योगिनमादायोक्तव्यभिचारप्रसङ्गेनायोगिपरस्य तस्य ग्रहणगतलौकिकत्वे तात्पर्यादिति मिश्राः।

अत्रेदं चिन्त्यम्। आपादयितृमते वायोरेव गन्ध इति कथं चैत्रघ्राणग्राह्यगन्धाधिकरणत्वेन पक्षता चम्पकावयवानाम्। न च तेन रूपेण वायोरेव पक्षता तत्रापादकस्यासिद्धत्वेनापादकत्वासम्भवात् परमात्रसिद्धस्यैव तथात्वमिति। तस्मादिदमत्र सारम्। वृक्षस्थितचम्पकावयवत्वेन पक्षता, अन्यच्च पूर्वोक्तमेव सम्यगिति। नवीनास्तु चैत्रघ्राणग्राह्यगन्धाधिकरणानि यदि तद्देशवर्त्यच्छिद्र(१)चम्पकावयवाः स्युरेतद्देशवर्त्तिचैत्रघ्राण(?)संयुक्तत्वे सति चैत्रघ्राणग्राह्यगन्धाधिकरणानि न भवेयुरिति व्यत्यासेन प्रयोगमाहुः। तन्न सच्छिद्रत्वप्रसङ्ग इतिमूलाननुसारित्वादिति दिक्।

स्वेति। 'स्वं' वैलक्षण्याश्रयाभिमतो धर्मो गन्धादिः। तदसमाना-

---

(१) ०वर्त्तिसच्छिद्रचम्प।

न्यायलीलावतीप्रकाशविवृतिः

धिकरणा द्रव्यत्वसाक्षाद्व्याप्या जातिर्जलत्वादिः, तत्समानाधिकरणो गुणः स्नेहादिः, तदवृत्तिरथ च सुरभित्वादिनानाजातिव्यापिका जातिर्गन्धत्वादिस्तच्छून्यत्वमवैलक्षण्यमित्यर्थः। तथा च स्पर्शे तादृशजात्यभावादवैलक्षण्यम्। न च शीततरत्वादिव्यापकशीतत्वादिकमादाय शीतस्पर्शादावव्याप्तिरेतस्यापाकजत्वव्याप्यस्य निरुक्त्या तथा सत्यपि दोषाभावात्। व्यापकव्यभिचारस्यादोषत्वात्। न च कठिनतरत्वादिजातिमादाय पृथिवीस्पर्शेऽप्यसम्भव इति वाच्यम्, काठिन्यस्य पूर्वपक्षिणा संयोगभेदत्वस्वीकारात्। न चैवमपि कठिनसंयोगे ज्ञानशब्दादौ चाव्याप्तिरिति वाच्यम्, व्यापकव्यभिचारस्यादोषत्वादित्युक्तत्वात्। द्रव्यत्वसाक्षाद्व्याप्यपदं तु परमाणुवृत्तिनीलासमानाधिकरणघटत्वादिसमानाधिकरणनीलवृत्तितया नीलत्वस्य नीलेऽतिव्याप्तिवारणाय। व्योमपटान्यतरत्वमादाय तद्दोषतादवस्थ्यमिति प्रथमजातिपदम्। वायुस्पर्शविलक्षणैव पृथिवीस्पर्शवृत्तिजातिरित्यभिसन्धिना पृथिवीस्पर्शे अव्याप्तिवारणाय नानाजातिव्यापकपदम्। न चैवमपि नानापदं व्यर्थमेवेति वाच्यम्, स्वस्यापि स्वव्यापकत्वेन पूर्वदोषावारकत्वात्। न च पाकजन्यघृतसुवर्णद्रव्य(व?)त्वादावप्येतत्सत्त्वे व्यभिचार इति वाच्यम्, तत्रापि तारतम्यव्यापिकायाः अग्निसंयोगप्रयुक्तात्यन्तानुच्छेदोच्छेदप्रयोजकजातेः सत्त्वात्। गुणत्वव्याप्यपदं प्रथमगुणपदं च सम्पातायातम्। चरमजातिपदं तु पृथिवीगुणत्वमादाय पृथिवीस्पर्शेऽव्याप्तिवारणायेति।

अत्र वदन्ति। स्पर्शापाकजत्ववादिमते पृथिवीस्पर्शमात्रवृत्तिजातौ मानाभावेन नानाजातीत्यादिपदमनर्थकमिति। तस्मात्पदवैयर्थ्यभयेन समव्याप्त्यभिप्रायकमेवेदम्। न चैवं ज्ञानसुखादावव्याप्तिः पाकप्रयोज्यनानाजातेर्नानाजातिपदेन विवक्षणात्। तादृशरूपत्वादिसत्त्वात् जलरूपादावव्याप्तिरिति अवृत्तीत्यन्तं चरमजातिविशेषणम्। पृथिवीरूपादौ च नीलत्वादिकमादायैव वैलक्षण्यं तत्रापि साक्षात्पदजातिपदे पूर्ववदेव गुणपदं तु सम्पातायातम्। विशिष्टाभावतया च न व्यर्थता। नानापदजातिपदे स्फुटार्थे। अव्यर्थता च तयोर्विशिष्टाभावसम्पादकतयैव। गुणत्वव्याप्यपदमपि स्फुटार्थम्। चरमजाति-

बाधः । विशेषगुणत्वं च एकद्रव्यवृत्तित्वं(१) कतिपयद्रव्यवृत्तित्वं

———

न्यायलीलावतीकण्ठाभरणम्

न्यम् । स्वासमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिसमानाधिकरणगुणावृत्तिनानाजातिव्यापकगुणत्वव्याप्यजातिशून्यत्वं तदित्यपि वदन्ति । पूर्वहेतौ विशेषणासिद्धिमाह—विशेषगुणत्वं चेति । एकद्रव्यवृत्तित्वमिति । द्रव्यविभाजकोपाधिमात्रव्याप्यवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । कतिपयेति । द्रव्यविभाजकोपाधिव्यभिचारित्वमित्यर्थः ।

न्यायलीलावतीप्रकाशः

करणगुणावृत्तिनानाजातिव्यापकगुणत्वव्याप्यजातिशून्यत्वम् । एकवृत्तित्वं द्रव्यत्वव्याप्यविभक्तोपाधिव्याप्यमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वं

न्यायलीलावतीप्रकाशविवृतिः

पदं च पूर्ववदेव । पाकपदं च स्पर्शवन्मात्रवृत्तितेजःसंयोगपरम्, अतो नाग्निसंयोगासमवायिकारणकशब्दवृत्तिजातिव्यापकशब्दत्ववति विभागजशब्देऽव्याप्तिश्च । न चैवं पाकजशब्देऽतिव्याप्तिः, अपाकजत्वस्यापि निरुक्तपाकघटितत्वात् । पाकप्रयोज्यत्वसमव्याप्तं(२) चेदमतो न घटादिरूपेऽव्याप्तिः । न चैवं पाकप्रयोज्यजातिशून्यत्वमेव सम्यक् यथोक्तविशेषणविशेष्यभावे वैयर्थ्याभावादित्याहुः ।

केचित्तु पृथिवीरूपरसगन्धानामेव विलक्षणत्वेन तद्भिन्नयावद्वृत्त्यवैलक्षण्यं निर्वाच्यमिति नैमित्तिकद्रवत्वे पृथिवीसुवर्णयोः परस्परविजातीयेऽव्याप्तिवारणाय गुणत्वव्याप्यपदं विशेषगुणत्वव्याप्यपरमिति वदन्ति ।

एकवृत्तित्वं संख्यादावतिव्याप्तमतस्तदर्थमाह—द्रव्यत्वेति । द्रव्यत्वव्याप्यो विभक्तोपाधिः पृथिवीत्वादिस्तद्व्याप्यो गन्धादिस्तन्मात्रवृत्तिगुणत्वव्याप्यजातिर्गन्धत्वादिस्तद्वत्त्वम् । निविडसंयोगत्वमादाय पृथिवीवृत्तिसंयोगव्यभिचार इति गुणत्वव्याप्यपदम् । तदर्थश्च गुणत्वसाक्षाद्व्याप्यत्वम् । अत एव स्वरूप(पा?)सिद्धिरपि सङ्गच्छते । अन्यथा पृथिवीस्पर्शमात्रवृत्तिजातिमत्त्वेन तदसङ्गत्यापत्तेः । पाक-

(१) एकवृत्तित्वमिति प्रकाशानुसारी पाठः ।

(२) पाकाप्रयोज्यत्वसमव्यापकं च. ।

वा। नाद्यः। स्पर्शस्यानेकद्रव्यवृत्तित्वात्। पाकजत्वविशेषा(१)-न्नैवमिति चेन्न, तस्यैवासिद्धेः। द्वितीये तु वेगेनैव व्यभिचारात्(२)। ततः पृथिवीमात्रभेदग्राहकप्रमाणाभावात् पृथिवी नेतरेभ्यो भिद्यते [इति]। मैवम्। अस्ति तावद्गन्धं प्रति गन्धवतां समवायिकारण-

न्यायलीलावतीकण्ठाभरणम्

आद्ये स्वरूपासिद्धिमाह—स्पर्शेति। द्रव्यचतुष्टयवृत्तित्वादित्यर्थः। यदि कतिपयद्रव्यवृत्तिगुणत्वं विशेषगुणत्वं तत्राह—वेगेनेति। तस्य सामान्यगुणत्वाभ्युपगमादित्यर्थः। पूर्वपक्षमुपसंहरति—तत इति।

पृथिवीत्वमितरभेदकं साधयितुं पीठमारचयति—अस्ति तावदिति। तथा च गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिसिद्धि-

न्यायलीलावतीप्रकाशः

स्वरूपासिद्धमित्याह—स्पर्शस्येति। एकोपादेयत्वं सामान्यगुणे व्यभिचारीति शेषः(३)। अस्ति तावदिति। ननु मण्यादौ गन्धो योग्यानुपलम्भबाधितः, न च घर्षणात्तत्रापि गन्धोपलम्भः, घर्षकगन्धविलक्षणगन्धाननुभवात्। नापि पाकजरूपवत्त्वेन गन्धमनुमाय गन्धज्ञानसहकृतेनेन्द्रियेण तत्र पृथिवीत्वग्रहः, अतीन्द्रिये मानाभावात्, तस्य जलादावपि सुवचत्वात्। अत्राहुः। लाघवाद् य एवावयवाः मणिमारब्धवन्तस्त एव तद्भस्मारभन्ते। तत्र च गन्ध उपलभ्यत एव। तथा च गन्धवदारम्भकत्वान्मणिपरमाणुर्गन्धवानिति गन्धवदारभ्यत्वेन मण्याद्यपि गन्धवदेव। स चोद्भूतो नास्तीत्यनुद्भूतः कल्प्यते। न चो-

न्यायलीलावतीप्रकाशविवृतिः

जत्वविशेषणादित्यग्रिममूलस्यालग्नकत्वमाशङ्क्य पूरयति—एकोपादेयत्वमिति। एकवृत्तित्वं यद्येकोपादेयत्वमभिमतं तदा व्यभिचार इत्यर्थः। एवं चाग्रिममूलमेव तद्व्यभिचारोद्धारपरमिति भावः। नापीति। एतच्च गन्धमात्रस्यैव व्यञ्जकत्वमिति मतमवलम्ब्य। वस्तुतः पाकजज्ञानसहकृतेन्द्रियेणापि तस्य ग्रहसम्भवादित्यवधेयम्। अतीन्द्रिय इति। न च पाकजरूपेण तदनुमानमप्रयोजकत्वादिति भावः। गन्धवदारभ्यत्वेनेति। विजातीयगन्धवदसहकृतगन्धवदारभ्य-

(१) पाकजत्वविशेषणान्नै०। (२) ०चारः। (३) भावः।

त्वम् । न चैतन्नानाव्यक्तिनिष्ठम्, सति भावमात्रस्याहेतुत्वात्मक-त्वात्(१)। सावधारणस्य(२) च व्यभिचारात्तासु सिद्धेः। ततस्त-त्प्रयोजकजातियोगित्वमास्थेयम्। तदेव [च] पृथिवीत्वम्। न च

न्यायलीलावतीकण्ठाभरणम्

रित्यर्थः। ननु घटत्वादिनैव तदवच्छिद्यतामित्यत आह—न चेति। घटे सति गन्धो भवतीत्यन्वयग्रहेऽपि घटं विना न भवतीतिव्यतिरे-काभावान्न घटत्वादीनां समवायिकारणतावच्छेदकत्वमित्यर्थः। त-र्हि द्रव्यमात्रमेव गन्धसमवायिकारणं स्यादित्यत आह—साधारणेति। तास्विति। पृथिवीव्यक्तिषु गन्धसमवायिकारणत्वसिद्धेरित्यर्थः। किं चात इत्यत आह—तत इति। मण्यादावपि गन्धोऽस्ति परन्त्वनुद्भू-तः, कथमन्यथा भस्मनि गन्धोपलम्भः। न हि यैः परमाणुभिर्मणि-रारभ्यते तद्भिन्नेन तस्य भस्मारभ्यत इति युक्तं कल्पनागौरवा-पातात्। उद्भूतगन्धैः कथमनुद्भूतगन्धारम्भ इत्यत्र तु तप्ततैलगतं तेज एव निदर्शनम्, अनुद्भूतरूपेण तेजसा तत्र उद्भूतरूपतदार-म्भात्। किं च क्वचित् पाकाद्रूपादि विलक्षणं दृश्यते जलादौ तु न दृश्यत इति तदाश्रयगतं वैजात्यमावश्यकम्। नीलादिरूपाम्लादिरस-समवायिकारणतापि जात्यवच्छेद्येति सिद्धं पृथिवीत्वमित्यर्थः। अथ समवायिकारणत्वं च शब्दसमवायिकारणत्ववन्न जात्यवच्छेद्यं अदृष्टवत्त्वेनैवावश्यकेन तदवच्छेदादिति न क्षेत्रज्ञमात्रनिष्ठमात्मत्वं जातिः, धर्म्मिग्राहकमानेन ईश्वरस्याप्यात्मत्वेनैव सिद्धेः।

वायुना चम्पकादिभागानयने सच्छिद्रतापत्तिः कर्पूरेऽल्पतापत्तिः

न्यायलीलावतीप्रकाशः

द्भूतगन्धेनानुद्भूतगन्धानारम्भः, अतितप्ततैलादावनुद्भूतरूपतेज-सोद्भूतरूपतदारम्भवदविरोधात्। जलादौ च तदसम्भवान्नातिप्र-

न्यायलीलावतीप्रकाशविवृतिः

त्वेनेत्यर्थः। तेन गुणविरोधेन निर्गन्धे न व्यभिचारः। अतितप्तेति। एत-च्चोद्भूतत्वादेरदृष्टभेदप्रयोज्यत्वेनानियममभ्युपेत्य। वस्तुत उद्भू-तादेवोद्भूतमितिनियमेऽपि पाकेन परमाणावनुद्भूतगन्धनाशे उ-

---

(१) तुत्वात्० । (२) साधारणस्येति कण्ठाभरणधृतः पाठः ।

न्यायलीलावतीप्रकाशः

सङ्गः। अपि च पाकाद्रूपादीनां परावृत्तिरुत्पत्तिश्च दृश्यते, जलादौ च नियमेन न दृश्यते, इत्याश्रयविशेषप्रयुक्तोऽयमिति परिशेषे घटत्वादीनां व्यभिचारात् सकलघटादिव्यापकजलादिव्यावृत्ततद्योग्यताघटकरूपसिद्धिः। तच्च बाधकाभावाज्जातिः। एवं नीलादिरूपाम्लादिरससमवायिकारणतावच्छेदकतयाऽपि तत्सिद्धिः। न चैवं सुखसमवायिकारणत्वेन संसार्यात्मनिष्ठा आत्मत्वव्याप्या जातिः स्यात्, इष्टापत्तेः। न चैवं नवैव द्रव्याणीति व्याहतं ज्ञानवत्त्वेन विभागात्। आत्मनस्तु नित्यद्रव्यत्वेन(१)द्रव्यत्वव्याप्यव्याप्यजात्यभावसाधने विपक्षे बाधकाभावः। सुखसमवायिकारणत्वमात्मत्वावच्छेद्यमेव अदृष्टाभा-

न्यायलीलावतीप्रकाशविवृतिः

दुद्भूतगन्धारम्भात्तदारब्धे भस्मनि उद्भूतगन्धाविरोधः। न च निर्गन्धपरमाणोरेव सगन्धभस्मारम्भः, पाकजगन्धे पूर्वगन्धनाशस्यान्वयव्यतिरेकाभ्यां कारणत्वावधारणात्। तैलस्थलेऽपि तादृशतेजोन्तरप्रवेशादेव तादृशतेजोनिष्पत्तिरिति स्मर्त्तव्यम्। पाकादिति। पाकप्रयोज्यरूपजनकतावच्छेदकत्वेन पृथिवीत्वसिद्धिरित्यर्थः। यथाश्रुते पाकजरूपस्य परमाणुमात्रवृत्तितया पृथिवीत्वस्य तदनवच्छेदकत्वात्। अत एव घटत्वादीनामवच्छेदकत्वशङ्कया तन्निराकरणमपि युक्तम्। एवमिति। नीलादियोग्यतावच्छेदकजातेः शुक्लादिमत्यप्यविरोधादिति भावः। न चैवमिति। यद्यपि सुखसमवायिकारणतावच्छेदकजात्यभ्युपगमेऽपि तद्व्यापकात्मत्वजात्यैव विभागादियमाशङ्का निर्बीजा, तथापि तज्जातौ मानाभाव इत्यभिमानादियमाशङ्का। ज्ञानवत्त्वेनेति। आत्मपदशक्यतावच्छेदकतया सिद्धेनात्मत्वेनेत्यर्थः। अतो न द्रव्यत्वव्याप्यव्याप्येत्याद्यग्रिमग्रन्थविरोधः। केचित्तु ज्ञानवत्त्वेनेति यथाश्रुतमेव, सकलात्मवृत्त्यात्मत्वं जातिर्नास्त्येव। अग्रे च द्रव्यत्वव्याप्यपदं द्रव्यविभाजकोपाधिपरमित्यविरोध इत्याहुः। कचित्तु द्रव्यत्वव्याप्येत्यनन्तरं व्याप्यपदशून्यः पाठः। स चायुक्तः। तथा सति परमाणौ स्फुटव्यभिचारसम्भवे विपक्षबाधकाभावावलम्बनप्रयासानुपपत्तेः(२)। न च सुखसमवायिकारणतावच्छेदकजातिस्वीकारे जलावयविनि स्नेहसमवायिकारणतावच्छेदकजात्यापत्तिरिष्ट-

(१) द्रव्येति सम्पातायातम्। (२) पात्तिः।

गन्धवत्त्वमेवातिप्रसङ्गीति वाच्यम्, अनिलादौ चम्पकगन्धिकर्पूरगन्धीत्युपाधिभेदसम्भेदेनैव(१) कुङ्कुमारुणा तरुणीत्यादिवत् तत्प्रतीतेः(२)। न चैवमव्ययतापत्तिरिति वाच्यम्, अङ्कुरदशामारभ्य यथान्वहमदृष्टाकृष्टैर्भागैरुपचयाद्विविधशाखाभिराकाशदेशव्यापकत्वं तरोर्न तु च्छेदे सति, तथेहापीत्यतो विशेषात्। अत एव न चम्प-

न्यायलीलावतीकण्ठाभरणम्

च निरस्यति—अङ्कुरेति। अदृष्टवशात् क्वचित् पूरणं क्वचिन्नेति नातिप्रसङ्ग इत्यर्थः। अत एवेति। अदृष्टवशात्तत्रापि दलपूरणमित्यर्थः। औ-

न्यायलीलावतीप्रकाशः

वान्नेश्वरे सुखमित्यपि वदन्ति। अनिलादाविति। न च चम्पकगन्धीत्यत्र चम्पकस्येव गन्धोऽस्तीत्यर्थे उपमानाच्चेत्यनेन समासान्तविधानाच्चम्पकगन्धभिन्नगन्धवत्त्वं प्रतीयत इति वाच्यम्, उपाधेरन्वयव्यतिरेकात्तस्यैव वायोर्दूरे निर्गन्धत्वेन प्रत्यभिज्ञानाच्च। तथेहापीति। फलेन सामग्र्यनुमानस्य तुल्यत्वादित्यर्थः। अत एवेति। न च तरोराध्यात्मिकवायुना पार्थिवावयवानामन्तर्नयनाज्जलतेजोभ्यां च तस्य पाकाद्वृक्षवृद्धिः, च्छेदे तु तदभावाद्वृद्ध्यभावः। कर्पूरे चाध्यात्मिकवायोरभावाद्वैषम्यमिति वाच्यम, फलेन सामग्र्यनुमानस्य तुल्यत्वादित्युक्तत्वात्। उपाध्यज्ञानेऽपि सुरभिर्वायुरितिप्रतीतेर्वायौ गन्धः

न्यायलीलावतीप्रकाशविवृतिः

त्वादिति भावः। नित्यस्य स्वरूपयोग्यस्य सहकारियोग्यतावश्यम्भावादिदमयुक्तमित्यनुशयोऽपि नासूचितः। उपाधेरिति। प्रयोगसमर्थनं तु गन्धव्यक्तिविशेषसादृश्यमादायेति भावः। केचित्तु चम्पकस्य गन्धः चम्पकगन्धः सोऽत्रास्तीति सम्बन्धीयेन (मत्वर्थीयेन?) तत्साधुत्वमित्याहुः। अङ्कुरदशामिति मूलम्। इदं तु समाधिसौकर्यादुक्तम्। वस्तुतस्तु यथा दीपारम्भकसामग्र्यैव परितोविसारि अनुद्भूतस्पर्शमुद्भूतरूपं प्रभाख्यद्रव्यमारभ्यते, तथा चम्पकाद्यारम्भकसामग्र्याप्यनुद्भूतरूपस्पर्शमुद्भूतगन्धचम्पकपरितोविसारिद्रव्यमारभ्यते। अत एवानुकूलेऽपि वायौ न दूरे गन्धग्रहः, चम्पक-

(१) ०धिसम्बन्धेनैव कु०। (२) ०णीतिवत् तत्प्र०।

कादौ सच्छिद्रतापत्तिरिति(१)। वायोर्गन्धवत्त्वे उद्भूतस्पर्शस्य(२) चाक्षुषतापत्तेः। रूपवत्त्वं प्रयोजकमिति चेन्न, गुणादावभावात्। न च स्पर्शोऽप्यपाकज एव, सुखास(श)कादौ सततपनकरसम्भेद

न्यायलीलावतीकण्ठाभरणम्

पाधिकत्वमुक्त्वापि वायोर्गन्धवत्त्वे बाधकान्तरमाह—वायोरिति। उद्भूतगन्धवत्त्वे सति उद्भूतस्पर्शवत्त्वं द्रव्यचाक्षुषत्वव्याप्यमित्यर्थः। अवैलक्षण्यात् स्पर्शेऽपि पाकजत्वं नास्तीति यदुक्तं तत्राह—न चेति। स्पर्शोऽपि पाकजः पृथिव्यामितरभेदसाधक इत्यर्थः। पाकजत्वाय वैलक्षण्यमाह--सततेति। सुखाशकं त्रिपुषीफलम् (३)। आदिपदात् कपि-

न्यायलीलावतीप्रकाशः

स्वाभाविकः स्यादित्यत आह--वायोरिति। उद्भूतस्पर्शस्येति। प्रत्यक्षस्पर्शस्येत्यर्थः। अतो न परमाणौ व्यभिचारः। महत्त्वेन हेतुर्विशेष्य इत्यन्ये न च चक्षुरसन्निकृष्टविनष्टेन व्यभिचारः, चक्षुर्योग्यताया आपाद्यत्वात्। रूपवत्त्वमिति। न च रूपवत्त्वस्यैव चक्षुर्ग्राह्यत्वे योग्यतावच्छेदकतया साध्यत्वात्तस्य चानुपाधित्वादिति वाच्यम्, रूपवत्त्वस्यैव योग्यतारूपत्वेन साध्यत्वात् स्वरूपेणोपाधित्वाविरोधात्। गुणादाविति। यद्यपि साधनावच्छिन्नसाध्यव्यापकत्वे नायं दोषस्तथाप्युपाधेरप्यापादयितुं शक्यत्वात् साधनव्यापकत्वमस्त्येवेति भावः। सुखाशकादाविति(४)। अयमर्थः। अस्ति त्वचा परामृष्टेषु तत्तद्वस्तुस्पर्शेषु पाकानन्तरं सुकुमारकठिनतरतमादिधीः सार्वलौकिकी, तत्रान्वयव्यतिरेकाभ्यां तेजःसंयोग एव प्रयोजकः। न चावयवविनिविडः संयोगः संग्रहाख्य एव तस्य विषयः, तस्य द्वीन्द्रियग्राह्यतया

न्यायलीलावतीप्रकाशविवृतिः

भागानयने दूरेऽपि गन्धग्रहः स्यात्। समीप इव दूरेऽपि सामग्र्यास्तुल्यत्वादिति शूलपाणिमिश्रा वदन्ति।

अवैलक्षण्यादपाकजत्वमिति प्रागुक्तम्, तच्चासिद्धमिति प्रतिपादयन्नाह--अयमर्थ इति। तस्येति। न च त्रसरेणुसंयोगवदेकेन्द्रियग्राह्यत्वं

(१) ०त्तिरपि। (२) ०त्त्वे प्रत्यक्षस्पर्शवतश्चा०।

(३) त्रपुसं कण्टकिफलमिति भावप्रकाशः। शशा इति भाषा।

(४) कर्कटीविशेष इति प्राचीनटिप्पणी।

स्पर्शभेदस्य प्रतीतेः । अन्यत्रापि च तीव्रसुकुमारादिभावेन विशेषप्रतीतेः । यत्र तु न प्रतीयते विशेषस्तत्रापि पार्थिवस्पर्श-

न्यायलीलावतीकण्ठाभरणम्

कच्छु(१)प्रभृतिपरिग्रहः । यत्र त्विति । पाषाणादावित्यर्थः। न च सुकुमारादिरवयवसंयोगभेद एव न तु स्पर्शभेद इति वाच्यम् , त्वङ्मात्रवेद्यत्वात् संयोगग्रहेऽपि कठिनसुकुमारादिसंशयादिति भावः । तत्रापीति ।

न्यायलीलावतीप्रकाशः

चक्षुषाऽपि तद्ग्रहापत्तेः । न चेष्टापत्तिः, चक्षुषा तद्ग्रहेऽपि स्पर्शविशेषसंशयात् अन्धकारेऽपि तत्प्रतीतेः । अवयवसंयोगस्यावयविन्यवृत्तेस्तद्गतत्वप्रतीतेर्भ्रमत्वापत्तेश्चेति स्पर्शविशेष एव तद्विषय इति । तत्रापीति । पृथिवीस्पर्शः तेजःसंयोगजन्यः प्रतिनियतेन्द्रियग्राह्यपृथिवीगुणत्वात् गन्धवत् । न च त्वगवेद्यत्वमुपाधिः, तेजोवयविनि साध्याव्यापकत्वात् । न च साधनावच्छिन्नसाध्यव्यापकः

न्यायलीलावतीप्रकाशविवृतिः

तस्येति वाच्यम् , त्रसरेणोरेकेन्द्रियग्राह्यतया तत्र तथात्वादत्र तु आश्रयस्य द्वीन्द्रियग्राह्यत्वादिति भावः । अन्धकारेऽपीति । अन्धकारस्थितपदार्थेऽप्यालोकावस्थितसुखाशकवत्काठिन्यप्रतीत्यापत्तेरित्यर्थः । तथा च तेजःसंयोगानुविधायितया संयोगादन्यदेव काठिन्यमिति भावः । यत्तु अन्धकारे धर्मिणि तत्प्रतीतेर्नैविड्यप्रतीतेः । तथा च तत्रापि कठिनोऽयमन्धकार इति प्रतीतिः स्यादिति भाव इति । तदयुक्तम् । इष्टापत्तेः । केचित्तु अन्धकारपदं चक्षुर्व्यापारोपलक्षकं(२) तथा च त्रसरेण्ववच्छेदेनान्धकारे यदा घटादिकं त्वचा गृह्यते तदा संयोगग्रहाभावेपि काठिन्यप्रतीतिरिति संयोगादन्यदेव काठिन्यमित्यर्थ इत्याहुः । अवयवगतसंयोगविशेषस्यैव काठिन्यरूपत्वेऽवयविनि कठिनप्रतीतिर्न स्यात्स्याद्वा भ्रान्ता, अवयवसंयोगस्यावयविन्यभावादित्याह--अवयवेति । तेज इति । तेजःसंयोगप्रयोज्यत्वं तेजःसंयोगजन्यजातीयत्वं वा साध्यमतो न कणादमतेऽवयविस्पर्शे अंशतो बाधो न वाऽवयविरूपादौ व्यभिचारः(३)। हेतुरपि प्रतिनियतेन्द्रियग्राह्यजातिमत्पृथिवीगुणत्वमतो न परमाणुस्पर्शे भागासिद्धिर्न वा

(१) कपिकच्छुः शूकशिम्बी, आलकुशीति भाषा। Cowhago इत्यांग्लभाषायाम् ।

(२) चक्षुर्व्यापारविरहोपलक्षकं । (३) यथाश्रुतसाध्ये पक्षहेत्वोः पृथिवीपदं पृथिवीपरमाणुपरमिति न तत्र तत्र बाधव्यभिचारौ ।

त्वेनैव रूपादिवदनुमानम् । न चैवं तोयादौ प्रसङ्गः । तज्जा-

न्यायलीलावतीप्रकाशः

पक्षेतरत्वात् । न च साधनावच्छिन्नसाध्यव्यापको रूपवदिन्द्रियग्रा-ह्यगुणत्वव्याप्यजातिमत्त्वमुपाधिस्तुल्ययोगक्षेमत्वात् । न च सन्दि-ग्धोपाधिः, उक्तविपक्षबाधकाद्धेतोः साध्यव्याप्यत्वेनोपाधेः साध्या-व्यापकत्वात् । यद्यपि पाकजस्पर्शो नेतरभेदसाधकः अवयविनि भागासिद्धेः, तथापि पाकजत्वमग्निसंयोगासमवायिकारणकवृत्तिगु-णत्वव्याप्यव्याप्यजातिमत्त्वं तथेति संक्षेपः ।

सा चेयं यदि परमाणुरूपैव स्यात् गन्धोऽतीन्द्रियत्वान्न पृथिवी-

न्यायलीलावतीप्रकाशविवृतिः

त्रसरेणुविभागे व्यभिचार इति ध्येयम् । पक्षेतरत्वादिति । यद्यपि स्प-र्शत्वादेरपि व्यावर्त्तनादिदमयुक्तं न च साधनावच्छिन्नमध्ये पक्षमा-त्रव्यावर्त्तकत्वं तथाविधस्यानुपाधित्वे वायुप्रत्यक्षानुमाने रूपवत्त्व-स्यानुपाधितापत्तेस्तथापि साध्यव्यापकताग्राहकमानाभावे तात्प-र्यम् । न चेति । तेजोवयविनि साध्याव्याप्तेराह--साधनावच्छिन्नेत्यादि । साधनव्यापकतापरिहाराय रूपवदित्यादि । सत्तामादाय मास्तु स दोष इति गुणत्वव्याप्येति । रूपभिन्नगुणत्वादिकमादाय तद्दोषवार-णाय जातीति । उक्तेति । सौकुमार्यप्रत्ययानुपपत्त्यादेरित्यर्थः । तथा-पीति । गुणत्वमादाय संख्यादावतिव्याप्तिरिति गुणत्वव्याप्यपदम् । स्पर्शत्वमादाय जलस्पर्शेऽतिव्याप्तिरिति द्वितीयव्याप्यपदम् । यद्य-प्येवमप्यनुष्णाशीतत्वमादाय वायुस्पर्शे शुक्लत्वमादाय जलरूपे चा-तिव्याप्तिस्तथापि गुणत्वपदेन स्पर्शत्वमेवोक्तमत एव संयोगशब्द-योरपि नातिव्याप्तिः । मिश्रास्तु गुणत्वपदेन प्रतिनियतेन्द्रियग्राह्यता-वच्छेदकजातिरेवोक्ता शब्दातिव्याप्तिवारणाय च मूर्त्तमात्रवृत्तित्वं संयोगविशेषणमिति वदन्ति । परमाणुस्पर्शवायुस्पर्शान्यतरत्वमादा-यातिव्याप्तिरिति जातीति । उक्तजातिमत्त्वं स्पर्शे पाकजत्वं तद्वत्त्व-मितरभेदे हेतुरिति मन्तव्यम् । अणुमनोऽस्वीकारपक्षे अणुमात्रवृत्ति-

न्यायलीलावतीकण्ठाभरणम्

'पृथिवीस्पर्शः अग्निसंयोगासमवायिकारणकगुणवृत्तिगुणत्वव्याप्य-ज्जातिमान् प्रतिनियतेन्द्रियग्राह्यपृथिवीगुणत्वात् गन्धवत् । अन्यथा

तीये क्वचिदपि विशेषाप्रतीतेः। तस्मादेभिरेव लक्षणैः पृथिवीतरेभ्यो भिद्यते इति सर्वं रमणीयम्।

सा चेयमवयवजन्या न त्वणुसंहतिमात्रम्। स्थूलप्रत्ययस्य

न्यायलीलावतीकण्ठाभरणम्

पिठरे पाकजस्पर्शाभावात् भागासिद्धिः स्यादिति भावः। एभिरिति। पृथिवीत्वगन्धवत्त्वपाकजस्पर्शवत्त्वादिभिरित्यर्थः।

सा चेयं द्विविधेति भाष्ये पृथिवीविभाग उक्तस्तमवयविनि परविप्रतिपत्तिं निरस्य समन्वयति—सा चेयमिति। परमाणुमात्ररूपत्वे गन्धादीनामतीन्द्रियत्वात् न पृथिवीत्वव्यवस्थापकत्वं स्यादित्युपोद्घात इत्यप्याहुः। तथा च स्थूलत्वेन भासमाना पृथिवी द्रव्यसमवेता न तु परमाणुपुञ्जरूपेत्यर्थः। परमाणुः स्वभिन्नोपादेयोपादानं न वा स्पर्शवत्त्वमणुत्वव्याप्यं न वेति विचारारम्भकः संशयः। इदं स्थूलमिति प्रत्यक्षमेवावयविनि प्रमाणमित्याह--स्थूलेति। स्थौल्यं च परिमाणविशेषः प्रती-

न्यायलीलावतीप्रकाशः

त्वव्यवस्थापक इत्यौपोद्घातिकसङ्गत्याह--सा चेयमिति। यद्यप्यवयवत्वं द्रव्यसमवायिकारणत्वं सज्जन्यत्वं परेषां परमाणुजन्यपरमाणावस्त्येवेति विवादाभावः। न चावयवसमवेतत्वं तत्र, सर्वपृथिवीपक्षीकरणे परमाणौ तदभावात्। तथाप्यवयविवृत्तिजातिमत्त्वं तद्विवक्षितम्। न त्विति। न मनोवदणुमात्रवृत्तिजातिमतीत्यर्थः। अत्र द्रव्यत्वमणुत्वव्याप्यं न वा परमाणुः स्वभिन्नोपादेयोपादानं न वेति

न्यायलीलावतीप्रकाशविवृतिः

जातिमत्त्वमप्रसिद्धमित्यन्यथा तामाह—अत्रेति। [(१)तदभावात्। अवयवसमवेतत्वाभावात्। पार्थिवपरमाणुसमूहः पृथिवी भवत्येवेत्यत आह—न मनोवदिति।] विधिप्रसिद्धिरणुवृत्तिरूपे निषेधप्रसिद्धिस्तु गुणवृत्तिधर्म्मे। स्वभिन्नेति। स्वपदं पक्षीभूतपरमाणुपरं तद्भिन्नस्य यदुपादेयं तदुपादानमित्यर्थः। परमाण्वन्तरे विधिप्रसिद्धिर्व्यतिरेकप्रसिद्धिस्तु तन्मते [अलीके मन्मते] गुणादौ। संयोगादेरनभ्युपगमान्न तेन सिद्धसाधनम्।

(१) [ ] एतच्चिह्नमध्यस्थपाठो द्वितीयादर्शपुस्तके नास्ति। तत्पाठस्तु 'मन्तव्य'मित्यनन्तरमेव युक्तः।

परमाणावनुपपत्तौ तदतिरिक्तवस्त्वालम्बनत्वात्। तथा हि अणवो नापरोक्षबुद्धिविषयाः, परमसूक्ष्मत्वादेकाणुवत्।

न्यायलीलावतीकण्ठाभरणम्

तिसाक्षिकः, स चावयविन्येव, न परमाणौ।

ननु परमाणव एव स्थूलप्रत्ययविषयाः स्युरित्यत आह--तथा हीति। अणवो न योगधर्माजन्यजन्यस्वविषयकसविकल्पकाजन्यजन्यप्रत्यक्षविषया इति साध्यार्थः। परमसूक्ष्मत्वादिति। महत्त्वानधिकरण-

न्यायलीलावतीप्रकाशः

संशयः। स्थूलप्रत्ययस्येति। तदन्याविषयस्येति शेषः(१)। अतो नार्थान्तरम्। अवयविसाधकत्वेन प्रत्यक्षस्यैवोपन्यासात्, अत्रापक्षधर्मत्वस्यानुमानदूषणस्याभावः। स्थौल्यं च नानेकद्रव्यवृत्तित्वं द्व्यणुकेऽतिप्रसङ्गात्, किंतु बहुद्रव्यवृत्तिद्रव्यत्वम्। अवयवद्वयारब्धेऽपि परम्परया तदस्त्येव। द्रव्यत्वं स्थौल्यसमानाधिकरणं न वेति संशयः। परस्य द्रव्यत्वे तत्प्रसिद्धिः। परमाणौ तदनुपपत्तिमाह--तथा हीति। एकः स्थूलोऽयमिति

न्यायलीलावतीप्रकाशविवृतिः

वस्तुतः स्वाभिन्नेत्यनन्तरं द्रव्यपदं पूरणीयमिति भावः। ननु परमाणुविषयकत्वाभावेऽपि नावयविविषयकत्वं गुणादिविषयत्वेनान्यथासिद्धेरित्यत आह—तदन्येति। परमाण्ववयव्यन्याविषयस्येत्यर्थः। तदविषयकत्वं च तदविशेष्यकत्वमतो न रूपादिविषयकत्वेनासिद्धिः। नार्थान्तरमिति। गुणादिविषयतया नान्यथासिद्धिरित्यर्थः। सा चेत्यादि साध्ये स्थूलेत्यादिहेतोर्वैयधिकरण्यमाशङ्क्याह--अवयवीति। 'अभावः' अप्रसङ्गः। किं त्विति। आद्यद्रव्यपदं समवायिपरमतो न द्रव्यपदवैयर्थ्यम्। न वा वृत्तिपदस्याश्रितत्वमात्रार्थकतया कालमादाय द्व्यणुकेऽतिप्रसङ्ग इति भावः। द्रव्यपदं च त्रित्वादावतिप्रसङ्गवारणाय। द्रव्यत्वमिति। स्थौल्यमत्र बहुसमवेतत्वमात्रम्। द्रव्यत्व इति। द्रव्यवत्त्व इत्यर्थः। परस्यावयव्यनभ्युपगमेन यथाश्रुते विरोधात्। केचित्तु सामान्यविप्रतिपत्तेः प्रागेव दर्शितत्वात् प्रकान्तत्वेन स्थूलपृथि-

---

(१) ज्ञानाकारविशेषमेव स्थौल्यप्रत्ययोऽवगाहत इत्यस्त्वित्यत आह—तदन्येति। बाह्यान्येत्यर्थः। नीलत्वादेरिव स्थौल्यस्यापि बाह्याकारत्वेनानुभवादिति भावः। परममहानेव स्थूलप्रत्ययविषयोऽस्तु इत्याशङ्कया कार्यद्रव्यान्याविषयस्येति शेष इति प्राभाकरः। इति दीधितिः।

विशिष्टोत्पादादैन्द्रियकत्वमिति चेन्न, तदनभिधानात्। तथा हि* किं चक्षुरादिभिः सहोत्पादो विशिष्टोत्पादः, उत तद्दर्शनजनकतयोत्पादः, अथ तद्दर्शनविषययोग्यतयोत्पादः। नाद्यौ। चक्षुरादिवदणूनां प्रतिभासविरोधात्। दृश्यता तु महत्त्वं वा अव-

न्यायलीलावतीकण्ठाभरणम्

द्रव्यत्वादित्यर्थः। विशिष्टोत्पादविरहमत्रोपाधिमाह—विशिष्टेति। प्रत्येककारणैश्चक्षुरादिभिरेकस्मिन् क्षणे सहोत्पाद इति प्रथमविकल्पार्थः। परमाणुविशेषस्तथोत्पद्यते यथा स्वविषयं प्रत्यक्षं जनयतीति द्वितीयविकल्पार्थः। काचिदेव परमाणुव्यक्तिर्दर्शनायोग्या भवति स्वाभाव्यादिति तृतीयविकल्पार्थः। चक्षुरादिवदिति। सहोत्पादे चक्षुराद्यपि प्रत्यक्षं स्यादित्यर्थः। तृतीये त्वाह—दृश्यतेति। द्रव्यदृश्यताया महत्त्वव्याप्तिरित्युपाधेः साधनव्यापकत्वमित्यर्थः। ननु स्वरूप-

न्यायलीलावतीप्रकाशः

प्रत्यक्षं न परमाणुविषयं प्रत्यक्षत्वादात्मप्रत्यक्षवदिति साधनार्थः। अतो न परमाणुमात्रपक्षत्वेंऽशतः सिद्धसाधनम्। नन्वेकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहः प्रत्यक्षः स्यात्, दूरे एकधान्याप्रत्यक्षत्वेऽपि तद्राशेः प्रत्यक्षवत्। न। तत्रैकधान्यस्य स्वरूपयोग्यत्वात्। उक्तसाधने विपक्षे बाधकाभावात् न व्याप्तिरित्यभिप्रेत्याह—विशिष्टेति। 'तदनभिधानात्' विशिष्टस्य निर्वक्तुमशक्यत्वादित्यर्थः। तृतीयं कल्पं दूषयति—दृश्यता त्विति। ननु तव अदृश्यविशेषद्व्यणुकस्य दृश्यजनकत्ववत् मम चादृश्यनिर्विकल्पकात्मकसमनन्तरप्रत्ययस्यैव दृश्यसविकल्पकजनकत्ववददृश्यविशेषस्यैव दृश्यविशेषजनकत्वमस्तु

न्यायलीलावतीप्रकाशविवृतिः

वसाधनार्थमयमारम्भ इति विप्रतिपत्तौ द्रव्यत्वपदं द्रव्यवृत्तिपृथिवीत्वपरमतो जलाद्यवयविसिद्धिदशायां(१) द्रव्यत्वे प्रसिद्धिरतो यथाश्रुत एव ग्रन्थ इत्याहुः। प्रत्यक्षत्वादिति। लौकिकसाक्षात्कारत्वादित्यर्थः। न च व्यावर्त्याप्रसिद्धिस्तन्मते प्रसाध्याङ्गत्वादिति भावः। नन्विति।

* आरोपविषयस्यायोग्यत्वादैन्द्रियक आरोपोऽपि न सम्भवतीत्याह—तथा हीत्यादि। इति दीधितिः।

(१) जलाद्याकारासिद्धिदशायामित्यपि पाठः।

यवित्वं वाऽणूनां न सम्भवति। स्वरूपभेदस्तु अदृश्यरूपसन्ततौ यदि नयनादिसाहित्येनोत्पद्यते [तदा] अदृश्येन्द्रियादिसन्ततौ दृश्येन्द्रियक्षणप्रसवप्रसङ्गः। केषाञ्चिदेवादृश्यानां दृश्यजननशक्तिनियमात् न दृश्यजनकत्वं सर्वेषामिति चेन्न, अणुरूपस्य दर्शनविषयताविरोधे स्वरूपविशेषस्यानुपाधित्वात्। धूमस्वभावभेदस्येव दहनजन्यत्वे। तथा च पारमर्षं सूत्रम्—"नातीन्द्रियत्वादणूनामिति"। [गौ०सू०२।१।३६। अस्य सूत्रैकदेशस्य "सेनावनवद्ग्रहणमिति चे" दित्यादिः।] स्थूलावभासानुपपत्तेश्च। ननु किं पूर्वापरादिदेशमवष्टभ्य दृश्यानामेव परमाणूनां सत्त्वं स्थौल्यं एकस्यैव वा तावद्देशव्यापित्वम्। तत्राद्यं तावत्परमाणुषु सम्भवत्येव। द्वितीयस्य तु नास्त्येवावभासो यस्यानुपपत्तिरिति

न्यायलीलावतीकण्ठाभरणम्

भेद एव दृश्यताप्रयोजकः स्यादित्यत आह—स्वरूपेति। एवं सति चक्षुरादेरपि कदाचित् प्रत्यक्षं स्यादित्यर्थः। 'क्षणो' व्यक्तिः। सन्तानविशेषे तादृशस्वरूपभेदो न तु सर्व्वसन्ततावित्यत आह—केषांचिदिति। अणुत्वस्यायोग्यत्वव्याप्यतया निरूपाधित्वेन उत्पादविशेषस्यातन्त्रत्वादित्यर्थः। धूमत्वावच्छेदेनैव वह्निव्याप्यत्वे धूमविशेषस्यानुपाधित्ववत् अन्यथा विशेषस्योपाधित्वे सकलानुमानोच्छेद इत्यर्थः। अणुत्वावच्छेदेनैवातीन्द्रियत्वमित्यत्र सूत्रकृन्मतमाह—तथा चेति। अभ्युपेत्याह—स्थूलेति। परमाणोः प्रत्यक्षत्वेऽपि स्थौल्यं नानुभूयतेत्यर्थः। दृश्यपरमाणुसमूहस्य नानादेशव्यापित्वं स्थौल्यमनुभूयत एवेति न विरोधः। स्थौल्यान्तरन्तु अनुभवबाधितमिति शङ्कते—नन्विति। बहूनां परमाणूनां स्थौल्यबुद्धिविषयत्वं चेत्तदा एकत्व-

न्यायलीलावतीप्रकाशः

इत्याह—केषां चिदेवेति। परमाणुमात्रस्यातीन्द्रियत्वे स्वरूपविशेषः साध्याव्यापकत्वान्नोपाधिरित्याह—अणुरूपस्येति। उक्तयुक्तिमेव

चेन्न, एक[ः?]स्थूल इत्यनुभवात् । एक इति विकल्पमात्रमिति चेन्न, अणूनां यथानुभवं निश्चयविषयत्वे अनेकतानिश्चयप्रसङ्गात् । अयथानुभवं(१) तु निश्चयविषयत्वे सर्वत्र प्रत्यक्षोपप्लवप्रसङ्गात्(२)। दीपशिखासन्ततावेकत्वनिश्चयवत् स्यादिति चेन्न, तत्र वि-

न्यायलीलावतीकण्ठाभरणम्

सामानाधिकरण्यं न प्रतीयेतेत्याह—नेति । अनुभवो वस्तुव्यवस्थापकस्तस्यैकप्रमाणत्वात् , विकल्पस्तु वस्त्वननुरोधी न प्रमाणमिति शङ्कते—एक इति । अयं सविकल्पकार्थो निश्चयो निर्विकल्पकानुगतस्तदननुगतो वा । आद्ये निश्चयोऽपि पारमार्थिकानेकत्वविषयः सार्थत्वे त्वेकत्वविषयः । द्वितीये सर्व्वसविकल्पकानाश्वास एव स्यादित्याह—अणूनामिति । नन्वनेकत्रापि एकत्वधीः प्रदीपसन्ततौ दृष्टा, तद्वदियमपि एकत्वधीः स्यादित्याह-दीपेति। परिमाणभेदेन तत्राश्रयभेदस्थितावेकत्वधीर्विरुद्धधर्म्माध्यस्तविषयेति सा भ्रान्ता प्रकृते विरुद्धाध्यासो नास्तीति परिहारमाह—नेति । न चैकत्वधीरसत्-

न्यायलीलावतीप्रकाशः

युक्त्यन्तराभिधानार्थमवतारयति—स्थूलेति । एक इति । नन्वेकः स्थूल इति ज्ञानमसत्ख्यातिः समूहव्यावृत्तस्यैकत्वस्य क्वाप्यसिद्धेः एको धान्यराशिरितिज्ञानवत् त्वयापि भ्रमरूपमेवेदं वाच्यम् , अवयवावयविसमूहस्यानेकत्वात् । अत्राहुः । तव समूहभिन्नज्ञान एव एकत्वमस्तीति नासत्ख्यातिः, बाधकस्य निराकरिष्यमाणत्वात् , मम चावयवावयविसमूहेऽप्येकोऽवयवी स्थूलोऽस्ति न त्वदभिमते परमाणाविति वैषम्यम् । 'यथानुभवं यथानिर्विकल्पकं 'निश्चयः' सविकल्पकं तस्यैव निर्व्विकल्पकव्यवस्थापकत्वादित्यर्थः । अनावृतवृत्तिरवयवी यद्यावृतवृत्तिः स्यादनावृतवृत्तिर्न्न स्यादित्यादयस्तर्का आश्रयासिद्धिविपर्ययापर्यवसानात् दुष्टा इति स्फुटतयोपेक्ष्यान्य-

न्यायलीलावतीप्रकाशविवृतिः

यद्यप्येक इति विकल्पमात्रमित्यग्रेतनमूलपरयमाशङ्का तथापि निर्विकल्पकानपेक्षमेवेदमसत्ख्यातिरूपं शशशृङ्गप्रतीतिवदित्यधुना शङ्काविषयः । ज्ञान इत्युपलक्षणमेकपरमाणावित्यपि द्रष्टव्यम् । एकत्वप्रसिद्धावपि विशिष्टस्यालीकत्वात् असत्ख्यातित्वं स्यादित्यत

(१) ०भवस्तु नि० । (२) प्रसङ्गः।

रुद्धधर्मसंसर्गात् । अत्र तु तद्विरहात् । अत्रा[प्या]वृता[वृतत्वा] नावृतत्वविरुद्धधर्मसंसर्ग इति चेन्न, अर्धावरणेऽप्यवयविनोऽनावृतैकरूपत्वात् । अनावृतैकस्वभावत्वे (१) अर्धावृते प्राग्वत् तत्स्थौल्योपलम्भ(२)प्रसङ्ग इति चेन्न, विचारासहत्वात् । स्थौल्यमवयविरूपं वा तद्धर्मरूपं वा । तत्राद्यं प्रतीयत

न्यायलीलावतीकण्ठाभरणम्

ख्यातिरेव पारमार्थिकस्यैकत्वस्य काप्यभावादिति वाच्यम्, विज्ञान एव एकत्वस्य पारमार्थिकत्वात् । प्रकृते विरुद्धधर्म्माध्यासं शङ्कते—अत्रापीति । अर्द्धावृतस्यैवावयविन आवृतत्वमनावृतत्वं च विरुद्धमित्यर्थः । आवृतादवयविनोऽनावृतोऽन्यस्तद्विरुद्धधर्म्मवत्त्वादित्यादावाश्रयासिद्धावपि समाधयन्तरमाह—अर्द्धेति । अवयवी तत्रोपलम्यमानत्वादनावृत एवान्यथा इन्द्रियसन्निकर्षविरहे तदुपलम्भ एव न स्यादित्यर्थः । एवं सति अनावरणदशायां यथा स्थौल्यमुपलब्धं तथाप्यावरणदशायामप्युपलभ्येतेत्याह—अनावृतेति । अवयविस्वरूपं यदि स्थौल्यं तदा इष्टापत्तिस्तद्धर्म्मोऽपि यदि परिमाणं तत्रापीष्टापत्तिर्महत्त्वविशेषश्चेत्तदा भूयोऽवयवच्छेदेनावयविसन्निकर्षस्य तद्व्यञ्जकतया तदभावादर्द्धावृतस्य स्थौल्यं नोपलभ्यत इत्याह—स्थौल्यमिति । अर्द्धावृतस्य महत्त्वरूपपरिमाणविशेषोपलम्भमापाद्य

न्यायलीलावतीप्रकाशः

दाह—अर्द्धावरणेऽपीति । अवयविनीन्द्रियसम्बद्धे तत्सम्बन्धाविच्छेदकघनद्रव्याभावादित्यर्थः । अवयविग्रहे यद्यवयवेन्द्रियसन्निकर्षो हेतुः स्यात् तदा परमाणुमात्रानन्तरितस्याप्यवयविनो ग्रहापत्तिरिति

न्यायलीलावतीप्रकाशविवृतिः

आह—बाधकस्येति । अवयविग्रह इति । यद्यपि द्वितीयविकल्पस्योपक्रान्तत्वादिदमयुक्तं तथाप्यवयविग्रह इत्युपलक्षणं तत्परिमाणग्रहे इत्यपि द्रष्टव्यम् । यद्यप्यर्द्धावृतेऽपि भूयोऽवयवेन्द्रियसन्निकर्षोऽस्त्येवान्यथा तत्रावयविग्रहोऽपि न स्यात् तथापि परिमाणग्रहे तद्वृत्तिसामान्यग्रहे वा यावदवयवसन्निकर्षो व्यञ्जकस्तदभावात्तदग्रह इत्यत्र तात्पर्यम् । परमाणुमात्रानन्तरितस्येति । परमाणुमात्रावच्छेदेनेन्द्रियसम्ब-

(१) ०करूपत्वे अ० । (२) स्थौल्यप्रतीतिप्र० ।

एव । द्वितीयं तु तत्परिमाणं परिमाणसामान्यविशेषो वा अभि-व्यञ्जकभूयोऽवयवेन्द्रियसन्निकर्षमोषान्न प्रतीयते, न त्ववयविन आवरणात् । अवयवि[स्व]रूपावभासेऽप्यनावरणदशावदर्धावरणेऽपि द्विहस्तत्रिहस्तत्वादिकं(१) प्रतीयेतेति चेन्न, द्विहस्तावच्छेद्यपरिमाणसमवायो वा तथाविधावयवसमवायो वा । अवयविनो द्विहस्तत्रिहस्तादि (२) धर्मभूतं न धर्मिमात्ररूपम् (३) ।

———

न्यायलीलावतीकण्ठाभरणम्

दीर्घत्वोपलम्भमापादयति पूर्व्वपक्षी—अवयवीति । अत्रापि पूर्व्ववत् समाधिमाह--नेति । वस्तुतो विशिष्टमहत्त्वदीर्घत्वग्रहे तत्रावरकद्रव्यसंयोग एव प्रतिबन्धकस्तेन भूयस्त्वं यावत्त्वं बहुत्वं वेति विक-

न्यायलीलावतीप्रकाशः

भूयस्त्वेन तद्विशेष्यमित्याह—भूयोऽवयवेति । ननु भूयस्त्वं यदि यावत्त्वं तदा व्यवहितकिञ्चिदवयवस्यापि अवयविनो न ग्रहः स्यात् बहुत्वमात्रस्य तत्त्वे नाना स्थाने परमाणुमात्रानन्तरितोऽप्यवयवी गृह्येत । अत्राहुः । तादृशावरकद्रव्यमेव तत्रावयविग्रहप्रतिबन्धकं कारणान्तरविलम्बेन कार्यानुत्पत्तौ कारणत्वस्याप्रत्यूहत्वात् । नन्वनावरणदशावत द्विहस्तत्वादिजातिमत्परिमाणविशिष्टस्यावयविनो ग्रहप्रसङ्ग इत्याह--अवयविरूपेति । पूर्व्वं स्थौल्यपदेन महत्त्वं परिमाणमुक्तमधुना दीर्घत्वमाह—द्विहस्तेति । अवयविग्रहे तत्परिमाणग्रहे च तद्गतजातिविशेषस्य तावदवयवग्रहव्यङ्ग्यतया तदभावादेवाग्रह इत्याह—द्विहस्तेति । नन्ववयवेषु कम्पमानेषु यद्यकम्पोऽवयवी तदा

न्यायलीलावतीप्रकाशविवृतिः

द्धस्यत्यर्थः । अवयविन इत्युपलक्षणं तत्परिमाणस्य चेत्यपि द्रष्टव्यम् । तादृशेति । यद्यपि सामग्रीवशादेव यत्र नानापरमाण्ववच्छेदेन संयोगस्तत्र प्रतिबन्धकाभावादवयविग्रहापत्तिस्तथापि नानापरमाण्ववच्छेदेन संयोगेन स्थूलावयवावच्छेदेनापि संयोगो विना प्रतिबन्धकमावश्यक इति भावः । वस्तुतः स्थूलावयवावच्छेन संयोगे हे-

---

(१) द्विहस्तत्वैकद० । (२) द्विहस्तादिकं ध० । (३) धर्म्मिस्वरूपम् ।

धर्मिप्रतीतावपि च धर्माणामप्रतीतिर्व्यञ्जकाभावादुपपत्स्यते । अस्तु तर्हि सकम्पत्वनिष्कम्पत्वमिति चेन्न, भागभागिनोर्भिन्न-सामग्र्यधीनकम्पत्वेन भागानां कम्पित्वेऽपि (१) भागिनो नि-ष्कम्पैकस्वभावत्वात् । चलाचलयोर्युतसिद्धिप्राप्तिरिति चेन्न, भेदो वा युतसिद्धिरसम्बन्धो वा । नाद्यः । इष्टत्वात् । न द्वितीयः । चलाचलत्वेऽपि नित्यसम्बन्धबलेनासम्बन्ध(२)विरोधात् ।

न्यायलीलावतीकण्ठाभरणम्

त्पादप्रकाशः । विरोधान्तरं शङ्कते—अस्त्विति । पाण्यवच्छेदेन शरीरं सकम्पं चरणावच्छेदेन निष्कम्पमनुभूयते तदेकत्वे न स्यात् । न हि कर्माप्यव्याप्यवृत्तीति भावः । तत्र शरीरं निष्कम्पं पाणिमात्रं सकम्पमिति नैकत्र द्वयमिति परिहरति—भागभागिनोरिति । एवं सत्यवयववायविनौ युतसिद्धौ स्याता-मित्याह—चलाचलयोरिति । इष्टत्वादिति । भागभागिनोर्भेदस्य मयाऽभ्यु-पगमादित्यर्थः । असम्बन्धश्चेदापाद्यते तत्र नित्यसम्बन्धविरह उपाधिरित्याह—चलाचलत्वेऽपीति । स्थाणुश्येनयोश्चलाचलयोरसम्बन्धो

न्यायलीलावतीप्रकाशः

र्किञ्चिदवयवावच्छेदेन तत्र कम्पो नोपलभ्येत । अथ स कम्पते त-दा प्रदेशान्तरेऽपि अकम्पो नोपलभ्येतेति अकम्पोऽपि स्वीकर्त्तव्य इति विरोध इत्याह--अस्त्विति । अवयविकम्पस्य सकलावयवकम्प-नियतत्वात् क्वचिदवयवकम्पेऽपि अवयवी निष्कम्प एवेत्याह—भागभा-गिनोरिति । न च संयोगवत्कर्माप्यव्याप्यवृत्ति भवत्विति वाच्यम् , अ-वयविनि यथोक्तेनैवोपपत्तेः अवयवेषु सकलावच्छेदेनैवोपलम्भात् । ननु वस्त्रोदकवत् चलाचलयोरवयवावयविनोर्युतसिद्ध्यापत्तिरित्याह—चलाचलयोरिति । परस्य गुणगुणिनोरभेदादेव न व्यभिचारः । नित्येति ।

न्यायलीलावतीप्रकाशविवृतिः

तुरित्यत्रैव तात्पर्यम् । प्रतिबन्धकाभावकारणत्वापेक्षयाऽवच्छेद-कमात्रकल्पनायां लाघवादिति । द्विहस्तेतिफक्किकालिखनानन्तरम-न्यविरूपेतिफक्किकाधारणं लिपिप्रमादात् । तटस्थः शङ्कते—न च संयोगेति । अवयविनीति । व्याप्यवृत्तिजातीयताविरोधादिति भावः ।

(१) कम्पितत्वेऽपि । (२) ०न्धवलेनैवासम्बन्धिवि० ।

अनित्यसम्बन्ध एव युतसिद्धिरिति चेन्न, चलाचलत्वस्य तेन प्रतिबन्धाभावात्। अत्र हि तेन व्यभिचारानुपलम्भो वा प्रतिबन्धनिश्चयहेतु (१) र्व्यभिचारे बाधकं वा। नाद्यः। भौमत्वस्य लौह (२) पाठ्यत्वेनैव व्यक्त्यन्तरे व्यभिचारानुपलम्भेऽपि (३) तच्छङ्कया नियमनिश्चयहेतुत्वाभावात्। नेतरः। तदसिद्धेः। अन्यथा चलाचलयोर्वस्त्रोदकवन्न भागभागिकल्पना-

न्यायलीलावतीकण्ठाभरणम्

नास्तीति व्यभिचारोऽपीति भावः। परमतेनैव उपपादयति—अनित्येति। यदि अवयवावयविनौ चलाचलौ स्यातां तदा अनित्यसम्बन्धवन्तौ स्यातां श्येनस्थाणुवदित्यर्थः। अत्र गुणगुणिभेदसिद्धौ तत्र व्यभिचार इत्याह—नेति। द्रव्यत्वेन विशेषणेऽपि मार्त्तण्डभूमण्डलाभ्यां व्यभिचार इति भावः। अनित्यसम्बन्धयोग्यता चेदापाद्या तत्राह—अत्र हीति। चलाचलयोरनित्यसम्बन्धयोग्यतापि यदि व्यभिचारानुपलम्भान्निश्चीयते तदा पार्थिवत्वलोहलेख्यत्वयोरपि तन्निश्चयः स्यादित्याह—भौमेति। व्यभिचारानुपलम्भस्य नियमनिश्चयहेतुत्वाभावादित्यर्थः। तदसिद्धेरिति। विपक्षबाधकतर्कासिद्धेरित्यर्थः। यदि सहचारदर्शनमात्राद्व्याप्तिनिश्चयस्तत्राह—अन्यथेति। त्व-

न्यायलीलावतीप्रकाशः

यद्यपि बाधस्तर्केऽनुगुण एव तथापि विद्यमानयोरसम्बन्धो साध्ये नित्यसम्बन्धाभाव उपाधिरित्युक्तं भवति। वस्तुतो गुणगुणिभेदसिद्धौ रूपादौ व्यभिचार इति भावः। अनित्येति। यद्यपि अनित्यसम्बन्धो बौद्धस्य स्वतोऽसिद्धस्तथापि पराभिमतनित्यसम्बन्धाभाव एव तेनाप्यापाद्यते तेन पूर्वोक्तोपाधौ साधनव्यापकत्वमुक्तं भवति। न चावयवी न निष्कम्पः संयोगविभागयोरेव कम्पत्वात् तयोश्च तत्र प्रत्यक्ष-

न्यायलीलावतीप्रकाशविवृतिः

तथापीति। इदमुपलक्षणं तर्कमूलव्याप्तिविरोधितया प्रकृते बाधोऽपि विगुण एवेत्यपि द्रष्टव्यम्। ननु नित्यसम्बन्धोऽपि परस्याप्रसिद्ध एवेत्यत आह—पराभिमतेति। तथा चासत्ख्यात्युपनीत एव

(१) यहेतुर्वा व्य०। (२) लोहपा०। (३) ०रानिश्चयेऽपि।

गोचरत्वमपि स्यात्। आक्रान्तदेशविभागेऽपरदेशावष्टम्भः कम्पो भागिनि प्रत्यक्षसिद्धः, पाणौ भागान्तरे [तु]नैवमिति चेन्न, [अत्र?] आक्रान्तदेशभेदेनैव केनचिदसंयोगेऽपि केनचित् संयोगोपपत्तेः (१)। अस्तु तर्हि महारजनसंयोगासंयोगौ विरोध इति चेन्न, विकल्पानुपपत्तेः। किं यस्य संयोगसमवायित्वं तस्य तदभावसमवायित्वं विरुध्यते, अथ यस्य संयोगजनकत्वं तस्याभाव(२)जनकत्वं, उतैकस्य संयोगतदभावावच्छेदकत्वं, उभयावच्छे-

न्यायलीलावतीकण्ठाभरणम्

न्मते चलाचलत्वाद्भस्त्रोदकयोर्नावयवावयविभावकल्पनेति तन्तुपटयोरपि तथा स्यात्तथा च सहचारदर्शनमप्रयोजकमिति भावः। ननु कम्पो न संयोगविभागाभ्यामन्यस्तौ चलाचलौ पाण्यवच्छिन्ने भागिन्यनुभूयेते न तु भागान्तरावच्छिन्ने भागिनि चरणाद्यवच्छिन्ने शरीर इत्याह—आक्रान्तेति। संयुक्तदेशविभागे सतीत्यर्थः। संयोगविभागौ त्वया नाभ्युपगम्येते एव, तदभ्युपगमेऽपि न विरोधो देशावच्छेदभेदेनैव एकस्य तदुभयोपपत्तेरित्याह—अत्रेति। रक्तारक्तविरोधस्त्वया महारजनसंयोगासंयोगाभ्यां समाधेयस्तथा च स एव दुःसमाधेयो न ह्येकस्यैव पटस्य महारजनेन सह संयोगस्तदभावश्च सम्भवतीत्याह—अस्तु तर्हीति। एवं संयोगतदभावयोः समवायि न भवति तदुभयजनकं वा न भवति तदुभयावच्छेदकं वा न भवति तदुभ-

न्यायलीलावतीप्रकाशः

त्वादित्याह—आक्रान्तेति। 'पाणौ' पाणिस्थे। 'भागान्तरे' भागान्तरस्थे भागिनीत्यर्थः। आक्रान्तदेशभूतलादिभेदेन एकस्मिन् केनचित्संयोगेऽपि केनचित्तदभावो न विरुद्ध इत्याह—आक्रान्तदेशभेदेनेति। एकत्र संयोगतदभावयोश्चाविरोधं वक्ष्याम इति भावः। विरोध इति। विरुध्य

न्यायलीलावतीप्रकाशविवृतिः

प्रतियोगीति हृदयम्। एकत्रेति। एकप्रतियोगिकयोरपीत्यध्याहार्यम्। एवं चैकप्रतियोगिकयोरेव चेन्न विरोधस्तदा सुतरां भिन्नप्रतियोगिकयोरिति भावः। संयोगतदभावाद्यंशे सिद्धसाधनमत आह—

(१) केनचिद् संयोगेऽपि केनचिदस०। (२) तस्य तदभावज०।

द्यत्वं वा । नाद्यौ । असिद्धेः । न तृतीयः । महारजनस्यैक-स्योभयावच्छेदकत्वात् । न तुरीयः । ज्ञानस्यैवोभयावच्छेद्य-त्वात् । किञ्चिदेव केनचिन्निरूप्यते स्वरूपनियमादिति चेत्तु-ल्यम् । (यदि) भावाभावावेकेनैव निरूप्येते सर्वेषामेव भावा-भावानामेकदेशनिरूप्यत्वं भवेदिति चेन्न, भावाभाववैचित्र्या-

न्यायलीलावतीकण्ठाभरणम्

यावच्छेद्यं वा न भवतीति विकल्पार्थः । नाद्याविति । संयोगात्यन्ता-भावस्य समवेतत्वजन्यत्वयोरनभ्युपगमात् । महारजनस्येति । महारजनं हि संयोगं साक्षादवच्छिनत्ति संयोगद्वारा च तदभावमपीत्यर्थः । संयोगतदभावाविहेति समूहालम्बनज्ञानमुभयावच्छेद्यमेवेत्याह—ज्ञानस्येति । ज्ञानं विषयी धर्म्मः, स च उभाभ्यां विरुद्धाभ्यामप्यव-च्छेत्तुं शक्यः, न त्वेकः पटो महारजनतत्संयोगाभ्यामित्याह—किं चिदेवेति । अनुभवो ह्यत्र नियामकः, स च यथा ज्ञाने तथा संयो-गतदभाववद्धर्म्मिण्यपि पटादावित्याह—तुल्यमिति । संयोगस्य स्वा-भावसामानाधिकरण्यं तथा रूपरसादेरपि स्यादिति शङ्कते—सर्वेषा-मिति । न ह्येकं वस्तु यथा तथाऽन्यदपीति नियमस्तथा सति जगद्वै-चित्र्यमुच्छिद्येतेत्याह—नेति ।

न्यायलीलावतीप्रकाशः

तेऽनेनेति विरोधो विरुद्धधर्माध्यासः । 'अवच्छेदकत्वं' विशेषणत्वम् । 'उभयं' संयोगस्तदभावश्च । 'अवच्छेद्यत्वं' विशेष्यत्वम् । असिद्धेरिति । अ-भावस्य समवायनिषेधात् संयोगात्यन्ताभावस्याजन्यत्वादित्यर्थः । ज्ञानस्येति । संयोगतदभावविषयस्येत्यर्थः । भवतु ज्ञानस्योभयनिरूप्य-त्वं न त्वर्थान्तरस्येत्याह—किञ्चिदेवेति । तुल्यमिति । दर्शनस्योभयत्राविशे-षादित्यर्थः । एकेनेति । आश्रयेणेत्यर्थः । कुतो विशेषात संयोगात्यन्ता-भावः प्रतियोगिसमानाश्रयो न रूपाद्यत्यन्ताभाव इत्याह—सर्वेषामिति । रूपाद्यभावानामित्यर्थः । अभावत्वाविशेषेऽपि यथा कश्चिदन्योन्याभावः कश्चित्संसर्गाभावः, तथा प्रतियोगिभेदादेवात्रापि व्यवस्थेत्याह—वैचित्र्यादिति ।

न्यायलीलावतीप्रकाशविवृतिः

रूपाद्यभावानामिति । रूपादितदभावानामित्यर्थः । गङ्गाजलादौ शुक्ल-

दिति मूकीभव। (इति) पृथिवी।

शुक्लमेव रूपमपामिति न सङ्गच्छते, नीलिमादेरप्युपलम्भात्। औपाधिकं तच्चन्द्रमसीव शैत्यमिति चेन्न, बाधकाभावात्। अन्यथा धर्मधर्मिव्यवहारविरहापत्तेः। वियति विक्षिप्तानामेव कालिन्दीजलानां धवलिमप्रतीतिर्बाधिका इति चेन्न, तत्रापि तेजस एव धवलिम्न उपाधिभावसम्भवात्।

न्यायलीलावतीकण्ठाभरणम्

भाष्यकारीयोद्देशक्रमानुरोधेन पृथिवीं निरूप्य जलं निरूपयति–शुक्लमेवेति। अभास्वरशुक्लमात्ररूपसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमपीतरभेदसाधकमित्यर्थः। नीलिमादेरिति। कालिन्दीजलादाविति शेषः। औपाधिकमिति। पार्थिवौपाधिकमित्यर्थः। श्वैत्यं वास्तवं नैल्यमौपाधिकमिति न विनिगमकमित्याह—बाधकाभावादिति। नियामकमन्तरेणापि तदौपाधिकत्वं वाच्यं तत्राह—अन्यथेति। भूमिष्ठमेव जलं नीलमनुभूयते न त्वाकाशस्थमपीत्युपाधिरेव स्फुट इत्याह—वियतीति। वियन्निष्ठजलश्वैत्यमेवौपाधिकं स्यात् तत्रापि तेजस उपाधेः सम्भवादित्याह—नेति। यद्यपि अन्यगततया भासमानधर्माश्रय उपाधिर्जवाकुसुमादिस्तथाप्यत्र धर्म्म एवोपाधिरुक्तः।

न्यायलीलावतीप्रकाशः

नीलिमादेरिति। कालिन्दीजलादाविति शेषः। औपाधिकमिति। संसृष्टपृथिवीश्यामत्वौपाधिकमित्यर्थः। चन्द्रमसीवेति। यद्यपि(१) चन्द्रकराणामनुद्भूतस्पर्शतया शैत्यं नानुभूयते तथाप्यागमाच्चन्द्रमण्डले शैत्यं प्रतीयत इति भावः। तेजस इति। यद्यपि यद्धर्मोऽन्य-

न्यायलीलावतीप्रकाशविवृतिः

स्यैवोपलम्भादाह—कालिन्दीति। संसृष्टेति। मूलानुसारितया श्यामतोपाधिरुक्ता वस्तुतो पृथिव्येवोपाधिरिति ध्येयम्। एकत्र कारणाभि-

---

(१) असन्निकृष्टे चन्द्रमसि शैत्यप्रत्यक्षासम्भवेनापि प्रभाणां शैत्येन शैत्यमनुमातव्यम्, प्रभावतः प्रभासजातीयस्पर्शवत्त्वात्। चन्दमःपदं वा चन्द्रप्रभापरं वाच्यम्। क्वचिच्च मूले चन्द्रमहसीत्येव पाठः। तत्राह—यद्यपीति। इति दीधितिः। नयनेन प्रकारान्तरेण वोपस्थिते किरणे त्वचा शैत्यारोपो वायाविवेत्यपि वदन्ति।

नीलिमापि तर्हि प्रतीयेत, घटादाविव तेजोमध्यवर्तिनीति चेन्न, पित्ताभिभूततेजसः श्वैत्यवन्नीलिम्नोऽप्यप्रतीतेरुपपत्तेः । स्फटिकादिवद्वा ।

नापि मधुर एव रसो, नियामकाभावात् । तिक्ता-

न्यायलीलावतीकण्ठाभरणम्

वास्तवश्चेत् नीलिमैव जले तदा सोऽपि वियति प्रतीयते । न हि तेजोरूपेण नीलिम्नोऽभिभवो नीले घटादौ दृश्यते इत्याह--नीलिमापीति । ग्राहकदोषादपि तदा नीलिमोपलभ्यते इति स्यादित्याह--पित्तेति । यथा पित्ताभिभूतनायनतेजसा पुरुषेण तेजःश्वैत्यं वास्तवमपि नोपलभ्यते, तथा नीलिमापि कुतश्चित् करणदोषान्नोपलभ्यत इत्यर्थः । ग्राहकदोषमभिधाय ग्राह्यगतमाह—स्फटिकादीति ।

अपां मधुर एव रस इत्याक्षिपति—नापीति । नियामकेति । मधुरं जलमिति लौकिकप्रतीत्यभावादित्यर्थः । ननु रसवत्त्वे सति तिक्तादिसत्तयाऽनुपलभ्यमानत्वादेव माधुर्यं स्यादित्याह—तिक्तादीति । तर्हि वैपरीत्ये

न्यायलीलावतीप्रकाशः

निष्ठतयाऽवभासते स उपाधिः, यथा जपाकुसुमं स्फटिक इति तेज एवोपाधिः, तथापि योऽन्यधर्मोऽन्यगतत्वेन भासते स उपाधिरिति मतमाश्रित्य धवलिमैवोपाधिरुक्तः । घटादाविति । नीलिमवतीति शेषः । विचित्रस्वभावत्वाद्वस्तूनां क्वचिदनभिभवेऽपि क्वचिदभिभवः(१) स्यादित्याह—पित्तेति । स्फटिकेति । जवाकुसुमसन्निधौ स्फटिकश्वैत्याभिभववत्, अत्रापि नीलिमाभिभव इत्यर्थः । दोषाणां करणगतत्वविषयगतत्वभेदेन प्रकारद्वयमुक्तम । नियामकेति । जले रसो नानुभूयत एव । यदि च शर्करावन्माधुर्याननुभवेऽपि तिक्तादिवैलक्षण्यान्माधुर्यं तदा शर्करामाधुर्यवैधर्म्यात्तिक्तत्वमेव रसस्य किं न स्यादित्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

भवादन्यत्र विषयाभिभवाद् दृष्टान्तदार्ष्टान्तिकवैषम्यादभिभवकाचित्कतामात्रेण दृष्टान्ततेत्याशयेनाह--विचित्रेति । ननु यस्यामेवोल्ब-

(१) "अभिभवश्च नाम मन्दस्य पटीयसो ग्रहणादग्रहण"मिति न्यायवार्त्तिकम् (२।२।१।४) । "अभिभवश्च बलवत्सजातीयसम्बन्ध" इति तत्त्वचिन्तामणौ प्रत्यक्षखण्डम् (७४५ पृ०)

दिविलक्षणवेदनमेव माधुर्यवेदनमिति चेन्न, मधुरत्वा(१)दि-विपरीत(२)वेदनमेव हि तिक्तादिवेदनमित्यपि तुल्यत्वात् । क्वचिदुल्बणतापि स्यादिति चेत् , तुल्यं मधुरतायामपि । षड्-विपरीतवेदनेऽरसत्वमेव स्यादिति चेन्न, अनुष्णाशीतस्पर्शव-त्सप्तमेनाप्युपपत्तेः । जम्बीरकरवीररसादावम्लतिक्तवेदनाच्च ।

न्यायलीलावतीकण्ठाभरणम्

किमुत्तरमित्याह--मधुरादीति । क्वचिदिति । जलत्वस्य तिक्तरससमानाधि-करणत्वे स्फुटतरतिक्तरससामानाधिकरण्यं स्यादित्यर्थः । ननु तिक्ता-दिकं तावन्नोपलभ्यत इत्युभयसिद्धं माधुर्य्यमपि जले यदि न स्यात्तदा नीरसमेव तत् स्यादित्याह—षडिति । यथा शीतोष्णस्पर्शयोरनुपलम्भे-ऽपि अनुष्णाशीतस्पर्शवती पृथिवी तथा माधुर्य्यादीनामपि अनुप-लम्भेऽपि जलं विलक्षणरसवदेव स्यादित्याह--नेति । मधुररसवत्त्वे तिक्तादिविलक्षणवेदनस्य हेतावसिद्धिमाह--जम्बीरेति । यद्वा क्वचि-दुल्बणतापि स्यादित्यत्र इष्टापत्तिमाह--जम्बीरेति । यज्जातीयं क्वचित् यदभाववत्तज्जातीयं सर्व्वमेव यदि तदभाववत्तदा दोषमाह—

न्यायलीलावतीप्रकाशः

क्वचिदिति । जलत्वं यदि तिक्तरससमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्य-जातिः स्यात् , उल्बण(३)तिक्तरससमानाधिकरणं स्यादित्यर्थः । अनुष्णाशीतेति । आतिरेक्यमात्रे दृष्टान्तः, न तु सप्तमत्वेऽपि तात्पर्यम् ।

न्यायलीलावतीप्रकाशविवृतिः

णतिक्तरसस्तस्यामेवोल्बणतिक्तरसवत्त्वमापाद्यं तज्जातीयायां वा । आद्येऽसम्भव एव । अन्त्ये सत्तामादाय सिद्धसाधनमत आह-- जलत्वमिति । आत्मत्वे व्यभिचार इति समानाधिकरणान्तम् । तत्रापि स्वमते जलत्वे व्यभिचार इति तिक्तपदम् । रसपदं स्फुटार्थम् । अनु-ल्बणतिक्तरसवन्मात्रवृत्तिजातौ व्यभिचार इति साक्षात्पदम् । अनु-ल्बणतिक्तरसवदात्मान्यतरत्वे व्यभिचार इति जातिपदम् । इदं चापादनं स्वमतावष्टम्भेनान्यथा तन्मते करवीररसादिवृत्तित्वेनेष्टा-पत्तेरित्यवधेयम् । आपादकं पूरयति--यदीति । वायौ व्यभिचारान्न

---

(१) मधुरादिवि० । (२) विलक्षणवे० । (३) "स्पष्टं स्फुटमव्यक्तमुल्बण" मित्यमरः ।

स्वाश्रयप्रत्यासत्त्या तदुपलम्भ इति चेत् (१), आप्यत्वे बाधकाभावात् । अन्यत्र तद्विरहेणैवापामुपलम्भादिति चेन्न, पृथिव्या अपि मधुरताया आप्यत्वापत्तेः । अन्यत्र तद्विरहेणैव क्षितेरुपलम्भात् । स्नेहवत् ।

नापि शीत एव स्पर्शः । मध्यन्दिने जलस्यौष्ण्यस्योपलम्भात् । तैजसं तदौष्ण्यमिति चेन्न, रूपाध्यक्षताव्याप्यत्वात्(२) स्पर्शप्रत्यक्षतायाः(३) । वारिस्थतेजोरूपं

न्यायलीलावतीकण्ठाभरणम्

पृथिव्या अपीति । स्नेहवदिति । **स्नेहविनाकृता घटादिरूपा पृथिवीति यथा घृतादौ स्नेह औपाधिक इत्यर्थः ।**

तैजसमिति । **अनुद्भूतरूपोद्भूतस्पर्शं वारिस्थं यत्तेजस्तदौपाधिकमित्यर्थः ।** स्पर्शाध्यक्षताया इति । **तेजःस्पर्शाध्यक्षताया इत्यर्थः ।**

न्यायलीलावतीप्रकाशः

स्वाश्रयेति । **संयुक्ताम्लादिरसाश्रयपार्थिवौपाधिकी तत्प्रतीतिरित्यर्थः ।** तद्विरहेणेति । **अम्लादिव्यतिरेकेणेत्यर्थः । यज्जातीयं यद्व्यतिरेकेणोपलभ्यते तज्जातीयस्य तद्वत्त्वं यद्यौपाधिकं तदायं दोष इत्याह—** पृथिव्या अपीति । स्नेहवदिति । **तैलादिस्नेहवदित्यर्थः । एतच्च सिद्धान्तिमतमाश्रित्योक्तं 'घृतेऽपि दर्शना'दित्यनेनाग्रे स्नेहस्यापि पार्थिवत्वेनाक्षेप्यत्वात् ।**

अनुद्भूतरूपोद्भूतस्पर्शं वारिस्थं तेजस्तदीयः स्पर्शो वारिस्थत्वेनानुभूयत इत्याह—तैजसमिति । रूपाध्यक्षत्वेति । **एतच्च शीतोष्ण(४)भिन्नस्पर्शस्याभावात् निःस्पर्शो वायुरिति मतमाश्रित्योक्तम् ।**

न्यायलीलावतीप्रकाशविवृतिः

मूलोक्तव्याप्तिः सङ्कुचत्यत आह--एतच्चेति । आदिरिति । **प्रथमभाग**

---

(१)ति चेन्न, (२) ‍ध्यातत्वात् ।

(३) स्पर्शाध्यक्षताया इत्यपि पाठः । तेजसप्रत्यक्षस्पर्शस्य प्रत्यक्षरूपव्याप्यत्वादित्यर्थः ।

(४) शीतोष्णेति पाकजजातिरसाप्युपलक्षणम् ।

प्रत्यक्षमिति चेन्न, तिमिरे उष्णोदकचाक्षुषतापत्तेः । तदा कचित्स्वभावतोऽप्युष्णतोपलभ्येतेति चेन्न, कनकादिद्रवत्ववत् नैमित्तिकत्वेनाप्युपपत्तेः । रूपस्य तेजःसंयोगाजन्यत्वे कथं स्पर्शस्येति चेन्न, रूपस्य तादृशत्वे द्रवत्वेऽपि तुल्यत्वात् ।

नापि स्वाभाविकं द्रवत्वम् । करकादावभावात् । अस्त्येव त-

न्यायलीलावतीकण्ठाभरणम्

उष्मा च न तेज इति भावः । तिमिर इति । उद्भूतरूपस्य तेजसो नयनसहकारित्वसम्भवादित्यर्थः । तदेति । यदि स्वाभाविकमौष्ण्यं जले स्यादित्यर्थः । कनकेति । निमित्ताधीनोत्पत्तिकतया निमित्तकादाचित्कत्वात् स्पर्शोत्पत्तेश्च कादाचित्कत्वमित्यर्थः । ननु यत्र रूपं तेजःसंयोगजन्यं तत्रैव स्पर्शोऽपि तथा, पृथिव्यां तथा दर्शनादिति कथं जलस्य स्पर्शमात्रं तेजःसंयोगजन्यं स्यादित्याह—रूपस्येति । कथं स्पर्शस्येति । तेजःसंयोगजन्यत्वमिति शेषः । तर्हि रूपं सुवर्णे न तेजःसंयोगजन्यमिति द्रवत्वमपि तादृशं न स्यादित्याह--रूपस्येति । करकादा-

न्यायलीलावतीप्रकाशः

यद्वा तैजसत्वेन विशेषणीयम् । तदेति । यदि स्वाभाविकमौष्ण्यमित्यादिः । 'स्वभावतः' तेजःसम्बन्धं विनेत्यर्थः । यथा कनकघृतद्रवत्वं तेजःसम्बन्धं विनाऽनुपपद्यमानमपि स्वाभाविकं तथा जलस्यौष्ण्यमपीत्याह—कनकादीति । स्पर्शपाकजत्वं समानाधिकरणरूपपाकजत्वव्याप्त(१)मित्याह--रूपस्येति । विपक्षे बाधकाभावेन प्रतिवन्दीमाह--रूपस्येति । 'तादृशत्वे' पाकजत्वे । एवं कनकरूपस्यापाकजत्वे द्रवत्वमपि तथा स्यादित्यर्थः । किं च श्रीखण्डेपि शीतस्पर्श उपलभ्यते । न चाघृष्टस्यानुष्णाशीतत्वानुभवादपामेव स इति वाच्यम्, जलसंयो-

न्यायलीलावतीप्रकाशविवृतिः

इत्यर्थः । समानाधिकरणेति । अत्र समानाधिकरणपदं स्फुटार्थं व्याप्यपदेनैव तल्लाभात् । यद्वा व्याप्यपदं कालिकव्याप्त्याश्रयपरमिति सामानाधिकरण्यलाभायैतत्पदम् । अपीति । अत इत्यर्थः ।

---

(१) पाकजरूपसामानाधिकरण्यव्याप्तमित्यर्थः । पाकजस्पर्शः पाकजरूपव्याप्त इति तु फलितार्थः । इति दीधितिः ।

त्रापि परं तत्प्रतिबद्धमिति चेन्न, घृतादावपि तुल्यत्वात्। तैलेऽपि सत्त्वाच्च। तत्राप्यमेव द्रवत्वमिति चेन्न, तत्रापूसम्बन्धे(१) तैलस्य दहनप्रतिकूलतापत्तेः। उपष्टम्भकमाहात्म्यान्नैवमिति चेन्न, तप्ततपनीयद्रवत्वेऽपि(२) पार्थिवतापत्तेः। उक्तयुक्तेरेवाग्निसंयोगाविनाश्यतापत्तेः(३)। यद्‌यद्विरुद्धं तत्तत्कथं तदनुकूलं स्यादिति चेत्तुल्यम्।

नापि स्नेहोऽपामेव घृतेऽपि दर्शनात्। आप्यभागस्य

न्यायलीलावतीकण्ठाभरणम्

विति। तथानुपलम्भादिति भावः। घृतादाविति। घृतेऽपि सांसिद्धिकमेव द्रवत्वं काठिन्यदशायान्तु प्रतिबद्धमित्यपि वक्तुं सुकरमित्यर्थः। सांसिद्धिकद्रवत्ववत्त्वस्य जललक्षणस्यातिव्याप्तिमाह—तैलेऽपीति। जलसम्बन्धौपाधिकं तादित्याह—तत्रेति। तैलं यदि जलसम्बद्धं स्यात्तदा तैलादग्निनाशः स्याद्विपरीत्यमेव दृष्टमित्याह—तत्रेति। ननु तैलभागस्य पार्थिवस्यायं महिमा यत् तत्सम्बद्धं जलं न दहनप्रतिबन्धकमित्याह—उपष्टम्भकेति। एवं तर्हि सुवर्णद्रवत्वमपि पार्थिवं स्यादग्निसंयोगानाश्यत्वमपि तस्योपष्टम्भकमाहात्म्यादेव स्यादित्याह—तप्तेति। 'उक्तयुक्ति'रुपष्टम्भकमाहात्म्यम्। उपष्टम्भकसन्निकर्षादपि न दहनप्रतिकूलमेव स्यादित्याह—यदिति। तर्हि द्रवत्वमपि नाग्निसंयोगनाश्यमेव स्यादित्याह—तुल्यमिति।

स्नेहवत्त्वं जललक्षणमाक्षिपति—नापि स्नेह इति। घृतेऽतिव्याप्तिमाह—घृतेऽपीति। घृते स्नेहस्य जलौपाधिकत्वमाह—आप्येति।

न्यायलीलावतीप्रकाशः

गस्यैव शीतस्पर्शोत्पादकत्वे विरोधाभावात्। अन्यथा घर्षकजलापेक्षया घृष्टस्य शीततरत्वानुपपत्तेरिति भावः। तैलेऽपीति। पार्थिवेऽपि तैले स्वाभाविकं द्रवत्वमिति न तल्लक्षणमित्यर्थः। तत्रेति। जलद्रवत्वस्य तथात्वादित्यर्थः। ननु पार्थिवं द्रवत्वमग्निसंयोगनाश्यमिति न तत्तथेत्यत आह—उक्तयुक्तेरिति। उपष्टम्भकमाहात्म्यादित्यर्थः। तुल्यमिति। यदग्निसंयोगनाश्यं तत्कथमग्निसंयोगानाश्यं स्यादिति तपनीयद्रवत्वेऽपि तुल्यमित्यर्थः। आप्यभागस्येति। संयुक्तसमवायात्तत्र

---

(१) तत्राप्यसम्बन्धे। (२) द्रवत्वस्यापि। (३) श्यत्वोपपत्तेः।

स इति चेन्न, द्रवत्वस्यापि तथात्वप्रसङ्गात् । क्षितिपयसो-रभेदे गन्धानुपलम्भो बाधक इति चेन्न, नियतावान्तरजाति-वृत्तित्वेनाप्युपपत्तेः । अभेदः कथमिति चेन्न, भेदप्रतिपादक-

---

न्यायलीलावतीकण्ठाभरणम्

नेति । यदि जलं पृथिव्यभिन्नं स्यात्तदा जलेऽपि गन्ध उपलभ्यते, न चोपलभ्यते तस्माज्जलं न पृथिवीत्याह—क्षितीति । यथा पृथिवीत्वे सत्यपि नैमित्तिकं द्रवत्वं घृतादावेव न घटादौ, तथा पृथिव्यन्तरवि-शेषे चम्पकादावेव गन्धो न जलेऽपीति त्वदुक्ततर्कमूलव्याप्तौ विप-क्षबाधकाभाव इत्याह—नियतेति । ननु गन्धवत्त्वेनाभेदः स्यात् तच्चे-ज्जले त्वया नेष्यते तदा त्वदभिमतस्तयोरभेदो न स्यादित्याह—अभेद इति । भेदप्रतिपादकेति । जलत्वस्यानुगतस्य करकादिसाधारण्याभावात् । स्नेहसमवायिकारणतावच्छेदकत्वस्य घृतादिसाधारण्यात् स्नेहत्व-स्य कार्य्याकार्य्यवृत्तितया कार्य्यतानवच्छेदकत्वात् अनित्यस्नेहत्व-स्य तथात्वेन तत्समवायिकारणतावच्छेदकतया अवयविनि जा-तिसिद्धौ परमाणुः स्वोपादेयवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमानिति

न्यायलीलावतीप्रकाशः

स्नेहोपलब्धिरित्यर्थः समवाये बाधके सत्येव तथात्वमित्यभिप्रेत्याह—द्रवत्वस्येति । ननु किञ्चिद्भेदसाधनदूषणेऽपि साधनान्तराद्भेदः स्यादित्याह—क्षितीति । यथा पृथिवीविशेषे सौरभं न तन्मात्रे तथा गन्धोऽपि स्यादित्याह—नियतेति । भेदप्रतिपादकेति। जलत्वजातेरप्यभावात् करकासाधारणानुगतमतेरभावात् । न च विलयनदशायां तत्रापि तत्प्रतीतिः, विलीनस्य करकातो द्रव्यान्तरत्वात् । न च शीतस्प-

न्यायलीलावतीप्रकाशविवृतिः

यथा पृथिवीति । यद्यप्येवमपि गन्धनियामकजातिस्वीकारे (१)तेनैवेतर-भेदरक्षा भवत्येव तथापि जलादिभिन्नस्यैव कस्यचिन्निर्गन्धत्वे गन्धनियामकजात्या विभागे आधिक्यं स्यादिति (त?)या विभागो न(कर?)रणीयस्तथा सतीदमुक्त(२)मिति ध्येयम् । ननु जलत्वं जातिरेवेतरभेदसाधिकास्तु इत्यत आह—जलत्वेति । तत्रापीति ।

---

(१) 'रे तेनैव विभागे इतरत्वरक्षाभ'। (२) 'तीदमयुक्तमि'।

मानाभावादिति मूकीभव । जलमेतन्न पृथिवीति चेन्न, घृतमेतन्न पृथिवीत्यत्रापि तुल्यत्वात् । मैवम् । शुक्लमेव रूपमभास्वरमपां

न्यायलीलावतीकण्ठाभरणम्

साधारणी जातिरिति चेन्न, जलपरमाणोः पक्षत्वे तत्र जलत्वस्यैवाभावात् । परमाणुमात्रपक्षत्वे मनसि भागबाधात् । स्नेहवन्मात्रवृत्तिसंयोगासमवायिकारणता च स्पर्शवन्मात्रवृत्तिसंयोगासमवायिकारणतावदतिप्रसक्ता । अन्यथा चतुष्टयसाधारणी एका जातिः स्यादिति भावः । शुक्लमेवेति । औष्ण्यासमानाधिकरणशुक्लमात्ररूपसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं नीलासमानाधिकरणभास्वरशुक्लरूपसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा जलत्वमित्यर्थः । तथा च स्फटिकादावतिव्याप्तिः । कालिन्दीजलादौ नैल्यमेव

न्यायलीलावतीप्रकाशः

र्शात् तत्र जलत्वानुमानं सांसिद्धिकद्रवत्वाभावेन तत्प्रतिरोधात् । नापि(१) स्नेहसमवायिकारणत्वावच्छेदकत्वाज्जलावयविनि तत्सिद्धौ जलपरमाणौ स्वोपादेयवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमनुमेयं स्नेहत्वस्य कार्याकार्यवृत्तितया कार्यतानवच्छेदकत्वात् । नापि स्नेहवन्मात्रवृत्तिसंयोगसमवायिकारणतया तत्सिद्धिः, स्पर्शवन्मात्रवृत्तिसंयोगसमवायिकारणतयापि जात्यापत्तेरिति भावः । शुक्लमेवेति । न च स्फटिकेऽतिव्याप्तिः(२) अपाकजत्वेन विशेषणेऽपि पार्थिवावयविनि व्यभिचार इति वाच्यम्, अभास्वरशुक्लरूपभिन्नरूपसमानाधिकरणद्रव्यत्वव्याप्यजात्यनाधारत्वे सति रूपवत्त्वस्य विवक्षित-

न्यायलीलावतीप्रकाशविवृतिः

करकायामपीत्यर्थः । स्नेहत्वस्येति । न चानित्यस्नेहत्वं तथास्त्विति वाच्यम्, एवमपि परमाणुसाधारण्यायास्तस्या असिद्धेः तस्य नित्यत्वे योग (ग्य ?) त्वे फलोपधानावश्यम्भावापत्तेरिति भावः । अभास्वरेति । तेजस्यतिव्याप्तिवारणाय प्रथमविशेषणम् । पृथिव्याम-

---

(१) परमाणुवृत्तित्वं निराकरोति —नापीत्यादिना । आरम्भकत्वादनुमेयम् । वस्तुतः क्षितिपयसोर्भेदासिद्धौ घृतत्वादिरिव जलत्वस्यापि न द्रव्यत्वसाक्षाद्व्याप्यत्वसिद्धिः । अतएव प्रत्यक्षस्य जलत्वस्य जन्यवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वेन न परमाणुवृत्तित्वानुमानमिति ध्येयम् । इति दीधितिः ।

(२) स्फटिकपरमाणावतिव्याप्तिः । इत्यपि पाठः ।

लक्षणमिति । न च तेजसा नीलिमाभिभवः । घटादावभावात् । न च स्वाच्छयोगात् स्फटिकवदिति वाच्यम्, इन्द्रनीलादावभावात्। रसोऽपि मधुर एव । काषाय(१)द्रव्येण जलमाधुर्यस्योपलम्भा-

---

न्यायलीलावतीकण्ठाभरणम्

प्राकृतं रूपं तच्च वियति विक्षिप्ततेजोरूपाभिभूतमिति यत् परेणोक्तं तत् दूषयति—न चेति । एवं सति घटनैल्यमपि तेजोरूपेणाभिभूयेतेत्यर्थः । स्वच्छस्यैव द्रव्यस्य तेजोरूपेण रूपमभिभूयते न तु घटादेरपीति शङ्कते—न चेति । इन्द्रनीलेति । सूर्य्यालोकानभिभाव्यतायामस्वच्छत्वमुपाधिरिन्द्रनीलरूपे साध्याव्यापक इत्यर्थः । एवं च प्रदीपप्रभयोत्पलनैल्याभिभवेऽपि न दोषः। रसोऽपीति । तिक्तरसासमानाधिकरणमधुररस-

न्यायलीलावतीप्रकाशः

त्वात् । व्योमक्षिप्तकालिन्दीजलनीलिम्नस्तेजोरूपेणाभिभव इति दूषयति—न चेति । अत्र सूर्यालोकेन नीलरूपं नाभिभूयत इति विशिष्य व्याप्तिः, प्रदीपप्रभया नीलोत्पलनीलिम्नोऽभिभवात्सामान्यतो व्यभिचारात् । न च विशेषव्याप्तावप्यस्वच्छत्वमुपाधिः साध्याव्यापकत्वादित्याह—न चेति । रसोऽपीति । न च शर्करायां व्यभिचारः अपाकजत्वेन पूर्ववद्विशेषणत्वादिति वाच्यम्, मधुररसभिन्नरसस-

न्यायलीलावतीप्रकाशविवृतिः

तिव्याप्तिवारणाय शुक्लेति । रसादिकमादाय जलेऽसम्भववारणाय भिन्नपदोत्तररूपपदम् । द्रव्यत्वमादाय तद्वारणाय द्रव्यत्वव्याप्येति । पृथिवीजलान्यतरत्वमादाय तद्वारणाय जातीति । प्रदीपेति । न च प्रदीपस्याव्यञ्जकत्वमात्रं न त्वभिभावकत्वं 'प्रदीपैर्व्यज्यते जातिर्न तु नीरजनीलिमे'त्यभिधानादिति वाच्यम्, तथा सति दीपालोकमध्यवर्त्तिनीरजनीलिम्नश्चन्द्रालोकेन प्रकाशापत्तेः । अनभिभूतस्यैवाभिभावकत्वमतो न प्रदीपसान्निधाने दिवापि तदनुपलम्भ(२)इति भावः । साध्याव्यापकत्वादिति । सूर्यालोकानभिभाव्यत्वलक्षणसाध्यस्येन्द्रनीलवृत्तिरूपे सत्त्वादुपाधेश्चासत्त्वादित्यर्थः । पूर्ववदिति । तद्विशेषणेऽपि पार्थिवावयविनि व्यभिचारादित्यर्थः । मधुरेति । जलत्वमा-

---

(१) कषायद्र० । (२) तदुपलम्भ इ० ।

त् । तथा हि स्नातकस्य हरीतकीरसस्वादानन्तरं(१)वाराणसी-परिसरे कमण्डलुपरिस्खलदमलजाह्नवीजल(२)विमलधारासु म-

---

न्यायलीलावतीकण्ठाभरणम्

समानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः। स्वरूपासिद्धिमाशङ्क्याह—कषायेति। नन्वेवं रसनमात्रं रूपादिषु मध्ये रसस्यैव व्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकजलवदित्यनुमानं कषायद्रव्येण व्यभिचारात् भज्येत। न च स्वीयरूपव्यञ्जकत्वान्न व्यभिचार इति वाच्यम्, तथा च दृष्टान्ते साध्यवैकल्यापत्तिः। मैवं पार्थिवरसाभिव्यञ्जकत्वस्य हेतुविशेषणत्वेनाभिमतत्वात्। न च कषायद्रव्यं पार्थिवं रसमभिव्यनक्तीति न तेन व्यभिचारः। न च कर्कटीभक्षणानन्तरं जले तैक्ष्ण्यमु-

न्यायलीलावतीप्रकाशः

मानाधिकरणद्रव्यत्वव्याप्यजात्यनाधारत्वे सति रसवत्त्वस्य विवक्षणात्। योग्यानुपलब्धिबाधं निरस्यति—कषायेति। नन्वेवं रूपाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वं रसनात्यत्वसाधकं कषायद्रव्य एव व्यभिचरेत्। न च स्वीयरूपव्यञ्जकत्वात्तत्र हेत्वभावः, सक्तुरसाभिव्यञ्जकोदकस्यापि स्वीयरूपव्यञ्जकत्वाद् दृष्टान्तस्य साधनवैकल्यापत्तेः। पररूपाव्यञ्जकत्वं तत्रापि समानम्। न च कषायद्रव्यं जलरसोत्पादकं मधुररसस्य सकलजलसाधारण्याभावापत्तेः। कर्कटीभक्षणानन्तरं जलपाने तिक्तरसस्यानुभवात्तत्र तिक्तरसस्याप्याप-

न्यायलीलावतीप्रकाशविवृतिः

दायासम्भववारणाय भिन्नान्तम्। द्रव्यत्वमादाय तद्वारणाय द्रव्यत्वव्याप्यमिति। क्वचित्साक्षात्पदमस्ति तत्र जातित्वावच्छिन्नाधारत्वं न विवक्षणीयमपि तु यत्किञ्चित्तादृशजात्यनाधारत्वमिति। शर्करादावतिव्याप्तिवारणाय तत्पदमिति ध्येयम्। रूपादीति। आदिपदं स्पर्शाद्यव्यञ्जकत्वगर्भहेत्वन्तरावाप्तये। पररूपेति। यद्यपि लुप्ताक्षरमसीनीलिम्नि जलस्य व्यञ्जकतया दृष्टान्तत्वमेवमप्ययुक्तमेवेति वाच्यम्,(?)पटादिरूपाव्यञ्जकत्व(स्य?)विशिष्यैवो(३)पादानात्।केचित्तु(४)

---

(१) हरीतकीस्वादा० । (२) जलाविरलधा० ।

(३) त्वस्य तत्रैवोपा० । (४) कश्चित्तु ।

धुराकारा मनीषोन्मिषति । न च कषायद्रव्यस्यैव तत् । रसा-

न्यायलीलावतीप्रकाशः

त्तेः । अत्राहुः । रसनाप्यत्वसाधके पार्थिवरसाभिव्यञ्जकत्वं साध-कमतो न जलरसव्यञ्जककषायद्रव्येण व्यभिचारः । कषायद्रव्यान्य-त्वेन वा हेतुर्विशेष्यः । तिक्तरसश्च कर्कट्या एव केवलेऽपि कर्कटी-फले तिक्ततोपलम्भात् । तदेकदेशे तिक्ततोपलम्भात् अवयवरस-जातीयस्यावयविनि वृत्तेः । यद्वा कर्कटीभक्षणेन रसनाग्रवर्त्तिपित्त-क्षोभः क्रियते तदीयतिक्तत्वं तत्रोपलभ्यत इति वैद्यकादवगतमत एव जलपानं विनापि तत्र तिक्ततोपलम्भः । मधुरा हरितकीत्यनुभ-वात् तदीय एव मधुररसोऽनुभूयते न जलस्येत्यपि नास्ति । स्वरूप-योग्यहरीतकीरसान्तराणामपि रसनेन संयुक्तसमवायाविशेषात्तद्ग्र-हापत्तेः, सामग्रीसत्त्वेऽपि कार्याभावस्य व्याहतत्वादित्याह—न चेति ।

न्यायलीलावतीप्रकाशविवृतिः

पररूपस्पर्शाव्यञ्जकत्वमेव हेतुर्न च रूपपदव्यर्थता अखण्डाभावादि-त्याहुः(१) । पार्थिवेति । अत्रापि परपदं प्रवेश्यमन्यथा स्वीयरसव्यञ्जकतया व्यभिचारतादवस्थ्यात् । द्रव्यत्वं च हेतौ प्रवेशनीयमन्यथा सन्निक-र्षे व्यभिचारात् । न चेदमन्योन्याश्रयग्रस्तं रसनाप्य(२)साधकस्य हेतुत्वानुपपत्त्या हि परेण जलनीरसत्वं साध्यते । तथा च जले रस-वत्त्वासिद्धौ पार्थिवत्वं हेतोर्विशेषणमन्यथा व्यावर्त्याप्रसिद्धेस्तद्विशे-षणे च हेतुत्वानुपपत्तिलक्षणबाधकनिरासे जले रसवत्त्वसिद्धिरिति वाच्यम् , रसत्वावच्छिन्नव्यञ्जकत्वहेतौ तात्पर्यात् । अवच्छिन्नत्वाविशे-षणादेव नोपनीतज्ञानमादायान्यत्र व्यभिचारः । तत्र ज्ञातत्वस्य व्य-ञ्जकता(३) वच्छेदकत्वात् जले सक्तुरसत्वस्य तथात्वेन रसत्वस्या-पि तथात्वादिति मिश्राः । वस्तुतस्त्वनयैवारुच्याह--कषायेति । मि-ष्टकर्कटीभक्षणे न तदुपलम्भ इत्यत आह--तदेकदेश इति । वृन्तसं-न्निहितावयव इत्यर्थः । तथाप्यवयविनि किमायातमत आह-अवयवेति । नन्ववयवान्तरस्य मधुररसवत्त्वादवयवी तत्र नीरसश्चित्ररसवान् वा स्वीकरणीय इत्यवयवान्तरभक्षणे कथं तिक्ततोपलम्भ इत्यरु-चेराह—यद्वेति । तदीय एवेति । तदीय एवेत्यवयवरसेन परम्परासम्ब-

(१) इत्याह । (२) प्यत्वसा० । (३) व्यञ्जकतावच्छेदकत्वात् → व्यञ्जताव० ।

न्तराणामप्युपलम्भापत्तेः। न च जलेनैव तत्र माधुर्यमुत्पाद्यते।

न्यायलीलावतीकण्ठाभरणम्

पलभ्यत इति तिक्तमपि जलं स्यादिति वाच्यम्, तैक्त्यस्य कर्कटीगतत्वेन पूर्वमप्युपलम्भात्। रसनाग्रवर्तिक्षुभिततिक्तभागस्यैव वा तत् तैक्त्यम्। न च जलेनैवेति। अग्निसंयोगस्यैव सत्यवयविनि परमाणौ वा

न्यायलीलावतीप्रकाशः

एतच्च हरीतक्यवयवानां नानारसत्वमभ्युपेत्योक्तं न तु हरीतक्यामेवाव्याप्यवृत्तिनानारससमवायः, व्याप्यवृत्तिजातीयताविरोधात्। न च षड्रसा हरीतकीतिव्यवहारात्तत्र चित्र एव रसः, गुणविरोधेनाऽवयविनि नानारसैरनारम्भात्। चित्ररूपावयविनि तु नीरूपत्वेनाप्रत्यक्षतापत्तेरनन्यगत्या तथा स्वीकारात्। विजातीयरूपासहकृतस्यैव नीलादेर्नीलाद्यारम्भकत्वात् गुणविरोधाभावात्। अत्र त्ववयविनो नीरसत्वे बाधकाभावात्, रसनस्य द्रव्याग्राहकत्वात्, षड्रसव्यवहारस्य च तत्तद्रसकार्यजनकत्वेन गौणत्वात्। ननु मधुररसमात्राधिकरणद्रव्यान्तरोत्पादात् विलक्षणरसोत्पत्तौ रसान्तराणामभिभूतत्वाद्वा नोक्तदोष इत्याशयेनाह—न चेति। द्रव्यान्तरे तावन्माना-

न्यायलीलावतीप्रकाशविवृतिः

न्धादुक्तम्। एवमग्रेऽपि हरीतकीरसेत्यत्र। इदं च हरीतक्यवयवानामित्याद्याकरेऽनुपदमेव व्यक्तीभविष्यतीति भावः। अव्याप्यवृत्तीति। विषयिधर्मिभिन्ने चायं नियमोऽन्यथेश्वरज्ञानमादाय व्यभिचारात्। न चेति। यद्यपि षड्रसत्वव्यवहाराच्चित्ररसो न सिद्ध्यति तथापि तादृशव्यवहारस्य परम्परासम्बन्धेनोपपत्त्यर्थमवयवानां षड्रसत्वे चित्ररूपवच्चित्ररसोऽप्यवयविनि स्यादिति भावः। अत्र त्विति। न च स्पार्शनप्रत्यक्षानुरोधेन चित्रस्पर्शापत्तिरिष्टत्वात्। न च रसवती हरीतकीतिप्रतीत्या चित्ररसस्यापि सिद्धिः। मधुरा हरीतकीतिप्रतीतिवद्रसप्रतीते(१)र्गुणविरोधबाधकेन परम्परासम्बन्धालम्बनत्वादिति भावः। प्रभाकरोपाध्यायास्तु हरीतकी चित्ररस्यै(सै?)वेत्याहुः। ननु जलसाहित्येन पाकात्कारणगुणादेव वा तदुत्पादेन पूर्वोक्त(२)-

---

(१) ० वदुक्तप्रतीतेर्गु। (२) मूलोक्तानियमावि०।

पृथिवीरसस्याकारणगुणपूर्वकस्य पाकजत्वनियमात्। न च हरी-तकीमाधुर्यस्य प्रकर्ष एवाम्भसा व्यज्यते। तदीयकषायादि-रसानां जलानभिव्यङ्ग्यत्वदर्शनात्। ततो घृतस्य कुङ्कुमगन्धा-भिव्यञ्जकतावदस्यापि जलमाधुर्यव्यञ्जकत्वम्। यदि वा शर-

---

न्यायलीलावतीकण्ठाभरणम्

पार्थिवरसोत्पादकत्वादित्यर्थः। तदीयकषायादीति। यद्यपि नानारस-समवायो न हरीतक्यां व्याप्यवृत्तिताविरोधात् विजातीयैरनारम्भा-च्च। पटप्रत्यक्षतान्यथाऽनुपपत्त्या तच्चित्ररूपाभ्युपगमः, चित्ररसा-नभ्युमगमे च नानिष्टम्। न च पार्थिवविशेषगुणस्य सर्व्वपृथिवीसा-धारण्यनियमभङ्गापत्तिरिष्टत्वात्। न चैवमिच्छाद्यपि पार्थिवे श-रीरे स्यात्तत्र बाधकान्तरसत्त्वात्। षड्रसा हरीतकी तु (ति?) व्यव-हारस्तु तद्रसकार्य्यकारितया। द्रव्यान्तरेण जलमाधुर्य्यानभिव्यक्तौ नियतशक्तिमत्त्वं दृष्टान्तेनोपपादयति—तत इति। अस्यापीति। कषाय-द्रव्यस्यापीत्यर्थः। स्वाभाविकस्थितये माधुर्य्यानुभवं स्वाभाविक-माह—यदि वेति। तिक्तादिरसवत् मधुरतावैलक्षण्यानुभवोऽपीति

न्यायलीलावतीप्रकाशः

भावः। हरीतकीरसश्च पाकज इत्यत्रापसिद्धान्तः। परमाणुरसस्यैव पाकजत्वात् कारणगुणप्रक्रमेण तु तदुत्पन्नाववयवानां नानारसत्वा-द्गुणविरोधेन तदनारम्भादवयवी नीरस एवेत्युक्तम। अतस्तत्र जलेन न मधुररसारम्भः, तथा च तदवयवगता विजातीयरसा युग-पत्प्रतीयेरन्नित्युक्तमित्यभिप्रेत्याह—पृथिवीति। न च हरीतकीति। हरीतकीशब्दस्तदवयवपरः। एतच्च सर्वेषां रसानां जलव्यङ्ग्यत्वेऽपि जलविशेषमभिप्रेत्योक्तम्। तथा चेतररसदृष्टान्तेन मधुररसस्य जला-नभिव्यङ्ग्यत्वमनुमेयमिति भावः। 'अस्यापि' कषायद्रव्यस्यापीत्य-र्थः। शरदीति। ननु रसान्तराप्रतीतिमात्रं तत्र, न तु माधुर्यानुभवः।

न्यायलीलावतीप्रकाशविवृतिः

नियमविरोध इत्यत आह–हरीतकीरस इति। 'जलव्यङ्ग्यत्वेऽपि' रसने-न्द्रियलक्षणजलव्यङ्ग्यत्वेऽपि। 'जलविशेषं' योग्यं जलम्। यद्यपीदं सिद्धान्तफक्किकोपरि वक्तुमुचितं तथापि न चेत्यनेन सिद्धान्तपर्य-

दि विमलजलदव्यूहानिरर्गलविगलदमलजलभारधारासारसञ्चा-रिनभस्तलनिहितविमलभाजनसम्भृतमपगतविविधोपाधिव्याधिस-म्भेदममृतद्रवप्रीतममानन्दजनकमम्भोऽनुभूयते। किं वा जलरस-स्य मधुरता(१)वैलक्षण्यं किमनुभूयमानजातिविरहः, उत शर्क-रादिमाधुर्यवैजात्यम्, अथ तेनैकजातीयताविरहः, उत मधुर-शब्दावाच्यत्वम् [वा]। नाद्यः। अनुभवबाधितत्वात्। नेतरः। अविवादात्। न तृतीयः। उत्कटसादृश्याद्यननुभवेऽपि मधुरता-

न्यायलीलावतीकण्ठाभरणम्

यत् परोक्तं तत्राह—किं वेति। जलीयरसे या जातिरनुभूयते तद्विरहो वा शर्करादिमाधुर्य्यभिन्नजातीयत्वं वा शर्करादिरसवृत्तिजातिशून्य-त्वं वेति विकल्पत्रयार्थः। अनुभवेति। न हि या जातिर्यत्रानुभूयते तद्विरह एव तत्रेत्यर्थः। अविवादादिति। जलमाधुर्य्यस्य मयाऽपि वि-लक्षणत्वोपगमादित्यर्थः। उत्कटेति। वैलक्षण्येऽपि मधुरत्वसामा-न्यस्य तत्रोपगमादित्यर्थः। अवान्तरसामान्येऽपि महासामान्याभा-

न्यायलीलावतीप्रकाशः

न च नीरसे सौहित्या(२)र्थिनस्तत्र प्रवृत्त्यनुपपत्तिः, अन्तःशैत्यार्थिनापि तदुपपत्तेः, नीरसपवनभक्षणेऽपि सर्पाणां प्रवृत्तेश्च। न च मनुष्या-णां नीरसभक्षणेऽप्रवृत्तिरिति व्याप्तिरिति वाच्यम, तावता रसमा-त्रसिद्धावपि मधुररसासिद्धेः। तस्मात्पूर्वोक्तमानावष्टम्भेनेदमुक्तं नियामकाभावादिति दूषयति—किं वेति। अनुभूयमानेति। जलरस एव या जातिरनुभूयते तद्विरह इत्यर्थः। 'एकजातीयता' गुणत्वव्या-

न्यायलीलावतीप्रकाशविवृतिः

न्तप्रतीकधारणमेवेत्यदोषः। तस्मादिति। इदमभ्युगमवादेन। वस्तुतो रसान्तरस्य सर्वप्राणिसाधारणस्य स्पृहाविषयत्वाभावे सर्वप्राणिसा-

(१) मधुरभाववै०। (२) सौहित्यं तर्पणं तृप्तिरित्यमरः।

मात्रस्यान्नादिसाधारण्यस्यानुभवात्। अन्यथा मेरुसर्षपयोरपि सत्ताविलयापत्तेः। न तुरीयः। व्यवहारबाधितत्वात्। न च पृथिव्यां(१) मधुरता आप्या। शुष्यत्सु शर्करादिषु माधुर्यापकर्षस्यानुपलम्भात्। शुष्यति पुनर्द्रव्ये(२)स्नेहापकर्षात्। नाप्युष्णः स्पर्शः। औपाधिकत्वात्। मेदस्विस्वेदार्पकतेजसीव रूपानवभासे-

न्यायलीलावतीकण्ठाभरणम्

वे विपक्षदण्डमाह—अन्यथेति। व्यवहारेति। मधुरं जलमिति व्यवहारस्य सार्वलौकिकत्वादिति भावः। पृथिवीमाधुर्यस्याप्यत्वं परापादितं दूषयति—न चेति। उपाध्यपगमे औपाधिकस्यापगमनियमात् प्रकृते तु वैपरीत्यमित्याह--शुष्यत्स्विति। घृतादौ स्वाभाविकस्नेहे बाधकमाह—शुष्यतीति। उष्णोदके स्वाभाविकमौष्ण्यं परापादितं दूषयति—नापीति। औपाधिकत्वादिति। तेजःसन्निकर्षोपाधिकत्वादित्यर्थः। तर्हि ते-

न्यायलीलावतीप्रकाशः

व्यव्याप्यजात्या। अन्यथेति। अवान्तरजात्यनुभवव्याप्तो न परजात्यनुभव इत्यर्थः। पृथिव्या अपि मधुरताया आप्यत्वापत्तेरित्युक्तं दूषयति—न च पृथिव्या इति। औपाधिकस्योपाध्यपकर्षेऽपकर्षोपलम्भनियमादित्यर्थः। प्रत्युत शुष्यत्कशेरुणि जलापगमे माधुर्योत्कर्षोपलम्भादिति भावः। स्नेहप्रतिबन्दीं दूषयति—शुष्यतीति। यथा यथा घृतादौ शोषस्तथा तथा स्नेहापकर्षोपलम्भादौपाधिकस्तत्र स्नेह इत्यर्थः। औपाधिकत्वादिति। उपाध्यन्वयानुविधानस्य अनन्यथासिद्धत्वादिति भावः। श्रीखण्डक्षोदेन घर्षकजलस्यैव प्रकृष्टं शैत्यमभिव्यज्यते। यद्वा श्रीखण्डान्तर्वर्त्तिजलस्यैव घर्षणाद्बहिर्भूतशैत्यातिशय उपलभ्यते, अघृष्टश्रीखण्डस्पर्शविजातीयस्पर्शानुभवात्। पवनादे·

न्यायलीलावतीप्रकाशविवृतिः

धारणप्रवृत्त्यैव मधुररसत्व(३)मिति द्रष्टव्यम्। प्रकृष्टं शैत्यमिति। शीतत्वावान्तरजातिविशिष्टं शैत्यमित्यर्थः। प्रतीतजलस्पर्शे प्रकर्षकल्पने मानाभाव इत्यरुचेराह--यद्वेति जलसंयोगस्यैवेत्यादि प्रागुक्तं दूषयति—पवनादेरिति। ननु तेजःसंयोगादेव तदुत्पत्तिरस्त्वित्यत

(१) पृथिव्या म०। (२) ति द्रव्ये पुनः स्ने०। (३) मधुररसवत्त्वमि०।

ऽपि स्पर्शप्रतीतेरविरोधात्। आप्यद्रवत्वस्यापाकजत्व(१)व्याप्तत्वात्। (न च) कनकद्रवत्ववन्नैमित्तिकत्वं, न च घृतद्रवत्वप्रतिबन्दीग्रहः(२)। तस्याप्यत्वे पाकापेक्षाविरोधात्। तैले चाप्यभाग-

---

न्यायलीलावतीकण्ठाभरणम्

जोरूपमप्यनुभूयेतेति यत्तु परेणोक्तं तत्राह—मेदस्वीति। 'मेदस्विनः' स्थूलास्तेषां प्रस्वेद उष्मणा भवति। स चोद्भूतस्पर्शोऽनुद्भूतरूपस्तथैव जलस्थं तेज इत्यर्थः। आप्यद्रवत्वस्य स्वाभाविकत्वादाह—आप्येति। अपाकजत्वनियमादिति। अनग्निसंयोगजत्वनियमादित्यर्थः। घृतेऽपि द्रवत्वमाप्यं स्यादिति परापादिते दोषमाह—न चेति। 'पाकापेक्षा' तेजःसंयोगापेक्षा। तर्हि तैलेऽपि नाप्यं द्रवत्वमन्यथा तद्द्रवत्वं दहनप्रतिकूलं स्यादिति परोक्तं दूषयति—तैले चेति। स्नेहप्रकर्षाधीनं तैल-

न्यायलीलावतीप्रकाशः

द्रव्यान्तरशैत्याभिव्यञ्जकत्वदर्शनात्। द्रव्यान्तरात्पृथिवीशैत्योत्पादस्य क्वाप्यदर्शनादिति भावः। रूपाध्यक्षताव्याप्यत्वात् स्पर्शाध्यक्षताया इत्यत्र व्यभिचारमाह—मेदस्वीति। करकाद्रवभावादिति दूषयति—आप्यद्रवत्वस्येति। तेजःसम्बन्धेनापां द्रवत्वादर्शनात् प्रत्युत तन्नाशोपलम्भात्तदपाकजमित्यर्थः। न च हिमपिण्डस्याग्निसंयोगेन विलयनादत्र बाधः। अपाकजत्वेऽपि निमित्तान्तरादुत्पत्तिः कथं निराकरणीयेति वाच्यम्, नैमित्तिकद्रवत्वस्य तेजःसंयोगजन्यत्वनियमात्। यज्जातीयं चाग्निसंयोगजन्यद्रवत्वाश्रयस्तज्जातीयं तदभावे पिण्डीभूतमुपलभ्यते यथा घृतादीति व्याप्तेश्च जलजातीये चातथात्वात्। करकायां च शीतस्पर्शवत्त्वेन जलत्वानुमानम्। न चासांसिद्धिकद्रवत्वेन प्रतिरोधः, तस्यासिद्धेः। अदृष्टविशेषात्तत्प्रतिबन्धे काठिन्योपलम्भादिति भावः। तस्येति। आप्यद्रवत्वस्य तेजःसंयोगाजन्यत्वादित्युक्तमिति भावः। तत्राप्सम्बन्ध इति दूषयति—तैले चेति। स्नेहप्रकर्षाभावस्तत्रोपाधिरिति भावः। तैलद्रवत्वस्य पा-

न्यायलीलावतीप्रकाशविवृतिः

आह—यज्जातीयं चेति। हिमपिण्डे च स्वाभाविकमेव द्रवत्वं करका-

---

(१) अपाकजत्वनियमादिति कण्ठाभरणधृतः पाठः। (२) ०त्वप्रतिबन्धाग्रहः।

स्य स्नेहप्रकर्षवत्त्वेन दहनानुकूलत्वात्। आप्यमेव द्रवत्वं घृतद्रवत्वस्य पाकजत्वेन पार्थिवत्वात्। एवं च स्नेहोऽपामेव। घृतस्नेहः पार्थिवः भौमानलेन्धनत्वादिति चेन्न, प्रकर्षविशेषादेव

न्यायलीलावतीकण्ठाभरणम्

जलभागस्य दहनानुकूलत्वमित्यर्थः। तर्हि घृतद्रवत्वमप्याप्यं स्यात् दहनानुकूलता च तैलवत् स्नेहप्रकर्षाधीना स्यादित्यत आह—घृतद्रवत्वस्येति। भौमानलेन्धनत्वादिति। वायुभिन्नत्वे सति भौमानलोपचयहे·

न्यायलीलावतीप्रकाशः

र्थिवत्वे बाधकमाह—घृतेति। तैलद्रवत्वस्य पार्थिवत्वे घृतद्रवत्ववत् पाकजत्वापत्तिरित्यर्थः। एवं चेति। [एवं च] घृतद्रवत्वस्य पाकजत्वादाप्यद्रवत्वस्य चातथात्वान्न द्रवत्वप्रतिबन्दिरिति घृतस्नेहोऽपामेवेति सिद्धे स्नेहस्तल्लक्षणं सिद्धमित्यर्थः। भौमेति। ननु चेन्धनत्वं न निमित्तत्वं वायुनाऽनैकान्तात्। न चानलदाह्यत्वेन तद्विशेषणम्। दाहो हि रूपपरावृत्तिर्वा भस्मीभावो वा उभयस्यापि स्नेहावृत्तित्वेनापक्षधर्म्मत्वम्। अत एव च नानलनाशहेतुनाशप्रतियोगित्वे सत्यनलहेतुत्वमिन्धनत्वम्, अनलावयवे गतत्वात्। न च हेतुत्वं निमित्तत्वमभिप्रेतम्, अनलस्येन्धननाशनाश्यत्वे मानाभावात्। इन्धननाशानन्तरं ह्यनलान्तरं नोत्पद्यते पूर्वानलस्त्ववयवक्रियाविभागन्यायेन नश्यति। तस्माद्घृतस्नेहाश्रयो न जलं दहनानुकूलत्वात् काष्ठवदित्यभिप्रायकोऽयं ग्रन्थः। अत्र स्नेहानाधारत्वमुपाधिः। घृतस्नेहाश्रयो यदि जले स्यात् भौमानलेन्धनं न स्यादित्यत्र च स्नेहप्रकर्षविशेषाभाव उपाधिरित्याह—प्रकर्षेति। जलत्वमपि भेदकं जलशब्दसङ्केत·

न्यायलीलावतीप्रकाशविवृतिः

दिवदिति भावः। समवायित्वमवयवित्वं चासिद्धमेवेति सिद्धवदाह—निमित्तत्वमिति। अत एवेति। अपक्षधर्मत्वादेवेत्यर्थः। वक्ष्यमाणयुक्त्याऽनलस्येन्धननाशानाश्यत्वादित्यर्थः। व्यभिचारोऽपीत्याह—अनलावयव इति। व्यभिचारोद्धारेऽपि अपक्षधर्मत्वं तदवस्थमेवेत्याह—अनलस्येति। वस्तुतो घृतस्येन्धनत्वं न तदीयस्नेहस्येति स्वरूपासिद्धिरिति भावः। दहनेति। भौमदहनेत्यर्थः। तेन न दिव्यानलानुकूलजले व्यभि·

स्नेहस्य दहनानुकूलतोपपत्तेः ॥ (इति) जलम् ।

न्यायलीलावतीकण्ठाभरणम्

तुत्वादित्यर्थः । तदुपचयहेतुत्वं च तदुत्कर्षापकर्षप्रयोजकोत्कर्षापकर्षवत्त्वम् । अन्यथा इन्धनत्वं यदि निमित्तत्वं तदा वायावतिव्याप्तिः । अनलदाह्यत्वे सतीति विशेषणे दाहस्य स्नेहावृत्तित्वादपक्षधर्मत्वम् । न हि रूपपरावृत्तिर्वा भस्मीभावो वा स्नेहे सम्भवति । अनलनाशहेतुनाशप्रतियोगित्वेन विशेषणे स्वरूपासिद्धिः । न हि स्नेहनाशादनलो नश्यति, अपि त्ववयवनाशात्तत्संयोगनाशाद्वा । अनलावयवे व्यभिचारश्चेत्यादिदोषः स्यात् ।

न्यायलीलावतीप्रकाशः

ग्रहो न व्यक्तिमात्रे न वा व्यक्तिविशेष इत्यनुगतधर्मस्य बाधकाभावाज्जातित्वात् । अनित्यस्नेहत्वस्य कार्यतावच्छेदकत्वेनोक्तगत्या तत्सिद्धेर्वेति भावः ।

न्यायलीलावतीप्रकाशविवृतिः

चारः । तथाप्यनुकूलत्वे(१) तदन्यत्वेनापि हेतुविशेषणम् । अनित्येति । न च परमाणुसाधारणं जलत्वं तथापि न सिद्धमिति वाच्यम्, तस्यापि स्वरूपयोग्यत्वात् । समानाधिकरणस्नेहस्य(२) च प्रतिबन्धकतया फलाभावः, नित्यस्येत्यादिव्याप्तिस्तु नाभ्युपेयत एवेति । मिश्रास्तु । अतिप्रसङ्गो ज्ञातः प्रतिबन्धक इति पूर्वं परमाणुवृत्तित्वाज्ञानादुक्तकारणतावच्छेदकतया जलत्वसिद्धौ स्वोपादेयद्व्यणुकवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वेन परमाणुवृत्तित्वानुमानेऽतिप्रसङ्गज्ञानं नावच्छेदकत्वकल्पनां बाधते उपजीव्यविरोधादपि तु अनित्यत्वमवच्छेदकं विशेषणं कल्प्यते पूर्वत्यागेनोपजीव्यविरोधाभावादिति वदन्ति । वयं तु जलसमवायिकारणतावच्छेदकतयैव जलत्वसिद्धिः, अन्त्यावयवी च जलस्य नास्त्येव । न च तथा सति जलीयशरीरेऽन्त्यावयवित्वगर्भशरीरलक्षणाव्याप्तिः । तत्रान्त्यावयविपदस्य करादिवारकस्य फलानुपहितमात्रपरत्वादिति ब्रूमः ।

---

(१) तस्याप्यनु० । (२) ०स्नेहस्य तत्प्रति० ।

शुक्लमेव भास्वरं च रूपं तेजस इत्यसङ्गतम् । अग्नेररुणादिरूपोपलब्धेः । कनकरूपस्य चाभास्वरत्वात् । संयोगिपार्थिवाभिभूतत्वेन (१) तत्राभास्वरत्वमिति चेन्न, पार्थिवरूपस्य तेजोरूपानभिभावकत्वात् । अन्यथा घटादावपि तथाभावप्रसङ्गेन रूपप्रत्यक्षत्वविरोधात् (२) । अनुद्भूतं तदिति चेन्न, अग्रहणप्रसङ्गात् ।

———

न्यायलीलावतीकण्ठाभरणम्

शुक्लमिति । भास्वरमिति जलव्यावृत्तये । भास्वरत्वं च रूपप्रकाशकत्वव्यङ्ग्या रूपगता जातिः । अव्याप्तिमाह—कनकेति । न हि तद्रूपेण पररूपं व्यज्यत इत्यर्थः । गुरुत्वासमानाधिकरणरूपवत्त्वं कनकोष्माद्यव्यापकं औष्ण्यसमानाधिकरणरूपवत्त्वं चन्द्रचामीकराद्यव्यापकमिति भावः । तथाभावेति । घटादिरूपस्यापि तेजोरूपाभिभावकत्वे तजोभिन्नस्य रूपं क्वापि न गृह्येतेत्यर्थः । अनुद्भूतं तदिति । कनकरूपमित्यर्थः । अग्रहणेति । कनकरूपस्येति शेषः । उद्भूतरूपस्पर्शयो-

न्यायलीलावतीप्रकाशः

शुक्लमेव रूपं जलस्यापीत्यत उक्तं भास्वरं चेति । भास्वरत्वं च जातिविशेषो रूपान्तरप्रकाशकत्वव्यङ्ग्यः । अभास्वरत्वादिति । व्यञ्जकाभावेन भास्वरत्वानुपलम्भादित्यर्थः । अत एव न गुरुत्वासहचररूपं तल्लक्षणं कनकोष्मादावभावादिति भावः । अन्यथेति । घटादिरूपेणालोकरूपाभिभवादुद्भूतानभिभूतरूपसहकारितेजोविरहात्सर्वरूपाप्र-

न्यायलीलावतीप्रकाशविवृतिः

भास्वरत्वं चेति । शुक्लपदं चैवं स्वरूपकथनपरम् । चामीकरादावनुपलम्भ(३) हेतुकवैप्रत्यनिराकरणायेति ध्येयम् । 'व्यञ्जकाभावेन' रूपान्तरप्रकाशकत्वाभावेन । 'अत एव' अव्यापकत्वादेव । तदेवाह—कनकेति । कनके विशेषणाभावादुष्मणि विशेष्याभावाच्च विशिष्टाभाव इत्यर्थः । अनुद्भूतं च रूपं नास्तीत्यभिमानः । स्पर्शाप्रत्यक्षताया अनुक्तत्वात्तन्निबन्धनदूषणापादनमयुक्तमित्याशङ्कायां व्याप्तिबलेनैव स्पर्शाप्रत्यक्षतासिद्धिरिति कस्यचिन्मतं निराकृत्यानुद्भूत-

(१) पार्थिवरूपाभि० । (२) ०न रूपाप्रत्यक्षतापत्तेः । (३) ०दावुपल० ।

रूपं न गृह्यत इति(१) चेन्न, रूपस्पर्शयोस्तैजसयोश्चाग्रहे कनकद्रव्यस्याप्रत्यक्षतापत्तेः । अभास्वरमिति(२) चेत्, सिद्धमीहितम्(३) । नाप्युष्ण एव स्पर्शः । पद्मरागादितेजसामनुष्णाशीतत्वात् । पार्थिवौपाधिकी सा (स्पर्श) प्रतीतिरिति चेन्न, रूपानवभासे तदनवभासात् । अन्यथा वायौ (४)स्पर्शविलयात् । औष्ण्यमेवैतदनुद्भूतमिति चेत्, (५)अनुष्णाशीत-

---

न्यायलीलावतीकण्ठाभरणम्

द्वयोरपि द्रव्यप्रत्यक्षताप्रयोजकत्वमभ्युपेत्याह–रूपस्पर्शयोरिति । अन्यथानुपपत्त्या सिद्धान्तिनोऽभ्युपगममाशङ्कते–अभास्वरमिति । कनकरूपमिति शेषः॥ अपर आह––सिद्धमिति । कनके लक्षणमव्यापकं कनकेऽतैजसत्वं वा सिद्धमिति भावः । तेजोलक्षणान्तरं दूषयति––नापीति । रूपानवभास इति । पार्थिवोद्भूतस्पर्शस्य उद्भूतरूपसामानाधिकरण्यनियमादित्यर्थः । अन्यथेति । अयं चेत्यनियमः । तदा वायुरप्यनुद्भूतस्पर्शा पृथिवी स्यादित्यर्थः । औष्ण्यमेतदिति । पद्मरागादितेजसि यः स्पर्शोऽनुभूयते इति शेषः । अनुभवश्चेन्न प्रमाणं तदा पृथिवीस्पर्शो-

न्यायलीलावतीप्रकाशः

त्यक्षापत्तिरित्यर्थः । रूपस्पर्शयोरिति । यस्य तेजसो रूपमप्रत्यक्षं तस्य स्पर्शोऽप्यप्रत्यक्ष इत्यस्य ग्रीष्मोष्मणि व्यभिचारेऽपि सुवर्णोष्णस्पर्शस्यानुद्भवेनाप्रत्यक्षत्वे रूपस्याप्यग्रहे सुवर्णं प्रत्यक्षमेव न स्यात् । द्रव्यग्राहकचक्षुस्त्वग्भ्यां रूपस्पर्शयोग्यतायामेव द्रव्यग्रहादित्यर्थः । रूपानवभास इति । यस्य पार्थिवस्य रूपमप्रत्यक्षं तस्य स्पर्शोऽप्यप्रत्यक्ष इत्यर्थः । अन्यथेति । सोऽपि स्पर्शोऽनुद्भूतरूपपृथिव्याः स्यादित्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

त्वेनैव तदप्रत्यक्षत्वमुपपाद्य मूलयोजनामाह––यस्य तेजस इति । यस्य पार्थिवस्येति । तथा च मणिव्यवहिततत्प्रभायां लौहित्यानवभासे

---

(१) त एवेति चेन्न । (२) स्वरं तदिति । (३) सिद्धं नः समीहितम् ।
(४) वायुस्पर्श० । (५) ति चेन्न ।

(मात्र) विलयात् । मैवम् । अग्नेररुणादिरूपप्रतीतेरौपाधिकत्वात् । कनकरूपं च पार्थिवरूपाभिभूतमेव हीनत्वात् । तेजोंश-

न्यायलीलावतीकण्ठाभरणम्

ऽप्युष्ण एवानुभूतः स्यादित्याह--अनुष्णाशीतेति । अग्नेरिति । तेजस्त्वं शुक्लेतररूपवदवृत्ति गन्धासमानाधिकरणजातित्वात् जलत्ववदित्यत्र तात्पर्यात् । अन्यथाऽङ्गारादिर्नोपाधिर्ज्वालायामप्यवश्यानुभवात् दिग्दाहादौ चोपाधेरनुपलम्भादिदोषापत्तिः । कनकेऽव्याप्तिं निरस्यति—कनकेति । तेजोरूपस्य पार्थिवरूपाभिभाव्यत्वे रूपमात्रानुपलब्धिः

न्यायलीलावतीप्रकाशः

अनुष्णेति । अनुद्भूतोष्णशीतस्पर्शाभ्यामेव तथा प्रतीत्युपपत्तेरित्यर्थः । अग्नेरिति । ननूपाधिर्लोहिताङ्गारादिर्वाच्यः, तदग्रहेऽपि दीर्घज्वालायां लौहित्यग्रहात्तन्नौपाधिकं दिग्दाहादौ चोपाधेरसम्भवः । मैवम् । तेजस्त्वं शुक्लेतररूपवदवृत्ति अपाकजरूपवत्परमाणुवृत्ति [द्रव्यत्वव्याप्यं] जातित्वाज्जलत्ववदित्यत्र तात्पर्यात् । भास्वररूपस्य कनकाव्याप्तिं निरस्यति—कनकरूपमिति । यद्यप्यभिभूतरूपस्यापि वन्हेः स्वपरप्रकाशकत्वं दृष्टमिति कनकस्यापि तथात्वापत्तिः, तथाप्यभि-

न्यायलीलावतीप्रकाशविवृतिः

स्पर्शोपाधिकत्वमसम्भवीति भावः । अनुद्भूतोष्णेति । यद्यपि तयोरतीन्द्रियतया तदाश्रयाप्रत्यक्षतापत्त्या नैवमुपपत्तिस्तथापि तत्रापीष्टापत्त्या आपातत इदम् । अत एव सिद्धान्तेऽप्येतस्यापेक्षेति भावः । अनुमानप्रामाण्यबलेनैवाग्निप्रेरणोद्धतपार्थिवभागस्योपाधित्वं कल्पनीयमित्यभिप्रेत्याह--तेजस्त्वमिति । आलोकादिकमादाय सिद्धसाधनमित्यभावद्वयगर्भता । पृथिवीत्वे व्यभिचार इति रूपवदित्यन्तम् । घटस्यैव तन्मते अपाकजरूपवत्त्वात् स एव व्यभिचार इति परमाणुपदम् । परमाणुत्वे व्यभिचार इति जातिपदम् । द्रव्यत्वव्याप्यपदमपि पूरणीयमन्यथा सत्तादौ व्यभिचारात् । क्वचित्तु पाठ एव तथा । वस्तुतोऽवृत्तीत्यत्र नञ्द्वयेन पाकजरूपवदवृत्तिपरमाणुवृत्तिजातित्वादिति हेतुः । जातिपदं चैवं जलपरमाणुपीतघटान्यतरत्वे व्यभिचारवारणायेति भावः । अभिभूतरूपस्यापीति । दीपादौ सर्वत्र पृथ्वीरूपाभि-

न्यायलीलावतीकण्ठाभरणम्

स्यादिति यदुक्तं तत्राह--तेजोंऽश इति। कार्य्यलक्षणेन कनकलक्षणं तेजोहीनमिति तद्रूपं पार्थिवरूपाभिभाव्यमिति कल्पनीयमित्यर्थः। ननु वन्हिरूपमप्यभिभूतमेव। तथा च तदपि न प्रकाशकं स्यादिति चेन्न वह्नौ शुक्लत्वमात्राभिभवेऽपि रूपस्यानभिभवात्। कनके तु रूपस्यैवाभिभूतत्वात्। न चान्धकारे सुवर्णरूपोपलम्भापत्तिः बलवत्सजातीयसम्बन्धस्याभिभवत्वात्। उपष्टम्भकद्रव्यसम्भेदमहिम्ना तन्नोपलभ्यत इत्यन्ये। वह्निप्रभालक्षणं तेजोऽन्तरमेव वा प्रकाशकं कार्य्यबलादुन्नेयम्। उष्णस्पर्शवत्त्वस्य तेजोलक्षणस्याव्याप्तिं परिहरति-

न्यायलीलावतीप्रकाशः

भूतरूपवन्हिसम्बद्धानभिभूतरूपवह्नयादिमध्यादिव्यापिनी प्रभैवेतररूपव्यञ्जिका। यद्वा वन्हौ रूपं नाभिभूयते किन्तु तन्निष्ठशुक्लत्वम्। सुवर्णे तु रूपमेव तथेति कार्यदर्शनात्कल्प्यते। न चैवमन्धकारेऽभिभावकपीतरूपाग्रहेऽपि सुवर्णस्य भास्वररूपमुपलभ्येत बलवत्सजातीयग्रहणकृताग्रहणस्याभिभवत्वादिति वाच्यम्, बलवत्सजातीयसम्बन्धस्यैवाभिभवत्वाल्लाघवात्। उपष्टम्भकद्रव्यसंयोग एव सुवर्णरूपप्रतिबन्धक इत्यन्ये। तथाप्यन्धकारे सुवर्णस्योपलम्भापत्तिरभिभूतरूपस्यापि तेजसो ग्रहणात् तेजसि तेजोन्तरस्याप्रकाशकत्वात्। नैवम्। रूपे गृह्यमाण एव चक्षुषा द्रव्यग्रहणात् सुवर्णरूपमभिभवादेव नोपलभ्यते उपष्टम्भकरूपं चालोकाभावात्। अभिभाव्यताप्रयोजकमाह—तेजोंऽशेति। हीनत्वमवान्तरजातिभेदः। कार्यैकेति। अभिभवस्यानन्यथासिद्धत्वादित्यर्थः। उष्णस्पर्शस्य प्रभायामव्याप्तिं निर-

न्यायलीलावतीप्रकाशविवृतिः

भूतरूपवत्त्वादिति भावः। ननु तेजोऽन्तरकल्पने गौरवं तद्ग्रहापत्तिश्चेति अरुचेराह—यद्वेति। उपष्टम्भकेति। पूर्वं सजातीयसम्बन्धस्य प्रतिबन्धकत्वमुक्तमधुना तदाश्रयद्रव्यसंयोगस्योच्यत इति भेदः। सजातीयसम्बन्धस्योल्कादिरूपग्रहप्रतिबन्धकत्वं क्लृप्तमिति तदेव कल्प्यत इत्यरुचेराह—अन्य इति। [अभिभूतरूपस्यापीति। इन्द्रनीलप्रभादेरित्यर्थः।]सुवर्णरूपमिति। न चैवमन्धकारे वन्ह्युपलम्भो न स्यात् तद्रूपस्याभिभूत

हीनतायाः कार्यैकगम्यत्वात् । प्रभास्पर्शस्त्वतीन्द्रियोऽनुमाना-दुष्ण एव तेजस्त्वादवगम्यते ।

ननु सुवर्णं कथं तैजसम् । अत्यन्ताग्निसंयोगेनानुच्छिद्य-मानद्रवत्वाधिकरणत्वादिति चेन्न, सन्दिग्धासिद्धत्वात् (१) किमिदमेव द्रवत्वाधिकरणं द्रवत्वाधारद्रव्यान्तरसंयुक्तं वेति । अनुभवसिद्धं द्रवत्वाधारत्वमिति चेत् ? (२) सिद्धं तदा पार्थि-त्वम् । पीतिमगुरुत्वाधिकरणत्वस्यापि तथात्वात् । तदौपा-

न्यायलीलावतीकण्ठाभरणम्

प्रभेति । प्रभा उष्णस्पर्शवती तेजस्त्वात् । तदनुपलम्भस्त्वनुद्भूतत्वादि-त्यर्थः।ननु तेजोंशहीनत्वकल्पनं सुवर्णेऽव्याप्तिनिरासार्थं तदा स्याद्यदि-सुवर्णं तैजसं भवेत्तदेव तु नास्तीत्याह—नन्विति। सुवर्णं तैजसमत्यन्तान-लसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् न यदेवं न तदेवं यथा घट इति व्यतिरेकिणं शङ्कते—अत्यन्तेति । अनित्यपदपूरणात् न जलप-रमाणौ व्यभिचारः।अपार्थिवत्वं वा साध्यम् । सन्दिग्धेति । तैजसत्वेनाभि-मतस्य द्रवत्वाधारत्वं सन्दिग्धमित्यर्थः । एतदेवाह—किमिति । उप-लभ्यमानं द्रवत्वं पीतिमगुरुत्वाश्रयं वा तेजसो वेति सन्देह इत्यर्थः । ननु सन्दिग्धासिद्धिस्तदा स्याद्यदि द्रवत्वाधारत्वस्य हेतोः सन्देहः स्यात् अनुभवबलात्तन्निश्चितमेवेत्याह—अनुभवेति । अनुभवश्चेद्बलं तदा पीतिमसमानाधिकरणमेव द्रवत्वमनुभूयत इति पार्थिवत्वमेव तस्य व्यवस्थितमित्याह—सिद्धमिति । तदौपाधिक-

न्यायलीलावतीप्रकाशः

स्यति–प्रभेति । तेजस्त्वात्तत्रोष्णस्पर्शानुमाने चान्द्रकर इवानुद्भूतत्वं कल्प्यत इत्यर्थः । अत्यन्तेति । पार्थिवद्रवत्वस्याग्निसंयोगनाश्यत्वादि-त्यर्थः । न च पीतिमगुरुत्वाश्रयस्य पक्षत्वे बाधोऽतिरिक्तपक्षत्वे चाश्रयासिद्धिः। उभयसिद्धप्रत्यक्षद्रवत्वाश्रयस्य पक्षत्वात्। सन्दिग्धेति। तथाविधं द्रवत्वं त्वदुपगतोपष्टम्भकस्य सुवर्णस्य वेति सन्देहाद्धेतोः सन्दिग्धाश्रयत्वादित्यर्थः । अनुभवबलावलम्बने तु पीतिमगुरुत्वयो-रपि तदीयत्वमिति कथं तैजसत्वमित्याह—पीतिमेति । तथात्वात्

(१) सन्दिग्धानैकान्तिकत्वात् । (२) ०ति चेन्न ।

धिकत्वेन शङ्कितमिति चेत् ,(१) तुल्यं द्रवत्वेऽपि । मैवम् ।

पीतिमा च गुरुत्वं च दाहे यत्र(२) च रक्तता ।
तस्य लोकप्रसिद्धस्य स्वर्णत्वं केन वार्यते ॥
अनुच्छिन्नद्रवत्वं तु वस्तु यत्त्विह भासते ।
सुवर्णव्यवहारोऽयं तत्र शास्त्रे(३) प्रवर्तते ॥

न्यायलीलावतीकण्ठाभरणम्

त्वेनेति । उपष्टम्भकपार्थिवौपाधिकं पीतत्वमित्यर्थः । तुल्यमिति । द्रवत्वमप्यनुभूयमानं तर्हि पार्थिवमेवेति स्वरूपासिद्धो हेतुरित्यर्थः । पीतिमा चेति । यत् पीतं गुरु रूपपरावृत्तिस्थानं तत् द्रव्यं पार्थिवमेव सुवर्णत्वेन व्यपदिश्यते तत्र च न द्रवत्वं पार्थिवत्वेऽस्य चाग्निसंयोगनाश्यत्वदर्शनात् । अत एव लौकिकानां पलमितं सुवर्णमित्यादिव्यवहार इत्यर्थः ।

ननु त्वया तैजसं किमभिधीयत इत्यत आह—अनुच्छिन्नेति । यन्मुषायां ध्मायमानं द्रवत्वाधिकरणमुपलभ्यते तत्र तेजसि शास्त्रकृतां सुवर्णव्यवहारः पार्थिवद्रवत्वस्यात्यन्ताग्निसंयोगोच्छेद्यत्वेन तद्वैधर्म्याद्विशिष्टं द्रवत्वाधिकरणं रूपवच्च तेज एव भवितुमर्हति । पार्थिवस्तु भागो न तदा द्रवतामुपैति । काठिन्यानुपलम्भश्च मसीगुटकस्येव जले क्षुण्णस्य, लोष्ट्रस्य वा जलविलीनस्य । किं च पार्थिवपीतभागस्य रूपान्तरपरावृत्तिप्रतिबन्धकं विजातीयद्रव्ये

न्यायलीलावतीप्रकाशः

द्रवत्वसामानाधिकरण्येनानुभूयमानत्वादित्यर्थः । तुल्यमिति । औपाधिकत्वशङ्का तूभयत्र तुल्येत्यर्थः ।

प्रथममेव सुवर्णस्य तैजसत्वे पीतिमाद्याश्रये कथं सुवर्णव्यवहार इति शङ्कां निरस्यति—पीतिमा चेति । पीतिमगुरुत्वाश्रये सुवर्णे पार्थिवत्वमेव अनुभवव्यपदेशयोरवारणादित्यर्थः । तर्हि शास्त्रे "अग्नेरपत्यं प्रथमं हिरण्य"मित्यादौ कुतस्तैजसत्वव्यवहारः पीतिमगुरुत्वाश्रयस्य तैजसत्वे बाधकादित्यत आह—अनुच्छिन्नेति । एतेन तैजसत्वसाधने हेतुरप्युक्तः । नन्वेवं लोकशा-

(१) ०ति चेन्न । (२) यस्य । (३) तन्त्रशास्त्रे ।

वस्तुभेदे प्रसिद्धेऽपि शब्दसाम्यं प्रवर्त्तते ।
रसः स्वभावमधुरो ध्वनिश्च मधुरो यथा ॥
भूसंसर्गवशाच्चास्य रूपं नैव प्रतीयते ।
स्फटिकस्य जवा(१)योगाद्यथा रूपं न भासते ॥

न्यायलीलावतीकण्ठाभरणम्

द्रवत्वमेष्टव्यम्, क्वथ्यमानजलमध्यस्थपीतपटे तथादर्शनात् । किं च "वह्नेरपत्यं प्रथमं हिरण्य" मित्यागमोऽपि तैजसत्वमस्याहेत्यर्थः ।

ननु पार्थिवं तैजसं च द्रव्यं सुवर्णपदात् सकृदुच्चरितात् कथं प्रतीयेत । तथा च पीतिमाश्रय एव सुवर्णमित्यत आह-- वस्त्विति । मधुरौ ध्वनिरसावित्यत्रैव सकदुच्चरितमधुरपदाद् यथा उभयधीस्तथेहापीत्यर्थः । ननु सुवर्णं चेदुपलभ्यत एव तदा तदीयं शुक्लभास्वररूपमप्युपलभ्येत अनुपलम्भेऽपि वा सुवर्णमपि नोपलभ्येतेत्याह--भूसंसर्गेति । रूपं न प्रतीयत इति रूपगतं शुक्लत्वं भास्वरत्वं च न प्रतीयत इत्यर्थः । यद्वा रूपमेव (न?) प्रतीयते पररूपोपष्टम्भेन सुवर्णस्योपलम्भ इत्यर्थः । अत्रैव निदर्शनं —स्फटिकस्येति । भूसंसर्ग एवाभिभवो न तु बलवत्सजातीयग्रहण-कृतमग्रहणम् । एवं सत्युल्काप्रकाशवद्रात्रौ सुवर्णोपलम्भः स्यात् । उप-

न्यायलीलावतीप्रकाशः

स्त्रयोः सुवर्णादस्य भिन्नार्थत्वे कथं सकृदुच्चरितात्ततोऽर्थद्वयधीरि-त्यत आह—वस्तुभेद इति । मधुरौ ध्वनिरसावित्यत्रैवावृत्त्याऽर्थद्वय-धीरित्यर्थः । तर्हि तेजोरूपाद्यप्रतीतिः कुत इत्यत्राह—भूसंसर्गेति । उपष्टम्भकपार्थिवसंसर्गादित्यर्थः । न च "कनकरूपं चे"त्यादिना पौनरुक्त्यं तेनाभिभवाभिधानादनेन प्रतिबन्धाभिधानात् । 'अभौमं'

न्यायलीलावतीप्रकाशविवृतिः

त्वात् पार्थिवरूपस्य चालोकाभावेनाग्रहादिति वाच्यम, वन्हौ रूपं नाभिभूयत इति मत एव निर्भरत्वात् । मधुरौ ध्वनिरसाविति । वस्तुतो भूयःप्रयोगात् सुवर्णपदं पार्थिवे शक्तं तैजसे च लाक्षणिकमिति प्रतिभाति । तेनाभिभवेति । तेन रूपप्रतिबन्धकत्वाभिधानादनेन त[दा?]

---

(१) जपा ।

न चात्यन्तानलसंयोगेऽप्यनुच्छिद्यमानत्वाद्गुरुत्वमप्यभौमं स्यात् । अत्यन्ताग्निसंयोगेन नष्टगुरुत्वस्यैव पुनरुत्पत्त्याविरोधात् काठिन्यवत् । न च द्रवत्वमत्यन्तमुच्छिद्यते । अत्यन्ताग्निसंयोगेऽपि प्रत्यक्षसिद्धत्वात् । गुरुत्वाश्रयस्य भौमत्वे दाहः स्यादिति चेन्न, दाहो यदि भस्मता तदा वज्रेण व्यभिचारः । रूपान्त-

---

न्यायलीलावतीकण्ठाभरणम्

लभ्येत च तत्सन्निकर्षे द्रव्यान्तरमिति भावः । यथा तेजसि पार्थिवद्रवत्ववैधर्म्यात् द्रवत्वं तथा गुरुत्वमपि तथा स्यादित्याशङ्क्याह—न चेति । यथाग्निसंयोगान्नष्टं काठिन्यं पुनरुत्पद्यते तथा गुरुत्वमपि अन्यदुत्पद्यत इत्यर्थः । ननु द्रवत्वस्यापि कथं न पुनरुत्पत्तिस्तथा च स्वरूपासिद्धो हेतुरित्याशङ्क्याह—न चेति । यथा ध्मायमानस्य द्रवत्वमुपलभ्यते न तथा गुरुत्वं येन तन्नाशो न कल्प्यते इत्यर्थः । ननु यदि गुरुत्वाश्रयः पार्थिवं तदाग्निसंयोगाद्दह्येत न च दह्यते तस्मान्न पार्थिवम् । तथा च गुरुत्वमपि तैजसमेवेत्याह—गुरुत्वाश्रयस्येति । एतत्तर्कमूलव्याप्तौ व्यभिचारमाह—दाह इति । ननु गुरुत्वाश्रयपार्थिवस्य रूपपरावृत्तिश्चेद् भवत्येव तदा तदानीन्तनत-

न्यायलीलावतीप्रकाशः

तैजसमित्यर्थः । यद्यपि भौममपि गुरुत्वं नाग्निसंयोगादुच्छिद्यते भस्मदशाया(१)मपि किञ्चिद्गुरुत्वानुभवात् तथाप्यभ्युपगमवादोऽयम् । सुवर्णद्रवत्वमपि काठिन्यवदेव नष्टं पुनरुत्पद्यत इति न विनाशकत्वकालेऽपि तस्याध्यक्षत्वादित्याह—न चेति । 'तदा' कनकद्रवत्वद-

न्यायलीलावतीप्रकाशविवृतिः

श्रयप्रतिबन्धकत्वाभिधानादित्यर्थः । गुरुत्वस्याभौमत्वं क्वाचिदिष्टमेवेत्यत आह—तैजसमिति । भस्मीभावदशायामिति । यद्यपि प्राचीनं गुरुत्वमत्यन्तं नष्टमेव अन्यथा स्वल्पगुरुत्वानुभवविरोधात् तथापि तदाश्रयनाशादेव नष्टं न त्वग्निसंयोगादन्यथा परमाणोरपि तदा गुरुत्वनाशे तदारब्धे भस्मनि तदनुभवविरोधादिति भावः । अपा-

---

(१) भस्मीभावदशायामिति विवृतिधृतः पाठः ।

रापत्तिश्चेद्भवत्येव न प्रतीयते च तदा [रूपं,] तेजोरूपेणाभि-
भूतत्वात् । प्राकृतरूपापत्तिस्तु अग्निसंयोगनाशादौषधादासादि-
तदाहस्यैव देहस्य । [इति] तेजः ॥

न्यायलीलावतीकण्ठाभरणम्

द्रूपमुपलभ्येतेत्याह—प्रतीयत इति । तेजोरूपेणेति । अग्निरूपेणेत्यर्थः ।

ननु पुनः प्रकृतरूपदर्शनात् मध्यावस्थायामपि तदेव रूपमासीदि-
ति लक्ष्यते । तथा च कथं रूपपरावृत्तिलक्षणो दाह इत्यत आह—
प्राकृतेति । यथा चित्रकाद्यौषधदग्धशरीरभागे रूपान्तरापत्तावपि
चिरेण प्रकृतरूपदर्शनं तथा प्रकृतेऽपीत्यर्थः । अत्र यद्यपि तैजस-
स्यापि द्रवत्वस्य तारतम्यदर्शनादाग्निसंयोगानुच्छेद्यत्वमसिद्धं पा-

न्यायलीलावतीप्रकाशः

शायाम् । 'तेजोरूपेण' अग्निरूपेणेत्यर्थः । तर्ह्यद्रवदशायां यादृशं
रूपमासीत्तादृशं पुनः कथमुपलभ्यत इत्यत आह—प्राकृतेति । अत्रा-
पत्तिशब्देन ज्ञानं विवक्षितं अग्निसंयोगाभावस्य रूपान्तराहेतुत्वात्
अग्निसंयोगस्यैव तद्धेतुत्वात् । तथा च 'औषधात्' चित्रकादासा-
दितदाहस्य देहस्य तन्नाशे यथा पश्चात्प्राकृतरूपं ज्ञायते तथाऽग्नि-
संयोगस्य प्राकृतरूपज्ञानप्रतिबन्धकस्य नाशात्प्राकृतं रूपं ज्ञायत इ-
त्यर्थः । औषधाभावादितिपाठे दाहप्रतिबन्धकौषधाभावादासादित-
दाहस्य देहस्येत्यर्थः ।

अत्र वदन्ति । अत्यन्ताग्निसंयोगानुच्छेद्यं द्रवत्वमसिद्धं घृतादि-
वद् द्रवत्वतारतम्यदर्शनेन द्रवत्वोच्छेदात् उपष्टम्भकपार्थिवे व्यभि-
चारश्च । न हि तदा तदद्रवमेवास्ते । तैजसत्वसाधने परमाणुभि-
र्व्यभिचारोऽसाधारण्यं च । न चोद्भूततैजसत्वे साध्ये सपक्षाभा-
वान्नासाधारण्यं अर्थान्तरत्वात् तैजसत्वमात्रे विप्रतिपत्तेः उपष्ट-
म्भकभागे विरुद्धत्वाच्च द्रुतपार्थिवस्याप्येवं साध्यत्वापत्तेः व्यति-

न्यायलीलावतीप्रकाशविवृतिः

र्थिवत्वसाधने च वक्ष्यमाणं दूषणमित्याशयेनाह—तैजसत्वसाधन इति ।
अनित्यत्वं यदि द्रवत्वविशेषणं तत्राह—असाधारण्यं चेति । विरुद्धत्वाच्चेति ।
साध्यानवगतसहचारः साध्याभावसहचारी हेतुर्विरुद्ध इति लक्षण-
मभिप्रेत्येदमुक्तम् । द्रुतपार्थिवस्येति । उपष्टम्भके सपक्षे वृत्त्याऽसाधा-

न्यायलीलावतीकण्ठाभरणम्

र्थिवभागे व्यभिचारि च तदानीं तस्यापि द्रुतत्वात् । यदि च तैजसत्वं साध्यं तदा जलपरमाणौ व्यभिचारः, सपक्षाच्च प्रदीपादेर्व्यावृत्तावसाधारण्यम्, असाधारणनिवृत्तये द्रुततैजसं चेत् साध्यं तदाऽर्थान्तरम्, उपष्टम्भकभागे च विरुद्धम्, विशिष्टे साध्ये विशेषणभागस्य द्रवत्वस्योभयसिद्धत्वात् सिद्धसाधनं पक्षैकदेशे साध्याप्रसिद्धिरतः साध्यांशासिद्धेरपि दोषत्वात् साध्याप्रसिद्धिश्च

न्यायलीलावतीप्रकाशः

रेकव्याप्तेरविशेषात् अंशतः सिद्धसाधनाच्च द्रवत्वस्योभयसिद्धत्वात् अत्यन्तानुच्छेदकपदार्थयोरनिरुक्तेश्च साध्याप्रसिद्धिश्च । न च तेजो द्रवत्ववद् रूपवत्त्वादिति तत्प्रसिद्धिः । घटादौ व्यभिचारात् प्रसिद्धतेज.पक्षत्वे बाधादन्यत्राप्रसिद्धेः । तेजस्त्वं द्रवत्ववद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यरूपवद्वृत्तिजातित्वात् जलत्ववत् इत्यत्र च रसवद्वृत्तित्वमुपाधिः । न च रसवत्त्वं द्रवत्वसमानाधिकरणात्यन्ताभावप्रतियोगि

न्यायलीलावतीप्रकाशविवृतिः

रणयाभावादिति भावः । अंशत इति । यद्यपि पक्षैकदेशे साध्य[सि?]द्ध्यांऽशतः सिद्धसाधनं न तु साध्यैकदेशसिद्धत्वेन तथापि प्रतीतांशसाधनेऽर्थान्तरमिति साध्यैकदेशसिद्ध्यापि तुल्यं दूषणमिति भावः । साध्येति । द्रुततैजसत्वस्य क्वाप्यदर्शनादिति भावः । द्रव्यत्वेति । घटत्वादौ व्यभिचार इति व्याप्यान्तम् । आत्मत्वादौ व्यभिचार इति रूपवद्वृत्तीति । आत्मघटान्यतरत्वे व्यभिचार इति जातिपदम् । यद्यपि विरुद्धरलारब्धे निरुक्तोपाधेः साध्याव्यापकत्वं स्फुटं तथापि तदपि प्रमाणगम्यमेवेत्याशयेन द्रुतनीरसं(१)साधयति–रसवत्त्वमिति । द्रुतत्वे व्यभिचार इत्यद्रुतवृत्तीति विशेषणम् । द्रव्यत्वपदं रूपित्वपरम् । व्याप्यपदं न्यूनवृत्तिपरमतो न रूपित्वादौ व्यभिचारः । धर्मपदं चेतरनिरूपणाधीननिरूपणान्यपरमतो न द्रुतघटान्यतरत्वे न वा द्रुतघटाविति समूहालम्बनविषयत्वे व्यभिचारः । ननु पक्षस्य समवायघटितत्वेनासिद्धिः समवायभिन्नत्वस्यापि प्रतियोगिदले विशेषणत्वात् ।

---

(१) द्रुतनीरसत्वं सा० ।

न्यायलीलावतीकण्ठाभरणम्

द्रुततैजसत्वस्य क्वाप्यप्रसिद्धेः। न च तेजस्त्वं द्रवत्ववद्वृत्तिरूपवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्यजातित्वात् जलत्ववदित्यनुमानात् द्रुततैज-सत्वसिद्धिः, रसवत्त्वस्यात्रोपाधित्वात्। न चाद्रुतवृत्तिद्रव्यत्वसाक्षा-द्व्याप्यधर्म्मत्वेन रसवत्त्वस्य द्रवत्वसमानाधिकरणात्यन्ताभावप्रति-योगित्वं साध्यं तथा च द्रुततेजःसिद्धौ रसवत्त्वं साध्याव्यापकत्वा-न्नोपाधिरिति वाच्यम्, अत्रापि तेजोमात्रावृत्तित्वस्योपाधित्वात्।

न्यायलीलावतीप्रकाशः

अद्रुतवृत्तिद्रव्यत्वव्याप्यधर्मत्वात् घटत्ववदिति द्रुततेजःसिद्धौ सा-ध्याव्यापकत्वं तेजोमात्रावृत्तित्वस्योपाधित्वात्। न च पक्षेतरत्वं प्र-दीपत्वादेरपि व्यावर्त्यत्वात्। अत एवेदमपार्थिवं अत्यन्ताग्निसंयो-गानुच्छिद्यमानद्रवत्वात् जलपरमाणुवदिति नानुमानं असिद्धेरुप-ष्टम्भकभागे व्यभिचाराच्च। द्रवत्वानुच्छेदकाग्निसंयोगवत्त्वं च घ-टादावनैकान्तिकम्। सुवर्णारम्भकाः परमाणवो न पार्थिवाः अत्यन्ता-ग्निसंयोगेऽपि भस्मानारम्भकत्वादित्यपि घटादौ व्यभिचारि। पर-माणुत्वेन विशेषणे त्वसिद्धिः तैरपि कदाचिद्भस्मारम्भाभ्युपगमात्।

न्यायलीलावतीप्रकाशविवृतिः

मिश्रास्तु धर्मपदं भावपरमतो नान्यतरत्वे व्यभिचारः। वृत्तिश्च विषयतातिरिक्ता विवक्षितेति न समूहालम्बनविषयत्वे व्यभिचार इति वदन्ति।

वस्तुतो रसत्वं द्रवत्वसमानाधिकरणात्यन्ताभावप्रतियोगिताव-च्छेदकं अद्रुतवृत्तिरूपव्याप्यमात्रवृत्तिजातित्वादित्यत्रोक्तानुमानतात्प-र्यम्। यदि च विरुद्धरसारब्धे साध्याव्यापकत्वपरिहाराय रसवद्वृत्ति-जातिमत्त्वमुपाधिरित्युच्यते तदोक्तसाध्ये द्रवत्वाधिकरणे विरुद्धर-सानारब्धत्वं विशेषणमतो नार्थान्तरमिति दिक्। द्रुततेज इति। तेजः पदं तु नीरसपरम्। उक्तानुमानेन तावत एव सिद्धेः प्रकृतोपयो-गाच्च। अत एव वक्ष्यमाणोपाधेरपि न साध्याव्यापकत्वमित्यवधे-यम्। साध्याव्यापकत्वं तद्वृत्त्यसमानाधिकरणरसवत्त्वोपाधेरिति शेषः। तेजोमात्रेति। सत्तादौ साध्याव्यापकत्वनिरासाय मात्रपदम्। उपष्टम्भकभाग इत्युपलक्षणं क्वथ्यमानजलमध्यस्थघृतेऽपीति द्रष्ट-व्यम्। द्रवत्वेति। अत्र च नासिद्धिस्तदुच्छेदकाग्निसंयोगसत्त्वेपि तदनु-

न्यायलीलावतीकण्ठाभरणम्

न च पूर्वहेतुना तैजसत्वं न साध्यं किन्त्वपार्थिवत्वं तथा च जन्यपरमाणुरन्वयदृष्टान्त इति वाच्यम्, उपष्टम्भकभागे व्यभिचारादसिद्धेश्च। न च सुवर्णारम्भकाः परमाणवो न पार्थिवा अत्यन्ताग्नि-

न्यायलीलावतीप्रकाशः

किञ्च सुवर्णं पार्थिवं(१) अग्निसंयोगासमवायिकारणकद्रवत्वाधिकरणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वात् घृतवदिति प्रतिरोधोऽपि। न च तेजो नैमित्तिकद्रवत्वसमानाधिकरणतेजस्तदितरावृत्तिजातिमत् शीतस्पर्शासहचररूपवत्त्वात् पृथिवीवदिति तेजसि नैमित्तिकद्रवत्वसिद्धिः, पृथिवीत्वस्योपाधित्वात्। न च पृथिवीत्वं नैमित्तिकद्रवत्व-

न्यायलीलावतीप्रकाशविवृतिः

च्छेदकस्याग्निसंयोगस्याविरोधादिति भावः। अग्निसंयोगेति। द्रवत्वं विनैव नष्टसुवर्णेऽसिद्धिवारणाय जातिगर्भता। आलोकादौ व्यभिचार इति द्रवत्वाधिकरणवृत्तीति। सत्तामादाय स एव व्यभिचार इति द्रव्यत्वव्याप्येति। व्याप्यत्वं च भेदगर्भम्। आलोकघृतान्यतरत्वमादायालोके व्यभिचार इति जातिपदम्। अत्र न तैजसमितिसाध्यस्य पार्थिवमित्यर्थः। तेन जले व्यभिचारवारकत्वेनाग्नीत्यादिपदसार्थकता। क्वचित्तु पाठ एव तथा। अग्निपदसंयोगासमवायिपदयोस्तु विकल्पेनान्वये हेतुद्वयं तावतैवादृष्टवदात्मसंयोगं निमित्तमादाय जले प्रसक्तस्य व्यभिचारस्य वारणादिति ध्येयम्। धर्मिपक्षतायां यो विकल्पः स वक्ष्यमाणसाध्येऽपीति आलोकादिपक्षतायामप्यक्षतेरित्यभिप्रेत्याह—न च तेज इति। सत्तामादाय सिद्धसाधनमिति तदितरावृत्तित्वं विशेषणम्। दृष्टान्तासिद्ध्यर्थं तेजस इति। उभयावृत्तित्वं च पृथिवीत्वेऽपीत्यदोषः। न च जातिपदं व्यर्थं तस्य धर्ममात्रपरत्वादनुपादेयत्वाद्धेति मिश्राः।

अत्रेदं चिन्त्यम्। तथा सति घृतजलान्यतरत्वमादाय जलेऽपि साध्यसत्त्वात्तत्र व्यभिचारवारणाय शीतेत्यादिविशेषणवैयर्थ्यमग्रे वाच्यम। पृथित्वोपाधेश्च जले साध्याव्यापकत्वमिति। वयं तु अवृत्तिपदं समवेतपरम्। तथा च घृततेजोऽन्यतरत्वमादाय सिद्धसाधनवारणाय जातिपदं समवेतपरमुपादेयमिति ब्रूमः।

---

(१) सुवर्णं न तैजसं पार्थिवं वेति क्वचित् पाठः। सुवर्णं न तैजसमित्यपि पाठः।

न्यायलीलावतीकण्ठाभरणम्

संयोगेऽपि भस्मानारम्भकत्वादिति मानम् ,घटादौ व्यभिचारात्। न च परमाणुत्वेन विशेषणीयम्, असिद्धेः, न हि ते परमाणवो न भस्मारभन्ते। किं च सुवर्णं पार्थिवं गुरुत्वाश्रयत्वात् पीतिमाश्रयत्वात् नैमित्तिकद्रवत्वाश्रयत्वादित्यादिना प्रतिरोधः। तथापि सुवर्णं तैजसं असति विरोधिद्रवद्रव्यसंयोगेऽत्यन्ताग्निसंयोगानाश्यानित्यद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवमिति व्यतिरेक्यनुमानात् तत्सिद्धिः। न चासिद्धिः द्रवत्वोच्छेदेऽपि द्रवत्वान्तरसामग्रीसमवधानमत्र नि-

न्यायलीलावतीप्रकाशः

समानाधिकरणात्यन्ताभावप्रतियोगि गन्धवन्निर्गन्धवृत्त्यन्यजातित्वात्(१)जलत्ववदिति पृथिवीभिन्ननैमित्तिकद्रवत्वं साध्यते, सकलगन्धववृत्तित्वेन प्रतिरोधात्। सुवर्णं तैजसं सुवर्णं तेजोवृत्ति संयोगवत्त्वादालोकवदित्यपि न, अतैजससुवर्णसंयोगवत्त्वेन प्रतिरोधात। तेजस्त्वं

न्यायलीलावतीप्रकाशविवृतिः

हेतौ जातौ (२)व्योमादौ च व्यभिचारवारणाय पदद्वयम्।

गन्धवन्निर्गन्धेति। यद्यप्यन्यतरावृत्तित्वगर्भतयैव व्याप्यता तथाप्यखण्डाभावतया न व्यर्थता। प्रयोजनं तु मिलितोपादानस्य स्वरूपासिद्धिदृष्टान्तासिद्धिवारणमेवेति मिश्राः। तत्रेदं चिन्त्यम्। एवं सति जातिपदव्यर्थता। न च नैमित्तिकद्रवत्ववत्त्वे(३) व्यभिचारवारणाय तत्, तेजोनैमित्तिकद्रवत्ववादिमते तत्र प्रथमविशेषणस्यैवाभावात। तस्माद्गन्धवन्निर्गन्धवृत्तिपदं सत्ताद्रव्यत्वोपलक्षकमिति तदन्यजातित्वं हेतुः। जातिपदं च नैमित्तिकद्रवत्व एवैवं सति व्यभिचारवारकमिति। यद्वा गन्धवत्पदेनपृथिव्या निर्गन्धपदेन च पृथिवीभिन्नसकलद्रव्याभिधानात् सकलद्रव्यावृत्तिजातित्वं हेतुरिति। सकलेति। घटत्वादौ व्यभिचारवारणाय सकलेति(४)। न च विरुद्धगन्धवदारब्धघृतभिन्नत्वे व्यभिचारः, जातित्वेन विशेषणात्। गन्धवत्पदस्य पृथिवीपरत्वाद्वा। न च गन्धवत्पदवैयर्थ्यं स्वरूपासिद्धिवारकत्वादिति वाच्यम्, गन्धवन्निष्ठात्यन्ताभावाप्रतियोगित्वस्याखण्डस्य हेतुत्वादिति

(१) निर्गन्धो गन्धायोग्यः। अखण्डाभावे वैयर्थ्याभावेऽपि गन्धवदित्यनतिप्रयोजनकं घटत्वादेरपि दृष्टान्तत्वसम्भवात्। क्वाचित्कं च जातिपदं वृत्तेः समवायरूपताद्योतनाय। इति दीधितिः।

(२) जात्यादौ। (३) द्रवत्वे। (४) घटत्वादिर्व्यभिचार इति सकलपदम्। इत्यपि पाठः।

न्यायलीलावतीकण्ठाभरणम्

यतम्, घृतद्रवत्वे तु न तथा, तत्रात्यन्तनाशस्यैवोपलब्धेः। अत्र तु तारतम्यमात्रानुमेयो नाशः। एवं च द्रवत्वसामग्र्यसमवहिताग्निसंयोगजन्यध्वंसप्रतियोग्यवृत्तिद्रवत्व(त्व?)व्याप्यजातिमद् द्रवत्वं घृतादिद्रवत्वविलक्षणं तैजसत्वे लिङ्गं पर्यवस्यति। तदापि क्वाचित्कीं द्रवत्वसामग्रीमादाय स्वरूपासिद्धिशङ्कया समानाधिकरणपदमप्यत्र प्रक्षिपन्ति।

यद्वा पीतिमगुरुत्वाश्रयो द्रव्यं विजातीयरूपप्रतिबन्धकद्रव-

न्यायलीलावतीप्रकाशः

सुवर्णभिन्नतेजोभिन्नवृत्ति समस्ततेजोवृत्तित्वात् द्रव्यत्ववदित्यत्र तेजोभिन्नवृत्तित्वमुपाधिः।

यत्तु पार्थिवं रूपमत्यन्ताग्निसंयोगादसति विरोध्यन्तरे परावर्त्तते सति तु नेति नियमः, दह्यमानेषु पटादिषु दर्शनेन जलसम्बन्धाच्च तेष्वेवादर्शनेन कार्यकारणभावव्यवस्थितेः। अतः पार्थिवपीतरूपपरावृत्तिप्रतिबन्धकं तेजः सुवर्णमित्युच्यते। तन्न, रूपापरावृत्तिर्नाविनाशः, असिद्धेः तादृशतेजःसंयोगेन पूर्वद्रव्यनाशे रूपनाशस्यावश्यकत्वात्। नापि सजातीयरूपानु-

न्यायलीलावतीप्रकाशविवृतिः

दिक्। सुवर्णभिन्नं यत् तेजस्तद्भिन्नवृत्तित्वं वा साध्यम्। इदं च सुवर्णवृत्तितया (१)वा। तत्रान्त्यस्य बाधात्प्रथममादाय पर्यवसानमित्यर्थः। यद्यपि सुवर्णवृत्तीत्येव सम्यक् तथापि तथा साध्ये द्रुतत्वाभावे निश्चितसाध्याभाववति हेतोः सन्देहेन सन्दिग्धानैकान्तिकमिति विशिष्टं साध्यम्। तच्चाकाशादिवृत्तितयैव द्रुतत्वाभावेऽक्षतमिति वदन्ति। तच्चिन्त्यम्। एवमपि सुवर्णभिन्नतेजस्त्वे व्यभिचार[एव]सन्देहात्। यदि चोक्तानैकान्तिकस्य पक्षताघटकसन्देहाधानतया(२) अतादृशव्यभिचारज्ञानस्यैव दूषकतया न तस्य दूषणता तदा पूर्वोक्तव्यभिचारसन्देहोऽपि तथेति। तस्माद्यथोक्तविशेषणविशेष्यभावे न वैयर्थ्यमित्येव सम्यक्।

तेजोभिन्नेति। अत्र द्रव्यपदमविवक्षितार्थमतो न रूपादौ साध्याव्यापकता। यदि च साध्येऽपि द्रव्यपदं तदा यथाश्रुतमेव

(१) तेजोभिन्नवृत्तितयां वेत्यधिकं द्वितीयपुस्तके। (२) ०कसन्देहाभिमततया।

न्यायलीलावतीकण्ठाभरणम्

द्रव्यसंयुक्तमत्यन्ताग्निसंयोगेऽपि पूर्वरूपविजातीयरूपानाधारपार्थिवत्वात् क्वथ्यमानजलमध्यस्थपीतपटवत् । न चाप्रयोजकं पीतिमाश्रयो द्रव्यं यदि पूर्वरूपविजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तं न स्यात् पूर्वरूपविजातीयरूपवत् स्यादित्यनुकूलतर्कस्य सत्त्वात् ।

न्यायलीलावतीप्रकाशः

वृत्तिः सन्तानाविच्छेदो वा, पार्थिवावयविनि व्यभिचारात्(१)। पृथिव्यामपि तयोर्बहुश उपलम्भात्, पृथिवीवैधर्म्यवत्तेजोवैधर्म्यस्याप्यप्रकाशकत्वादेर्भावात्(२)। किञ्च(३)अपार्थिवत्वे साध्ये अग्निसंयोगाविनाश्यरूपाधिकरणत्वमनैकान्तिकमसिद्धं च(४)। अत्यन्ताग्निसंयोगनाश्यरूपाधिकरणवृत्तिपृथिवीत्वव्याप्यजातिशून्यत्वं च (५) पार्थिवपरमाणौ व्यभिचारि, तत्र पृथिवीत्वव्याप्यजात्यनङ्गीकारात्। अत्यन्ताग्निसंयोगजन्यरूपाधारावृत्तिजातिमत्त्वं चासिद्धम्, दाहेन रक्तसारतादर्शनात् । तादृशं रूपमभिभावकस्येत्यत्र मानाभावात् ।

न्यायलीलावतीप्रकाशविवृतिः

सम्यगिति ध्येयम् । व्यभिचारादिति । विरोधिद्रवद्रव्यसम्बन्धस्येति शेषः । तथा च यथा सत्यप्यग्निसंयोगे विरोधिद्रवद्रव्यसम्बन्धं विनापि घटादौ सजातीयरूपानुवृत्त्यादिस्तथा प्रकृतेऽपि स्यादित्यर्थः । नन्वनुच्छिद्यमानद्रवत्वेनैवापृथिवीत्वं साध्यं तथा सति प्रकाशकत्वाभावेनातेजस्त्वस्यापि सिद्ध्यापत्तेरित्याह--पृथिवीति । अनैकान्तिकमिति । अवयविनीति शेषः । यदि च पाकेनावयविन्यपि रूपपरावृत्तिरुपेयते तत्राह--असिद्धं चेति । दाहेन रक्तसारतादर्शनादिति भावः । अत्यन्तेति । सत्तादिकमादायासिद्धिरिति पृथिवीत्वव्याप्येति । विशिष्टाभावतया चाव्यर्थता । परस्य पृथिवीत्वव्याप्यजातिः सुवर्णत्वमेव पक्ष इति वृत्त्यन्तम् । सुवर्णं त्वग्निसंयो-

---

(१) नैयायिकनय इति शेषः । (२) महत्त्वोद्भूतरूपवत्त्वे सत्यप्रकाशकत्वं तेजोवैधर्म्यमिति भावः । (३) द्रवत्वविशेषेणेव रूपविशेषेणापि केषांचिदपार्थिवत्वं दूषयति—किञ्चेति । इति दीधितिः ।

(४) विनाश्यत्वं विनाशोपधानं तद्योग्यता वा आद्येऽनैकान्तिकता । आमविनष्टे घटादौ । द्वितीयेऽसिद्धत्वं पाकेन रूपतारतम्यस्यानुभवसिद्धत्वात् । इति दीधितिः ।

(५) संयोगजन्यरूपाधारावृत्तिजातिमत्त्वमर्थः । इति दीधितिः ।

न्यायलीलावतीप्रकाशः

अत्रोच्यते। विवादाध्यासितं द्रवत्वाधिकरणं तैजसं असति विरोधिद्रवद्रव्यसम्बन्धे अत्यन्ताग्निसंयोगानुच्छेद्यानित्यद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा घृतम्। न चासिद्धिः, घृते हि द्रवत्वोच्छेदकाले समानाधिकरणद्रवत्वसामग्रीसमवधानं नास्ति सुवर्णे त्वस्ति। एवं च समानाधिकरणद्रवत्वसामग्र्यसमवहिताग्निसंयोगजन्यध्वंसप्रतियो·

न्यायलीलावतीप्रकाशविवृतिः

गानाश्यरूपाधिकरणमिति भावः। न चैतन्मते परमाणुरूपस्यैवाग्निसंयोगनाश्यतया तादृशरूपाधिकरणवृत्तिपृथिवीत्वव्याप्यजात्य(१)सिद्धिः, न्यायमतेनैवास्याभिधानात्। तन्नाश्यत्वेन तत्प्रयोज्यनाशप्रतियोगित्वस्य विवक्षितत्वाद्वा। न च दाहेन रक्तसारतामात्रदर्शनादन्यतरासिद्धितादवस्थ्यम्, व्यभिचारवत्तस्या अपि दोषत्वेनाभिप्रेतत्वात्। कचित्तु (२)अग्निसंयोगाविनाश्येति पाठः। सुवर्णे त्वग्निसंयोगनाश्यरूपाधिकरणमेवावयविपाकमतेनैवास्याभिधानादिति नासिद्धिरित्याहुः। असतीति। क्वथ्यमानजलमध्यस्थितघृते व्यभिचार इति प्रथमविशेषणम्। अवयवात्मकद्रवद्रव्यसम्बन्धमादायासिद्धिरिति विरोधीति। स्वरूपाग्निसंयोगवति घृते व्यभिचार इति अत्यन्तेतिविशेषणम्। जलपरमाणौ व्यभिचार इत्यनित्येति। संख्यादिकमादाय घटादौ व्यभिचार इति द्रवत्वेति। जलावयविद्रवत्वं चाग्निसंयोगनाश्यमेवेति न जलावयविनि व्यभिचारः। समवधानं समवधाननियमः। केचित्तु घृतसुवर्णयोरग्निसंयोगनाश्यानाश्यत्वाभ्युपगमेनेदमिति च घृते व्यधिकरणद्रवत्वसामग्रीसमवधानेऽपि समानाधिकरणद्रवत्वसामग्रीसमवधानं नास्तीत्याहुः(३)। सुवर्णे त्विति। अग्निसंयोगनाश्यद्रवत्वोच्छेदसमय इति शेषः। जलसंयोगजन्यद्रवत्वोच्छेदसमये तादृशसामग्रीविरहादिति भावः। एवं चेति। न च नञ्द्वयं व्यर्थं अग्निसंयोगेन द्रवत्वनाशानन्तरं घृते द्रवत्वान्तरजननपक्षे तत्रैव व्यभिचारवारकत्वात्। तदनभ्युपगन्तृमतेऽपि तेजःसंयोगजन्यतावच्छेदकजातिमादाय तत्रैव तथात्वात्। न च तन्मते तादृशसामग्रीसमवहिताग्निसंयोगजन्यध्वंसप्रतियोगिद्रवत्वादित्येव स·

---

(१) जात्यप्रसिद्धः। (२) केचित्तु। (३) ऽस्तीत्यर्थः।

न्यायलीलावतीप्रकाशः

ग्यवृत्तिद्रवत्वत्वव्याप्यजातिमद्द्रवत्वं हेतुः । उपष्टम्भके च न द्रवत्वं पार्थिवद्रवत्वस्याग्निसंयोगेनोच्छेदापरया बाधकेन द्रुतप्रतीतिर्भ्रमत्वात् । न चैवं पीतिमगुरुत्वाश्रये काठिन्योपलम्भापत्तिः, जलमध्यस्थितमसीक्षोदादेरिव द्रवद्रव्यसम्बन्धेन प्रशिथिलसंयोगवत्त्वात् । जलपरमाणौ च नानित्यं द्रवत्वम् । न चासाधारण्यं अगृह्यमाणविशेषदशायां तस्य दोषत्वात् । तथा हि साध्याभाववद्व्याप्यवृत्तत्वस्येव साध्यवद्व्यावृत्तत्वस्यापि सत्त्वात् सत्प्रातिपक्षोत्थापकतया तस्य दोषत्वम् । न च साध्याभावसाधकस्य पृथिवीत्वासिद्धिपर्यवसायिनस्तुल्यबलत्वं अनुकूलतर्कविरहेणात्यन्ताग्निसंयोगात् द्रवत्वोच्छेदात्मकप्रातिकूलतर्केण च तस्य हीनबलत्वात् । तेजस्त्वसाधकस्य चानुकूलतर्कप्रतिकूलतर्काभावाभ्यामधिकबलत्वात् । यदापि सांशयिकत्वेनासाधारण्यस्य दोषत्वं तदापि विशेषादर्शनसहकृतस्य तथात्वम् । प्रकृते चोक्ततर्कस्य विशेषदर्शनस्य सत्त्वात्तदभावात् ।

न्यायलीलावतीप्रकाशविवृतिः

स्यागिति वाच्यम्, यथोक्ते वैयर्थ्याभावात् । गुरुत्वादिकमादाय घटे व्यभिचारवारणाय द्रवत्वव्याप्यपदम् । व्याप्यपदद्रवत्वपदयोर्विकल्पेनान्वये हेतुद्वयम् । जलावयविद्रवत्वं चाग्निसंयोगनाश्यमेवेतिमतेनायं हेतुरतो न जलावयविनि व्यभिचारः । द्रवत्वपदं नैमित्तिकद्रवत्वपरमित्येके । सुवर्णे चरमद्रवत्वनाशकाले यद्यपि तादृशसामग्री नास्ति तथापि स नाशो नाग्निसंयोगजन्य इति विशिष्टाभावगर्भहेतुसिद्धिरविकला । अत्र चानित्यपदं असतीत्यादिपदं च न प्रयोज्यं तदनन्तर्भावेणैव साधुत्वात् । द्रवत्वनाशकाग्निसंयोगस्य समानाधिकरणतादृशद्रवत्वसामग्रीसमवधानं पीलुपाकमते परमाणौ न्यायमते त्ववयविन्यपीति दिक् ।

उपष्टम्भकस्य विजातीयितया तद्द्रवत्वस्य सुवर्णद्रवत्वतुल्यतामभिप्रेत्याह—उपष्टम्भक इति । जलपरमाणाविति । एतदपि यथाश्रुतहेत्वभिप्रायकम् । अगृह्यमाणेति । इदं च यथाश्रुतहेत्वभिप्रायेण समाधानम् । यदि च तादृशद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वे हेतौ तात्पर्यम्, तदालोकादिव्यावृत्त-

नतु वायुसत्त्वे किं मानम्, अध्यक्षमनुमानं वा। नाद्यः,

न्यायलीलावतीकण्ठाभरणम्

नन्विति। नीरूपे स्पर्शाश्रयत्वे किं मानमित्यर्थः। मीमांसकमते मानमध्यक्षमिति। नैयायिकमतेनोत्तरमनुमानमिति। पूर्वपक्षिण एव

न्यायलीलावतीप्रकाशः

किञ्च पीतिमगुरुत्वाश्रयो द्रव्यं यद्यत्यन्ताग्निसंयोगिपार्थिवत्वे सति विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयोगि स्यात् पूर्वरूपविजातीयरूपवत् स्यात् अग्निसम्बद्धपटवदिति स्थिते प्रयोगः--अत्यन्ताग्निसंयोगिपीतिमाश्रयो द्रव्यं विजातीयरूपप्रतिबन्धकद्रवद्रव्यसयुक्तं प्रहरपर्यन्तमग्निसंयोगे सति पूर्वरूपविजातीयरूपानाधारपार्थिवत्वात् जलमध्यस्थिताग्निसंयुक्तपीतपटवत्। न चाप्रयोजकत्वं विरोधिद्रव्यसम्बन्धं विना पार्थिवेऽत्यन्ताग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वादित्यस्माकं पैतृकी राद्धान्तसरणिः।

नन्विति। पृथिव्यप्तेजोभिन्नस्य स्पर्शाधारत्वे किं मानमित्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

त्वनिश्चयाभावान्नासाधारण्यमित्यवधेयम्। किं चेति। अग्न्यसंयुक्तजले पटेऽपि व्यभिचारवारणायाद्यविशेषणद्वयम्। जलमध्यस्थघृते व्यभिचारवारणाय विजातीयेति। प्रहरेति। अत्र रूपानाधारत्वं पीतरूपानाधारत्वम्। अन्यथा सजातीयरूपवति भस्मादौ व्यभिचार इत्यवधेयम्। अत एव दृष्टान्ते पीतत्वग्रहणमपि सङ्गच्छते। अत्र चावयविपाकमतेऽवयविनः पीलुपाकमते परमाणोरेव पक्षता। तन्मते द्रवद्रव्यसम्बन्धस्यावयविनाशप्रतिबन्धकत्वेऽपि तद्रूपोत्पत्तिप्रतिबन्धकत्वाभावात्। यद्यप्यनेनापि तेजस्त्वं नायाति तथापि रूपवत्त्वेन वायुत्वे निरस्ते नैमित्तिकद्रवत्वेन जलत्वनिरासे अनुच्छिद्यमानद्रवत्वेन पृथिवीत्वनिरासे धर्म्मिकल्पनात इति न्यायेन दशमद्रव्यत्वनिरासे परिशेषात् तेजस्त्वमिति भावः।

सिद्ध्यसिद्धिव्याघातभयादाह—पृथिवीति। परस्य प्रत्यक्षत्वमात्रं न साध्यम्, अपि तु बहिरिन्द्रियप्रत्यक्षत्वमेव, तत्रैव परेण स्पर्शवत्त्वप्रयोजकत्वस्वीकारादिति तदभावसाधनमेव सम्यगित्यरुचे·

अरूप(१)द्रव्यत्वात् । नेतरः, (२)लिङ्गाभावात् । स्पर्शादिचतुष्कं

न्यायलीलावतीकण्ठाभरणम्

एकग्रन्थेन वा विकल्पः । अरूपीति । आत्मभिन्नारूपिद्रव्यत्वात् । चतुष्कमिति । स्पर्शः शब्दो धृतिः कम्पश्चेत्यर्थः । आद्यस्यान्यथासिद्धि-

न्यायलीलावतीप्रकाशः

अरूपेति । बाह्येन्द्रियाप्रत्यक्षत्वस्य साध्यत्वान्नात्मनि व्यभिचारः । आत्माभिन्नत्वेन हेतुर्विशेष्य इत्यन्ये । ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् । न च साधनावच्छिन्नसाध्यव्यापकं रूपवत्त्वमुपाधिः स्पार्शनप्रत्यक्षत्वे तस्याप्रयोजकत्वान्महत्त्वे सत्युद्भूतस्पर्शस्यैव तन्त्रत्वात्, न तूद्भूतरूपवत्त्वे सति गौरवात् । ऊष्मादेश्च स्पार्शनत्वान्न व्यभिचारः । न च वायोः प्रत्यक्षत्वे तद्गतसंख्यादिप्रत्यक्षत्वापत्तिः व्यक्तौ व्यभिचारात् पृष्ठलग्नवस्त्रादिव्यक्तेः संख्याद्यग्र-

न्यायलीलावतीप्रकाशविवृतिः

राह—अन्य इति । वायुरिति । हेतूकर्त्तव्यधर्म्माश्रय इति शेषः । तेन न भागबाधासिद्ध्योः प्रसङ्गः । प्रत्यक्ष इति । स्वातिरिक्ताविशेष्यकसाक्षात्कारकजनक इत्यर्थः । तेन न सामान्यादिप्रत्यासत्तिजप्रत्यक्षमादायार्थान्तरम् । स्वविशेष्यकप्रत्यक्षजनकत्वेऽपि वायुघटितसंयुक्तसमवेतविशेषणतात्मक(३)प्रमेयत्वघटिता यत्र प्रत्यासत्तिस्तत्र तज्जन्यप्रत्यक्षविषयतामादायार्थान्तरमेवेति नञ्द्वयगर्भं साध्यम् । निर्विकल्पकविषयत्वमेव साध्यमिति मिश्राः । संयोगमात्रप्रत्यासत्तिजन्यज्ञानविषयत्वं साध्यमित्यन्ये(४) । वस्तुतो ज्ञानव्यतिरेकाप्रयुक्तव्यतिरेकप्रतियोगिज्ञानाविषयत्वं साध्यम् । प्रत्यक्षेति । यथा साध्ये प्रत्यक्षत्वं निरुक्तं तथैव हेतौ प्रवेश्यमन्यथा व्यभिचारापत्तेः । न चाश्रयत्वमधिकं स्पर्शवत्सम्बन्धस्याहेतुत्वाविरोधात् । अत्र प्रत्यक्षत्वं स्वरूपयोग्यतामात्रं फलोपधानस्य शीतो वायुरित्यादावभावेन प्रत्यक्षत्वाप्रयोजकत्वात् । साधनेति । साधनैकदेशेत्यर्थोऽन्यथा वैयर्थ्यात् । वस्तुतः साधनादेरवच्छेदकत्वं सामानाधिकरण्यमात्रमिति न लाघवगौरवावतारः । तद्विषयं प्रत्यक्षविषयत्वं शङ्कते--तस्यापीति ।

---

(१) अरूपिद्र० । (२) नापरः । (३) तात्मिका प्र० । (४) मित्यपरे।

न्यायलीलावतीप्रकाशः

हेऽपि त्वचाग्रहात् तज्जातीये च फूत्कारादौ संख्यादेर्ग्रहात्। न च प्रत्यक्षविषयत्ववत् बहिरिन्द्रियजन्यतद्विषयत्वमपि नैकरूपाव-च्छेद्यं सति सम्भवे बाधकाभावे च त्यागायोगात् तथापि नोद्भूत-स्पर्शवत्त्वं तथा चन्द्रमहसि तदभावात्। नापि जन्येन्द्रियग्राह्यविशे-षगुणवत्त्वं कार्यमहत्त्वसमानाधिकरणविशेषगुणवत्त्वं वा रसनगत-पित्तद्रव्यस्योद्भूततिक्तरसस्य वायूपनीतसुरभिभागस्य च प्रत्यक्ष-त्वापत्तेः, किं तूद्भूतरूपवत्त्वं तथेति चेन्न, नयनगतपित्तद्रव्यस्य प्रत्यक्षत्वापत्तेः। अथ वायुर्यदि स्पार्शनप्रत्यक्षविषयद्रव्यं स्यादुद्भु-तरूपः स्यात् न चैवं तस्मान्न तथा तादृशद्रव्यस्य रूपजनकत्वनिय-मादिति चेन्न, रूपवत्समवेतद्रव्यत्वस्य तत्प्रयोजकत्वात्। तादृशप्र-त्यक्षविषयत्वस्य रूपजननोत्तरभावितया तत्रातन्त्रत्वात्। घटो यदि चक्षुरितरेन्द्रियग्राह्यद्रव्यं स्यादरूपमचाक्षुषं स्यान्न चैवं तस्मान्न त-थेति घटस्याप्यस्पार्शनत्वापत्तेः। अत्राहुः। चलति पक्षिकाण्डादौ पूर्वदेशविभागोत्तरदेशसंयोगयोरप्रत्यक्षत्वे चलतीतिधीस्तल्लिङ्गिका-पि न स्यात् पूर्वदेशोत्तरदेशयोः प्रभामण्डलयोरनुद्भूतस्पर्शत्वेना-

न्यायलीलावतीप्रकाशविवृतिः

जन्येति। व्योमादिवारणाय जन्येति। जन्यशरीरादिग्राह्यशब्दवत्तया स एवातिप्रसङ्ग इति इन्द्रियेति। ग्राह्यो लौकिकप्रत्यक्षविषयस्तेन नो-पनीतभानमादाय व्योमादावतिप्रसङ्गः। कार्येति। आत्मन्यतिव्याप्तिवा-रणाय कार्यमहत्त्वपदे। एकैकेन तदवारणात्। घटात्मसंयोगमादाय तत्रैवातिव्याप्तिवारणाय विशेषपदम्। न चैवमपि चक्षुरादावतिप्रस-क्तिः विशेषगुणपदेन गुणविशेषस्य प्रत्यक्षगुणस्योक्तत्वात्। नयनगतेति। तत्र रूपमेव गृह्यते न तु तदाश्रयो द्रव्यमिति स्वमतेन, न्यायप्राच्य-मतावलम्बनेन वेदमन्यथेष्टापत्तेः। अन्यथेति। अत्र विषयत्वं तद्विशेष्य-त्वम्। उद्भूतरूपः प्रत्यक्षरूपः, तेन रूपवत्समवेतत्याद्यग्रिमग्रन्थवि-रोधो न। अन्यथा परमाणावभावेन रूपवत्समवेतत्वस्य(१) उद्भूरूप-जनकतायामप्रयोजकत्वेन तद्विरोधापत्तेः। रूपवत्समवेतत्वमुद्भूत-रूपवत्समवेतत्वं तेन द्व्यणुके व्यभिचारः। चलतीति। तथा चोद्भूतरू-पवत्त्वमेव प्रयोजकमिति वायुरप्रत्यक्षः। न चैवं चान्द्रप्रभासंख्यादि-

(१) अन्यथा परमाणुत्वाभावेन रूपवत्समवेतजन्यत्वस्य उद्.।

न्यायलीलावतीप्रकाशः

प्रत्यक्षत्वात् । न च पूर्वोत्तरदेशानुपलम्भोपलम्भाभ्यां तयोरनुमानं पूर्वोत्तरदेशयोरप्रत्यक्षत्वेन लिङ्गासिद्धेरित्युद्भूतस्पर्शवत्त्वं(१) तत्राप्रयोजकम् । अथ शीतो वायुरित्याद्यारोपो न स्पार्शनः विशेष्यस्यायोग्यत्वात् । न च प्रमायां तथा सामान्ये बाधकाभावात् । न चानुमानोपनीतवायौ त्वगुपनीतस्पर्शस्य मनसारोपः, तल्लिङ्गस्पर्शादिचतुष्काग्रहणात् । शीतस्पर्शस्यातल्लिङ्गत्वात् । न च शीतद्रव्योपनायकत्वेनानुमिते वायौ मनसा शीतारोपः, तदा शीतस्पर्शानाश्रयत्वेन प्रमिते वायौ तदनारोपात् । न च स्वप्नविभ्रमवन्मानसोऽयं भ्रमः, वहिरिन्द्रियव्यापारानुविधानात् । मैवम् । यथा हि वायुवैधर्म्येण जलवृत्तितया गृहीतस्य शीतस्पर्शस्य वायावारोपः, दिङ्मोहवद्दोषमाहा-

न्यायलीलावतीप्रकाशविवृतिः

ग्रहापत्तिः । विष्वग्विसारि(स?)जातीयसम्बन्धस्य दोषस्य(२) प्रतिबन्धकत्वात् । अन्यथा सौरप्रभासंख्याग्रहापत्तेस्तत्रापि तुल्यत्वात् । अत्र वदन्ति । चाक्षुषत्वे उद्भूतरूपवत्त्वं स्पार्शनत्वे उद्भूतस्पर्शवत्त्वं वहिरिन्द्रियप्रत्यक्षे द्रव्यग्राहकवहिरिन्द्रियव्यवस्थापकगुणवत्त्वं प्रयोजकमस्तु यद्विशेषयोरिति न्यायादिति । अत्र ब्रूमः । वहिरिन्द्रियाणां द्रव्यग्राहकत्वं द्रव्ये वहिरिन्द्रियग्राह्यत्वबुद्धिवेद्यं तच्च ग्राह्यत्वमवच्छेदकं विना दुर्ग्रहमिति तत्त्वेन उद्भूतरूपवत्त्वमेव कल्प्यते चलतीतिप्रतीत्यनुरोधात् । यदि च रूपेण प्रभामनुमाय तद्देशोपलम्भानुपलम्भाभ्यां चलतीतिधीः तदा तूभयमपि प्रयोजकं विनिगमकाभावात्, तथापि वायुरप्रत्यक्ष एव । यत्तूद्भूतगुणवत्त्वमेव सामान्यप्रयोजकमतिप्रसङ्गभङ्गश्च विशेषसामग्र्यैव उद्भूतत्वं च मूर्त्तविशेषगुणमात्रवृत्तीति आकाशाद्यवृत्तितया न नित्यस्येत्यादिव्याप्तिविरोध इति । तन्न । विशेषकारणतावच्छेदकानाक्रान्तवृत्तेः सामान्यकारणतानवच्छेदकत्वात् । अन्यथेन्द्रियत्वमपि साक्षात्कारहेतुतावच्छेदकं न स्यात् । द्रव्यत्वस्यैव लाघवेन तथात्वान्नित्यस्येत्यादिव्याप्तिस्वीकारपक्षेऽपि सर्वत्र सामान्यकारणताया जन्यप्रमेयत्वेनैवाच्छेदसम्भवात । न च द्रव्यसाक्षात्कार इव वहिरिन्द्रियद्रव्यसाक्षात्कारेऽप्यननुगतमेव प्रयोजकमिति वाच्यम्, सति सम्भव

---

(१) तरूपवत्त्वं । (२) दोषस्येति द्वितीयपुस्तके नास्ति ।

लिङ्गमिति चेन्न, स्पर्शस्य धराश्रयत्वेनाप्युपपत्तेः। रूपाभावान्नैव मिति चेन्न, उष्णस्पर्शशीतस्पर्शयोरपि वायवीयत्वापत्तेः। तयोर

न्यायलीलावतीकण्ठाभरणम्

माह—स्पर्शस्येति। पृथिव्या एवानुद्भूतरूपायाः स्पर्शोऽयमनुभूयत इत्यर्थः। अन्यथासिद्धिमेव दूषयितुं शङ्कते—रूपेति। पार्थिवस्पर्शो रूपनियतो रूपं च नानुभूयत इति स्पर्शोऽपि नायं पृथिव्या इत्यर्थः। उष्मणः स्पर्शो विषक्तावयवजलस्पर्शोऽपि रूपासहचरत्वाद्वायवीय एव स्यादेवमित्याह--उष्णेति। तयोरिति। उष्णशीतस्पर्शसहचररूपयोरित्यर्थः। तथा च शीतोष्णस्पर्शसहचरं रूपमस्त्येवेति भावः। तर्हि

न्यायलीलावतीप्रकाशः

स्यात्, तथा शीतस्पर्शो वायुलिङ्गत्वारोपाद्वायवीयत्वानुमानम्। न चैवं शीतोऽयं वायवीय इति धीः स्यात् तदनन्तरं शीतो वायुरिति मानसारोपादिति संक्षेपः।

उद्भूतपार्थिवस्पर्शस्य उद्भूतरूपसामानाधिकरण्यनियमादाह—रूपाभावादिति। रूपासहचरस्पर्शस्य वायवीयत्वे उष्णो वायुरित्यादिप्रतीतेरुष्णस्पर्शाश्रयोऽपि वायुः स्यात्। अनुद्भूतरूपाश्रयस्य तेजःप्रभृतेरुद्भूतस्पर्शानाश्रयत्वनियमादाह—उष्णस्पर्शेति। तयोरिति। उष्ण-

न्यायलीलावतीप्रकाशविवृतिः

इति न्यायात्। न च द्रव्यसाक्षात्कारमात्रे रूपवत्त्वस्य प्रयोजकत्वे आत्मनोऽप्रत्यक्षतापत्तिः। तथा च साक्षात्कारिमिथ्याज्ञाननिवृत्तये तत्त्वसाक्षात्कारपर्यन्तधावनानुपपत्तेः। विस्तरश्चास्य "प्रत्यक्षप्रकाशे"।

तथा शीतस्पर्श इति। शीतस्पर्शवृत्तिधर्मे वायवीयत्वव्याप्यत्वारोपात् तेन वायवीयत्वानुमानमित्यर्थः। न चानुमाने विरोधिज्ञानमात्रस्य प्रतिबन्धकतया वायुवृत्तित्वग्रहे कथं वायवीयत्वानुमितिरिति वाच्यम्, अनुमानपदेन व्याप्यदर्शनोत्तरभावित्वाचवायवीयत्वप्रत्यक्षस्यैवाभिलापात्। तत्र चानुमानिकविरोधिज्ञानस्याप्रतिबन्धकत्वात्, संशयोत्तरभाविप्रत्यक्षाभिप्रायेण लिङ्गत्वारोपस्याप्युपयोगादिति दिक्। मानसारोपादिति। न च मानसस्यापि विरोधिज्ञानमात्रनिवर्त्यतया कथमेवमिति वाच्यम्, प्राथमिकत्वाचप्रत्यक्षेण विरोधिज्ञानव्याहतेरिति संक्षेपः।

नुद्भूतरूपत्वा(१)दग्रहणमिति चेत्, तुल्यमनुष्णाशीतेऽपि(२)। शब्दोऽपि चोद्भूतस्पर्शवद्वेगवत्पृथिवी(३)द्रव्याभिघातज एव स्यात्। गन्धरूपयोरग्रहणात् नैवमिति चेन्न, अनुद्भूतत्वेनापि तयोरुपपत्तेः। अप्रतीघातान्नैव पार्थिवमिति चेन्न, धूमवदुपपत्तेः। अप्रतीयमानरसत्वान्नैवमिति चेन्न, अनुद्भूतत्वेन जले द्रवत्वाप्रतीतिवदुपपत्तेः। गुरुत्वाभावान्नैवमिति चेन्न, तदसिद्धेः। अपातात्तत्सिद्धिरिति चेन्न, वेगेनैव काण्डादिवदपातसम्भवात्। तस्य [च] सदागतिमत्त्वेन वेगत्यागाभावात्। अन्यथा वायूपनीतजलानलपृथिवीनामपि प्रतीतिवैलक्षण्यात्

न्यायलीलावतीकण्ठाभरणम्

वायवीयत्वाभिमतोऽपि स्पर्शोऽनुद्भूतरूपसहचरः पार्थिव एवेत्याह–तुल्यमिति। द्वितीयहेतोरन्यथासिद्धिमाह––शब्दोऽपीति। स्पर्शवद्वेगवद्द्रव्यं पृथिव्येवेति भावः। अनुद्भूतत्वेनापीति। तयोर्गन्धरूपयोरनुद्भूतत्वेनाप्यग्रहणोपपत्तेरिति योजना। 'प्रतीघातः' पार्थिवो धर्म्मः, स च विवादाध्यासिते नोपलभ्यते इति नेयं पृथिवीत्याह—अप्रतीघातादिति। धूमवदिति। कुड्यादिना च धूमवद्वाय्योरपि न प्रतीघात एवेति भावः। यद्वा अप्रतीघातादिति। नानेन किञ्चिद् द्रव्यं प्रतिहन्यत इत्यर्थः। जल इति। विषक्तावयवे करकायामित्यर्थः। तदसिद्धेरिति। गुरुत्वाभावासिद्धेरित्यर्थः। गुरुत्वकार्य्यपतनाभावात् गुरुत्वाभाव इत्याह—अपातादिति। गुरोरपि वेगवतोऽपातदर्शनात् अपातो न गुरुत्वाभावे हेतुरित्याह—वेगेनेति। तर्हि काण्डवत् कदाचित् पतनं स्यादित्यत आह—तस्येति। किं च किञ्चिद्वैधर्म्याधीनं प्रतीतिवैलक्षण्यमतन्त्रमत आह–अन्यथेति।

न्यायलीलावतीप्रकाशः

शीतस्पर्शाश्रययोरनुद्भूतरूपत्वादग्रह इत्यर्थः। तुल्यमिति। अनुष्णाशीतस्पर्शाश्रयपृथिव्यपि तत एव न गृह्यत इत्यपि स्यादित्यर्थः। द्रव्याभिघातजः अनुद्भूतरूपोद्भूतस्पर्शपृथिव्यभिघातज इत्यर्थः। जल इति। रसनेन्द्रियादावित्यर्थः। वेगत्यागेत्युपलक्षणं कदाचित्पतनेऽपि न दोष इति द्रष्टव्यम्। अन्यथेति। उक्तन्यायेन पृथिवीत्वसम्भवेऽपि द्रव्या-

---

(१) नुद्भूतत्वादग्र.। (२) शीतस्पर्शेऽपि। (३) ज्वद्द्रव्या.।

द्रव्यान्तरताप्रसङ्गात्। कल्पनालाघवाद्धर्ममात्रमुपकल्प्यते न तु धर्मीति चेत्, तुल्यं वायावपि। धृतिरपि तत्संयोगादेवोपपत् स्यते(१)। ब्रह्माण्ड इव वा पारमेश्वरयत्नादेव स्यात्। कम्पो-ऽप्येतेन व्याख्यातः। वह्नेस्तेजोविशेषस्योर्द्धगमननियमवत् भु-वोऽपि तिर्यग्गतिरुपपत्स्यते(२)। अत एव मेघादिप्रेरणं व्याख्यातम्। जठरानलवच्च(३) पार्थिवः कश्चिदन्तःशरीरसञ्चारी प्राणः स्यादिति न वायुसिद्धिः।

न्यायलीलावतीकण्ठाभरणम्

ननु वायूपनीतानां जलादीनामनुद्भूतरूपवत्त्वमात्रं कल्प्यते न तु द्रव्यान्तरत्वं कल्प्यते धर्म्मिकल्पनातो धर्म्मकल्पनाया लघुत्वा-दित्याह—कल्पनेति। तर्हि वायुरप्यनुद्भूतरूपा पृथिव्येवास्तु किं द्र-व्यान्तरकल्पनयेत्याह—तुल्यमिति। तृतीयलिङ्गमन्यथासिद्धमाह—धृतिरपीति। तत्संयोगादिति। अनुद्भूतरूपोद्भूतस्पर्शपृथिवीसंयोगादि-त्यर्थः। ब्रह्माण्ड इवेति। यथा परमेश्वरस्य विधारकप्रयत्नाद् ब्रह्माण्ड-स्थितिस्तथा मेघादिधृतिरपि स्यादित्यर्थः। तथा च श्रुतिः "एतस्य प्रशासने गार्गि द्यावापृथिव्यौ" विधृते तिष्ठत इति भावः। चतुर्थं वायुलिङ्गमन्यथासिद्धमाह—कम्पोऽपीति। अनुद्भूतरूपोद्भूतस्पर्शपृ-थिवीकृत एव तृणादौ कम्प इत्यर्थः। ननु तिर्य्यग्गमनं पृथिव्यादिवै-धर्म्यं वायोर्द्रव्यान्तरत्वं साधयिष्यतीत्यत आह—वह्नेरिति। पृथिव्यवान्त-रजातीयतानिबन्धनं तिर्य्यग्गमनं न वायोर्द्रव्यान्तरत्वे मानमित्यर्थः। अतएवेति। अनुद्भूतरूपपृथिवीत एव मेघादिप्रेरणमपि स्यादित्यर्थः। ननु प्राणादिपञ्चकस्यासाधारणतत्तदर्थक्रिया पृथिव्यादिविलक्षणा वायोर्द्रव्यान्तरत्वे मानं स्यादित्यत आह—जाठरेति। रसार्ज्जनल-क्षणार्थक्रियाकारित्वेऽपि यथा जठरानलं तेज एव न द्रव्यान्तरं

न्यायलीलावतीप्रकाशः

न्तरकल्पनायामित्यर्थः। 'धर्ममात्रं' जलादीनां रूपाद्यनुद्भवमात्रं 'न (तु?)धर्मी' न द्रव्यान्तरमित्यर्थः। धृतिर्गुरुत्वप्रतिबन्धः। तत्संयोगात् ता-दृशपृथिवीसंयोगादित्यर्थः। एतेन तादृशपृथिवीसंयोगेनोपपद्यतेत्यर्थः।

---

(१) ०पपद्यते। (२) ०पपद्यते। (३) ०वदेव पा०। जाठरेति कण्ठाभरणधृतः पाठः।

मैवम् । त्वगिन्द्रियस्य गन्धाग्राहकत्वेन रसनवदपार्थिवत्वात् रूपरसाग्राहकत्वेनैवातैजसानाप्यत्वात् । शब्दाग्राहकत्वेनानाभसत्वात् । बहिरिन्द्रियत्वेन मनोऽव्यतिरेकित्वात् । अत एव ग्राह्यजातीयविशेषगुणवत्त्वेन स्पर्शवत्त्वाद् द्रव्यान्तरप्रकृतिकत्वेन वायुसिद्धिः । न च गन्धाग्राहकत्वमप्यदृष्टविशेषसाहित्यात्पार्थिवं स्यादिति वाच्यम् , सर्वेन्द्रियाणामपलापप्रसङ्गात् । स चायं स्प-

———

न्यायलीलावतीकण्ठाभरणम्

तथा घ्राणोऽपि पृथिवीविशेष एवेत्यर्थः ।

त्वगिन्द्रियस्येति । त्वगिन्द्रियं न पार्थिवं गन्धाग्राहकेन्द्रियत्वात् । नाप्यं रसाग्राहकेन्द्रियत्वादित्यादिना चतुष्कभेदसिद्धौ पञ्चबहिरिन्द्रियप्रकृतिभूतं द्रव्यं सिध्यति तदेव च वायुरित्यर्थः । ज्ञानजनकमनःसंयोगाश्रयत्वेन इन्द्रियाणां द्रव्यत्वव्यवस्थितेरित्यर्थः । अत एवेति । बहिरिन्द्रियत्वादेवेत्यर्थः । यद् बहिरिन्द्रियं तत् स्वग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमद् गुणवदिति व्याप्तेः स्पर्शग्राहि त्वगिन्द्रियं स्पर्शवदेव सेत्स्यतीत्यर्थः । स्पर्शाद्याश्रय इत्यादिपदात् सामान्यगुणान्तरो·

न्यायलीलावतीप्रकाशः

पृथिवीत्वे वायोस्तिर्यग्गतिनियममुपपादयति—बहिरिति । गन्धाग्राहकत्वेनेति । गन्धाग्राहकेन्द्रियत्वेनेत्यर्थः । एवमग्रेपीन्द्रियत्वेन हेतुर्विशेष्यः । 'अत एव' बहिरिन्द्रियत्वादेवेत्यर्थः । स चेति । स्पर्शवद्बहिरिन्द्रियस्य स्वग्राह्यविशेषगुणसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वनिय-

न्यायलीलावतीप्रकाशविवृतिः

पृथिवीपरमाणौ व्यभिचारादाह—गन्धाग्राहकेन्द्रियत्वेनेति । ननु स एवेत्यत्र न सैव व्यक्तिरभिमता, बाधात् । किन्तु तज्जातीया, सा न युक्ता, त्वगिन्द्रियस्य श्रोत्रवेदकव्यक्तिविभाजकोपाधित्वादित्याशङ्क्याह—स्पर्शवदिति । बहिःपदं सम्पातायातम् । प्रत्यक्षस्पर्शाश्रयस्य वायुत्वसिद्ध्यर्थं स्वग्राह्येति । ग्राह्यविशेषो लौकिकप्रत्यक्ष इत्यर्थः । यत्तु संख्यादिनाऽर्थान्तरवारणाय विशेषपदमिति तन्न, ग्राह्यसंख्यासामाधिकरण्ये ग्राह्यविशेषगुणसामानाधिकरण्यनियमात् । साक्षात्पदं द्रव्यत्वेनार्थान्तरवारणाय भेदगर्भव्याप्यत्वलाभार्थम् । नन्वेवमपि के प्रत्यक्षाश्रयवायु·

र्शाद्याश्रयः सिद्ध इति। स एवान्यत्र(१) कल्प्यते लाघवात्। पृथिवीत्वे तु रूपानुद्भवादिकल्पनागौरवमेव। व्यजनानिलश्च ग्राह्यजातीयासाधारणगुणोद्भवापेक्षः स्पर्शव्यञ्जकः सावयवेन्द्रियव्यव-

न्यायलीलावतीकण्ठाभरणम्

पग्रहः। स एवेति। त्वगिन्द्रियप्रकृति द्रव्यान्तरं चेत् सिद्धं तदा स्पर्शकम्पधृतिशब्दादिहेतुरपि तज्जातीय एव ग्राह्य इत्यर्थः। ननूक्तं धर्मिकल्पनातो धर्म्मकल्पनालघुरित्यत आह—पृथिवीत्व इति। त्वगिन्द्रियस्य धर्म्यन्तरस्य कल्पनाया आवश्यकत्वात् अनुद्भूतरूपोद्भूतस्पर्शपृथिवीकल्पनमेव गुर्व्वित्यर्थः। उद्भूतस्पर्शवत्त्वं वायोः साधयति—व्यजनानिल इति। ग्राह्यजातीयोऽसाधारणो यो गुणस्तदुद्भवापेक्षः सन् स्पर्शव्यञ्जक इत्यर्थः। सावयवेति। सावयवानीन्द्रियाणि घ्राणादित्वक्पर्य्यन्तानि तेषां व्यवस्थापका रूपरसगन्धस्पर्शास्तेषु मध्य इत्यर्थः। तथा च व्यजनानिलः स्वव्यञ्जनीयगुणवृत्तिजातिमदुद्भूतविशेषगुणवान् अनिन्द्रियत्वे सति गन्धाद्यन्यतरव्यञ्जकद्रव्यत्वात् आलो-

न्यायलीलावतीप्रकाशः

मेनानेकत्वकल्पने प्रत्यक्षस्पर्शाश्रयत्वमपि तस्यैव कल्प्यत इत्यर्थः।

उद्भूतस्पर्शं वायुं साधयति—व्यजनेति। व्यजनचालनानन्तरोपलभ्यमानस्पर्शाधिकरणं स्वग्राह्योद्भूतासाधारणगुणमात्रव्यङ्ग्यव्यञ्जकमित्यर्थः। सावयवेति। रूपादिचतुर्ष्वित्यर्थः। नन्विन्द्रियेणानैकान्तिकं तस्य ग्राह्यसजातीयोद्भूतासाधारणगुणवत्त्वाभावात्। न चोद्भूतत्वेनानभिभूतत्वं विवक्षितं न चेदेवमित्यनेन विरोधात्। तद्रूपस्या-

न्यायलीलावतीप्रकाशविवृतिः

भिन्ना एव सन्त्वित्यत आह—प्रत्यक्षेति। रूपाद्यनुद्भवकल्पनागौरवभिया सर्वेषामेव तादृशानां वायुत्वं कल्प्यत इत्यर्थः। साधयतीति। प्रमाणान्तरेणापीति शेषः। अनिलत्वमसिद्धमन्यथा स चेत्यग्रिमग्रन्थेन तत्साधनविरोधात्। आलोकदृष्टान्तासङ्गतिश्च तस्य स्पर्शव्यञ्जकत्वादित्यन्यथा प्रयोगमाह—व्यजनेति(२)। अत्र चाङ्गसङ्गिसलिलाद्यन्यत्वेन

(१) स चान्यत्रापि।

(२) व्यजनानिलस्य प्रागेवानिलत्वे सिद्धे तस्योद्भूतस्पर्शसाधनेनैवाभिमतसिद्धौ स चेत्यादिना स्पर्शस्य वायवीयत्वसाधनमनर्थकमापद्येतेत्यत आह—व्यजनेत्यादि। इति दीधितिः।

न्यायलीलावतीप्रकाशः

नभिभूतत्वात् । मैवम् । इन्द्रियान्यत्वेन हेतुविशेषणात् । तथाप्युद्भू· तेति साध्ये विशेषणं व्यर्थम् । अनुद्भूतेनापि तादृशेन स्पर्शेन सि· ध्यता वायवीयत्वसिद्धेः । तादृशस्पर्शवायवीयत्वस्य च पूर्वानुमाना· देव सिद्धेः । मैवम् । उद्भूतस्पर्शस्य वायवीयत्वसिद्ध्यर्थमस्याभि· धानात् उद्भूतस्पर्शस्य वायवीयत्वस्योपाधित्वव्यावर्त्तनार्थत्वाच्च । न च ग्राह्यस्पर्शेन सिद्धसाधनं स्पर्शसाक्षात्कारासाधारणकारणत्वाश्र· योद्भूतासाधारणगुणवत्त्वस्य साध्यत्वात् । ग्राह्यजातीयासाधार· णगुणोद्भवानपेक्षस्य व्यञ्जकत्वे ग्रीष्मोष्मणोऽपि रूपव्यञ्जकतापत्ति· रुद्भूतानिलस्पर्शानपेक्षस्य च त्वगिन्द्रियस्याङ्गसङ्गिस्वेदशैत्याभिव्य

न्यायलीलावतीप्रकाशविवृतिः

पक्षतेति न तदादायार्थान्तरशङ्का । स्वग्राह्यः स्वग्राह्यजातीयः। उद्भूत असाधारणः स्वनिष्ठो यो गुणः तन्मात्रव्यङ्ग्यव्यञ्जकमित्यर्थः। तेन न व्यङ्ग्यस्पर्शेनार्थान्तरम् । न चासाधारणपदव्यर्थता मात्रपदं कदा· चिदनुद्भूतस्यापि व्यञ्जकत्वशङ्कानिरासाय। तथा च उद्भूतमात्रस्व· निष्ठग्राह्यजातीयगुणव्यञ्जकमित्यर्थः । एवं चाग्रे इन्द्रियेऽनैकान्ति· कत्वशङ्कापि युज्यते, यथाश्रुते तद्विरोधात् । उद्भूतगुणेति । उद्भूत· स्पर्शवायवीयत्वसिद्धिप्रयोजनमपि गन्धाग्राहकेन्द्रियत्वेनापार्थिवत्व· साधने इन्द्रियत्वावच्छिन्नसाध्यव्यापकस्योद्भूतगुणजातीयत्वस्य साधनव्यापकतयोपाधित्वशङ्कानिरास इत्यर्थः । न चेति । मूलोक्तसा· ध्य इति शेषः । यथोक्तसाध्ये तादृशगुणवत्त्वस्यैव साध्यतया न सिद्धसाधनमित्याशयेन तादृशसाध्ये पक्षधर्मताबललभ्यं साध्यमाह–– स्पर्शेति । एवं च नालोकदृष्टान्ते साध्यवैकल्यमिति ध्येयम् । स्पर्शपदं बहिरिन्द्रियव्यवस्थापकगुणपरमिति कश्चित् । उद्भूतत्वमनुद्भूत· त्वाभाव इतिमतेन सामान्यगुणेनार्थान्तरवारणाय कारणताश्रयप· र्यन्तं विशेषणम् । तत्राप्यसाधारणपदमदृष्टवदात्मसंयोगेनार्थान्त· रवारणाय। द्वितीयमसाधारणपदं विशेषपरं तादृूप्यसिद्धये मनोव्या· वृत्त्यर्थमिति । न चैवमपि त्वचि व्यभिचारः वायुसमवेतत्वस्य साध्यस्य तत्रापि सत्त्वात् । न च घटादिस्पर्शे व्यभिचारः तस्य विषयत्वेन व्यञ्जकतया साधारणत्वात् । वायवीयत्वे साध्ये व्यो·

स्थापकगुणेष्वेकस्यैव व्यञ्जकत्वात्, आलोकवत्। न चेदेवं मेदस्विनां स्वेदिनामन्धकारे समस्त[स्वपि]वस्त्ववभासापत्तिः(१)। अनुद्भूतस्पर्शानिलस्य च(२) शैत्याभिव्यञ्जकतापत्तिः। स च स्पर्शो वायवीयः स्पर्शासाधारणव्यञ्जकत्वात् त्वक्स्पर्शवदिति वा अपार्थिवत्वसिद्धिः, रूपरहितत्वाद्वा। एवं सति शीतत्वोष्णत्वे(३) अपि गुणौ (४)वायौ स्यातामिति चेन्न, तस्यानुद्भूतरूपत्वात्। न चात्राप्यनु-

---

न्यायलीलावतीकण्ठाभरणम्

कवदित्यत्र तात्पर्य्यम्। अत्र विपक्षदण्डमाह—न चे(दि?)ति। यदि स्वव्यञ्जनीयगुणवृत्तिजातिमदुद्भूतविशेषगुणापेक्षा न स्यात्तदा मेदस्विस्वेदानुमितस्य उष्मणोऽपि रूपव्यञ्जकत्वं स्यादित्यर्थः। अनुद्भूतेति। स्तिमितस्यापि वायोरङ्गसङ्गिसलिलशैत्यव्यञ्जकतापत्तेरित्यर्थः। तथा चोष्मणि व्यजनापेक्षापि न स्यादिति भावः। स चेति। व्यजनचालनानन्तरमनुभूयमान इत्यर्थः। स्पर्शेति। स्पर्शाभिव्यञ्जकत्वादित्यर्थः। वाकार इन्द्रियप्रकृतिद्रव्यान्तरसाधनापेक्षया। रूपरहितत्वाद्वेति। विवादपदं द्रव्यं न पृथिवी रूपरहितत्वादाकाशवदित्यर्थः। एवं सति शीतेति। अनुपलभ्यमानरूपाश्रयः स्पर्शौ यदि वायवीय इत्यर्थः। शीतोष्ण इति शीतोष्णस्पर्शावित्यर्थः। तस्येति। शीतोष्णस्पर्शाधिकरणद्रव्यस्येत्यर्थः। न चान्यत्रेति। विवादपदेऽपि द्रव्ये रूपमनु-

न्यायलीलावतीप्रकाशः

ञ्जकत्वप्रसङ्ग इत्याह—न चेदेवमिति। स्पर्शेति। मनोव्यावृत्त्यर्थमसाधारणत्वं व्यञ्जकविशेषणम्। अपार्थिवत्वसिद्धिः प्रकृतस्पर्शाश्रयस्येति शेषः। अत्रैव हेत्वन्तरमाह—रूपेति। नन्वेवं नीरूपत्वाद्विभक्तावयवजलतेजसोरपि वायुत्वापत्तिरित्याह—एवमिति। नीरूपत्वं तस्यासिद्धमित्याह—तस्येति। न चेति। रूपस्येति शेषः।

न्यायलीलावतीप्रकाशविवृतिः

भादौ व्यभिचारादाह—अत्रैवेति। अपार्थिवत्वे साध्ये इत्यर्थः।

---

(१) भासः स्यात्। (२) ०लस्य तु शै०। (३) शीतोष्णत्वे। (४) गुणौ इति क्वचित् पुस्तके नास्ति।

द्भवः पार्थिवरूपस्पर्शयोः समानयोगक्षेमत्वात् । अन्यथा उद्भूतरूपानुद्भूतस्पर्शस्यापि पार्थिवस्य सत्त्वापत्तेः । न चाभिभवः । मन्दालोके उपलम्भापत्तेः । अगन्धवत्त्वाच्च(१) । अनुद्भूतत्वात् तत्सिद्धिरिति न वाच्यम्, स्पर्शोद्भवव्याप्तत्वादुगन्धवत्त्वोद्भवस्य ।

न्यायलीलावतीकण्ठाभरणम्

द्भूतं स्वीक्रियतां तथा च तत् पृथिव्येवेत्यर्थः । पार्थिवेति । उद्भूतस्पर्शपृथिव्या उद्भूतरूपवत्त्वनियमादित्यर्थः । अन्यथेति । तथा च चन्द्रचामीकरादिरपि पृथिव्येव स्यात् स्याच्च मणिप्रभापि पृथिवीत्यर्थः । धूमस्य चक्षुरवच्छेदेन स्पर्शोऽप्युपलभ्यत एवेत्यर्थः । ननु वायुरप्युद्भूतरूप एव परन्त्विवति भवान्नोपलभत इत्याशङ्क्याह न चेति । मन्देति । बलवत एव तेजोरूपस्य पररूपाभिभावकत्वादित्यर्थः । अपार्थिवत्वे साध्ये हेत्वन्तरमाह—अगन्धत्वाच्चेति । हेतोः स्वरूपासिद्धिमाशङ्क्याह—अनुद्भूतत्वादिति । वायावनुद्भूतो गन्ध इति नोपलभ्यत इत्यर्थः । स्पर्शश्चेदुद्भूतस्तदा गन्धोऽपि उद्भूत एव तत्र स्यादित्याह—स्पर्शेति । स्पर्शोद्भवो व्याप्तो यस्येत्यर्थः । स्पर्शोद्भवव्याप-

न्यालालावतीप्रकाशः

मन्देति । अभिभावकबलवत्तेजोरूपस्य तत्राभावादित्यर्थः । स्पर्शोद्भवेति । नन्वेवं गन्धोद्भवो व्याप्यः स्पर्शोद्भवो व्यापक इति सिद्धावप्रकृतत्वम् । नैवम्। समव्याप्तत्वमभिप्रेत्यास्याभिधानात् गन्धोद्भवव्यापकत्वस्यापि सिद्धेः । स्पर्शोद्भवो व्याप्तो येनासौ स्पर्शोद्भवव्याप्तः, आहिताग्न्यादित्वान्निष्ठान्तस्य परनिपात इत्यन्ये । स्पर्शोद्भवव्यापकत्वादिति पाठे सुगममेव । पार्थिवत्वेन विशेषणान्न जलादिस्पर्शेनानैकान्तः, तथापि वज्रस्पर्शेनानैकान्तः तस्य गन्धानुद्भवेऽप्युद्भूतत्वादिति न वाच्यम्, वायुत्वं यद्यकठिनोद्भूतस्पर्शपृथिवीवृत्तिजातिः स्यादुद्भूतगन्धस-

न्यायलीलावतीप्रकाशविवृतिः

हेत्वन्तरं गन्धाग्राहकत्वापेक्षया । समव्याप्तत्वमिति । हेतुतायां च व्यापकत्वभागोऽविवक्षित एवेत्यर्थः । चम्पकगन्ध(२) व्यभिचारान्न समव्याप्तिरित्यस्वरसादाह—स्पर्शोद्भव इति । वायुत्वमिति । वज्रत्वे(३)व्य-

---

(१) अगन्धत्वाच्चेति कण्ठाभरणसम्मतः पाठः । (२) चम्पकभागव्यभि० । (३) रक्तत्वे व्य० ।

कश्चिदेव स्पर्शः तथा, न सर्व इति चेन्न, दृश्यादृश्योपाधिव्युदासे व्यतिरेकशङ्कानवकाशात् । अनभिव्यक्तत्वात्कुङ्कुमगन्धवत् पूर्वं नावभासते, चम्पकादिगन्धसम्भेदे त्ववभासत इति चेन्न, व्यञ्जकगन्धातिरिक्तगन्धानवभासात् । चन्दनगन्धिसलिल(मिति)वदौपाधिकत्वेनैव प्रतीतेश्च । न चायं ज्वलनवदूर्ध्वगमनशीलो वात्यादौ शुकशुकादिनादविसदृशमेघसङ्घट्टजातीय-

---

न्यायलीलावतीकण्ठाभरणम्

कत्वादिति तु पाठः सुगमः। पाषाणादावप्युद्भूत एव गन्धोऽनुल्बनत्वाद्विशिष्य न गृह्यत इति भावः। अनुद्भूतः पृथिवीस्पर्श उद्भूतगन्धसामानाधिकरण्यनियत उद्भूतपृथिवीस्पर्शत्वादित्यत्र स्पर्शभेद उपाधिः स्यादिति शङ्कते—कश्चिदिति । दृश्यादृश्य इति । सामान्यव्याप्तौ विशेषस्यानुपाधित्वादित्यर्थः। कुङ्कुमगन्धवदिति। यथा घृतसंयोगव्यङ्ग्यः कुङ्कुमगन्धस्तथा चम्पकादिसन्निकर्षाभिव्यङ्ग्यो वायुगन्धोऽपीत्यर्थः। घृतगन्धविजातीयकुङ्कुमगन्धवत् चम्पकादिगन्धविजातीयवायुगन्धस्यानुपलम्भान्नैवमित्याह—व्यञ्जकेति। ननु वाय्वादावुद्गमनशीलं द्रव्यान्तरं स्यात् पृथिव्यादिसकलवैधर्म्यादित्यत आह—न चायमिति। शुकशुकादीति वायुजन्यशब्दानुकरणम्। तथा च मेघयोः

न्यायलीलावतीप्रकाशः

मानाधिकरणं स्यात् धूमत्ववदित्यापादनार्थत्वात्। अगन्धत्वं वायोरसिद्धं व्यञ्जकाभावात्ततोऽपि गन्धस्याप्रतीतिरित्याह—अनभिव्यक्तत्वादिति । ननु वायोर्नियमेन तिर्यग्गतित्वाद् वात्यादावुद्गमनस्वभावं द्रव्यान्तरं कल्प्येतेत्यत आह—न चेति । संघट्टपदादग्रे जन्यपदं

न्यायलीलावतीप्रकाशविवृतिः

भिचार इत्यकठिनपदम्। घ्राणत्वे व्यभिचार इत्युद्भूतपदम्। जलत्वे व्यभिचार इति पृथिवीति । विरुद्धगन्धवदारब्धमात्रधर्मे व्यभिचार इति जातिपदम् । उद्भूतपदमापाद्ये इष्टापत्तिवारणाय । तदाश्रये व्यभिचारवारणाय धर्मिपक्षत्वत्याग इति ध्येयम् । जन्यपदमिति । यद्यपि शेषापेक्षया लक्षणैव बलवतीति संघट्ट-

वात्याघातशब्दानुमाने अवश्योन्नेयपरस्पराहतेरेवोद्गमनोपपत्तौ स्वभावकल्पनानवकाशात् ॥ वायुः । (इत्यनिलः) ॥

न्यायलीलावतीकण्ठाभरणम्

सङ्घट्टो वायुजन्यस्तज्जन्यः शब्दोऽनुभूयते, तेन तदनुमितमेघद्वय-सङ्घट्ट कारणवायुद्वयसङ्घट्टोऽप्यनुमीयते, तेन स्पर्शवद्वेगवद्द्रव्यद्वय-सङ्घट्टात् तयोरूर्ध्वगमनमागन्तुकनिमित्ताधीनं न स्वाभाविकं स्तम्भित-जलयोरिवेति न तदनुरोधेन वायुविजातीयद्रव्यकल्पनमित्यर्थः ।

ननु उद्भूतस्पर्शवत्त्वाद्वायुः प्रत्यक्ष एव किं न स्यात्? न स्यात्, उद्भूतरूपवत्त्वस्योपाधित्वात् । आत्मनि गुणादौ च साध्याव्यापकमिद-मिति चेन्न साधनावच्छिन्नसाध्यव्यापकत्वात् । चाक्षुषद्रव्यप्रत्यक्षे तत् तन्त्रं न तु स्पार्शनप्रत्यक्षेऽपीति चेन्न सामान्ये बाधकाभावात् । किं च वायोः प्रत्यक्षत्वे तद्गतसङ्ख्यादिग्रहप्रसङ्गः । ननु यज्जातीयं प्रत्यक्षं तत्सङ्ख्यादिक प्रत्यक्षमिति यदि नियमस्तदा फुत्कारादौ तदस्त्ये-व । अथ या व्यक्तिः प्रत्यक्षा तत्सङ्ख्यादिकं प्रत्यक्षमिति तु नियमो नास्त्येव पृष्ठलग्नवस्त्रादौ व्यभिचारादिति चेन्न फुत्कारादौ सङ्ख्या-प्रतीतेरानुमानिकत्वात् । किं च वहिर्द्रव्यप्रत्यक्षतावच्छेदकमुद्भूत-रूपवत्त्वं तदितो व्यावर्त्तमानं प्रत्यक्षत्वमेव निवर्त्तयति न ह्युद्भूत-स्पर्शवत्त्वं तत्र तन्त्रं चन्द्रमहसि तदभावात् । नापि जन्येन्द्रियग्राह्य-विशेषगुणवत्त्वं कार्य्यमहत्त्वसमानाधिकरणोद्भूतविशेषगुणवत्त्वं

न्यायलीलावतीप्रकाशः

पूरणीयम् । अत्र स्पर्शत्वं रूपानाधारवृत्तिवृत्ति रूपवदिन्द्रियावेद्य-गुणवृत्तिजातित्वात् बुद्धित्ववदित्यनुमानं वायौ स्पर्शादिचतुष्क-वत्त्वे मानमाहुः ।

न्यायलीलावतीप्रकाशविवृतिः

पदे जन्यलक्षणैवोचिता तथापि नात्र जन्यमात्रे लक्षणा, किं तु सङ्घविशिष्ट इति गौरवं मनसि कृत्वेदमुक्तम् । मिश्रास्तु ग्रन्थस्य परार्थानुमानरूपतया वादिवाक्ये लक्षणाया अभावादिदमु-क्तम् । न च वादिवाक्ये पूरणमयुक्तं पूरितप्रयोग एव कर्त्तव्य इति तात्पर्यादिति वदन्ति । रूपवदिति । गन्धत्वे व्यभिचार इत्यवेद्यान्तम् ।

न्यायलीलावतीकण्ठाभरणम्

वा, वायूपनीतसुरभिभागस्य प्रत्यक्षतापत्तेः। उद्भूतस्पर्शवत्त्वस्य तन्त्रत्वे चलत्पक्षिकाण्डादावानुमानिकमपि कर्म्मज्ञानं न स्यात् तल्लिङ्गस्य पूर्वोत्तरदेशविभागसंयोगलक्षणस्य देशाप्रत्यक्षत्वेनाप्रत्यक्षत्वात्। तथा चानुद्भूतस्पर्शस्य चान्द्रमहस एव तत्र प्रत्यक्षत्वमुपेयम, तत्संयोगविभागाभ्यामेव तत्र चलतीतिप्रतीतेः उद्भूत रूपवत्त्वमुद्भूतस्पर्शवत्त्वं च द्वयमपि तत्र तन्त्रम्। तथा च चान्द्रतेजो न प्रत्यक्षमिति टीकाकृतः(१)। नन्वेवं शीतो वायुरिति प्रतीतिः कथं स्यात् वायुलिङ्गस्यानुष्णाशीतस्याग्रहादिति चेन्न शीतद्रव्योपनायकत्वेनानुमिते द्रव्ये शीतस्पर्शारोपात्। न चान्योऽन्याश्रयः प्रथमं शीतस्पर्शग्रहोऽनन्तरं तदाश्रयोपनायकद्रव्यानुमानमनन्तरं तत्र शीतस्पर्शारोपात्। शीतस्पर्श एव वायुलिङ्गत्वारोपस्तर्हि त्वगिन्द्रियव्यापारानुविधानं कथमिति चेत् स्पर्शलिङ्गग्रहार्थमिति ग्रन्थव्याख्यायामनुपयुक्तत्वादत्रोपरम्यते।

न्यायलीलावतीप्रकाशः

ननु घ्राणादीनि न पृथिवीत्वाद्याश्रया इति न नवैव द्रव्या-

न्यायलीलावतीप्रकाशविवृतिः

आत्मत्वे व्यभिचार इति गुणेति। नतु गुरुत्वत्वादिजातौ व्यभिचारः न च नीरूपेन्द्रियवेद्यत्वं गुणाविशेषणं गुणपदमेव वा विशेषणपरमिति वाच्यम् तथाप्युष्णत्वजातौ व्यभिचारादिति चेत्, मैवम्। गुणत्वसाक्षाद्व्याप्यजातेरेव जातिपदेनोक्तत्वात्।

केचित्तु पार्थिवेति साध्ये रूपविशेषणमतो नोष्णत्वादौ व्यभिचार इति वदन्ति। तन्न। तथा सति जलादिना सिद्धसाधनेन वायुसिद्ध्यनापत्तेः। अत्र साधनावच्छिन्नसाध्यव्यापकस्य विभुवृत्तिवृत्तित्वस्योपाधितायां स्पर्शादिचतुष्कस्य विपक्षबाधकार्थमनुसरणीयतायां किमनेनेत्यनुशयमाविष्करोतीत्याहुरिति। ननु बहिरिन्द्रियत्वं यदि मनोभिन्नेन्द्रियत्वं तदा मनसोऽपि भिद्यत इत्यग्रेतनं व्यर्थमयुक्तमापद्येत। मनोभेदस्य पक्षतावच्छेकतया पूर्वानुमानविषयत्वात् पक्षतावच्छे-

(१) तात्पर्य्यटीकाकृतो वाचस्पतिमिश्राः।

ननु बहिरिन्द्रियाणीतरेभ्यो भिद्यन्ते इन्द्रियत्वान्मनोवत् । मनसोऽपि भिद्यन्ते अनात्मगुणग्राहकेन्द्रियत्वात् । घ्राणं पार्थिवं

न्यायलीलावतीकण्ठाभरणम्

पुनर्विभागव्याघाताय शङ्कते—नन्विति । विशेषगुणवदिन्द्रियत्वं बहिरिन्द्रियत्वम् । इतरेभ्य इति । मनोभिन्नद्रव्येभ्यः । अनात्मगुणेति । आ·

न्यायलीलावतीप्रकाशः

णीति साधयति—नन्विति । बहिरिन्द्रियत्वं विशेषगुणवदिन्द्रियत्वम् । इन्द्रियत्वं च स्मृत्यजनकज्ञानकारणमनःसंयोगाश्रयत्वम्(१) । 'इतरेभ्यो' भूतेभ्यः । कालादिभेदस्योभयासिद्धत्वात् । अनात्मेति । आत्म·

न्यायलीलावतीप्रकाशविवृतिः

दकसाध्ययोरभेदाच्चेति अन्यथा व्याचष्टे—विशेषेति । स्मृतीति । आत्मन्यतिव्याप्तेराह—स्मृत्यजनकेति संयोगविशेषणम् । अजनकत्वं च स्वरूपायोग्यत्वमतो न संयोगव्यक्तिविशेषमादाय उक्तातिव्याप्तितादवस्थ्यम् । कालादावतिव्याप्तिवारणाय ज्ञानकारणेति । चक्षुःसंयोगादिकमादाय घटेऽतिव्याप्तिवारणाय मन इति । मनःसंयोगाश्रयत्वं च मनोनिरूपितसंयोगाश्रयत्वं न तु मनोविशिष्टसंयोगाश्रयत्वमतो न मनस्यव्याप्तिः । न चेन्द्रियत्वे ज्ञाते इन्द्रियमनोयोगत्वेन कारणताग्रहः, गृहीतायां च संयोगकारणतायामिन्द्रियत्वग्रह इत्यन्योन्याश्रय इति वाच्यम्, चक्षुर्मनोयोगत्वादिनैव कारणताग्रहात् । त्वचो ज्ञानमात्रजनकत्वेऽपि न त्वङ्मनोयोगस्य तथात्वं मानाभावादिति नानुपपत्तिः । ज्ञानपदं च विद्यापरमतो न स्वप्नवहनाड्यामतिव्याप्तिः । पक्षतावच्छेदकावच्छेदेनेतरभेदसाधने मनसि दृष्टान्ते साध्यवैकल्यमत आह—भूतेभ्य इति । नन्वेवं कालादिभ्योऽविवेकतादवस्थ्यमत आह—कालादीति ।

---

(१) स्मृत्यजनकः स्मृतिस्वरूपायोग्यः । मनःसंयोगो मनोवृत्तिसंयोगः । त्वङ्मनःसंयोगो न ज्ञानमात्रे हेतुरितिमतेनेदम् । तस्य तद्धेतुतामते तु आत्मवारणाय स्मृत्यजनकेति संयोगस्याश्रयस्य वा विशेषणम् । आद्ये सामानाधिकरण्येन द्वितीये च समवायित्वेन स्मृतिजनकत्वस्याभावोऽर्थः । ज्ञानासमानाधिकरणज्ञानकारणमनःसंयोगाश्रयत्वमिति फलितार्थः । आप्यादिदेहसाधारणशरीरत्वस्योपाधित्वात् त्वक्त्वस्य च जातित्वाल्लाघवात् त्वङ्मनःसंयोग एव ज्ञानहेतुः । शरीरमनःसंयोगस्यापि तथात्वे स्मृत्यजनके सामानाधिकरण्येन स्मृतिजनकमनःसंयोगस्यानाश्रये यस्तादृशः संयोगस्तद्वत्त्वं वक्तव्यम् । ज्ञानसमानाधिकरणज्ञानकारणसंयोगानाश्रयवृत्तिमनोवृत्ति-

स्यादिति चेन्न, महतः पार्थिवस्य गन्धरूपरसस्पर्शेषु अन्यतमो-

न्यायलीलावतीकण्ठाभरणम्

त्मगुणाग्राहकेन्द्रियत्वादित्यर्थः। इन्द्रियत्वेन वाऽनात्मगुणग्राहकत्वं विवक्षितमतो न मनसि व्यभिचारः। महत इति। उद्भूतत्वमिह प्रत्यक्षं विवक्षितमन्यथा महत इति विशेषणानुपपत्तिः। पार्थिवपरमाणोरपि उद्भूतत्वसम्भवात्। यद्वा घ्राणस्यैव परमाणुरूपताऽभ्युपगमो नास्तीतिसूचनाय महत इति। ननु घ्राणेऽप्यन्यतरदुद्भूतं स्या-

न्यायलीलावतीप्रकाशः

गुणाग्राहकत्वादित्यर्थः। यथाश्रुतस्य मनसि गतत्वात्। इन्द्रियत्वविवक्षायां चासाधारणत्वापत्तेः। न चाप्रयोजकत्वं आत्मगुणग्राहकत्वे मनस्त्वस्यैव तन्त्रत्वात् तथात्वे तद्ग्रहापत्तेः। यद्वा बहिरिन्द्रियत्वादि-

न्यायलीलावतीप्रकाशविवृतिः

न च सिद्धसाधनपरिहाराभिप्रायेणैव भूतेत्य इति फक्किका किमिति न व्याख्यायत इति वाच्यम्, इतरत्वावच्छिन्नप्रतियोगिकभेदस्यासिद्धतया सिद्धसाधनानवकाशात्। अन्यथा यत्किञ्चिद्भेदस्य सर्वसिद्धतयाऽन्यत्रापीतरभेदानुमाने सिद्धसाधनप्रसङ्गात्। वस्तुतोऽनिन्द्रियपरत्वेनैवेतरपदव्याख्या मूले युक्तेति ध्येयम्।

इन्द्रियत्वेति। इन्द्रियत्वेन ग्राहकत्वविवक्षायामित्यर्थः। न चेन्द्रियत्वस्य मूलेऽपि श्रूयमाणत्वादसाधारण्यतादवस्थ्यमिति वाच्यम, तद्विशेषणत्याग एव प्रकाशकृतस्तात्पर्यात्। प्रतियोगिविशेषणत्वेनाव्यर्थत्वाद्वा। यद्वेति। विशेषगुणवत्त्वादित्यर्थः। तेन मनोभिन्नत्वं(१) साध्याविशेषः गुणवादिन्द्रियपरत्वे च व्यर्थविशेष्यताऽसाधारण्यं चेत्यपास्तम्। विशेषगुणशून्यत्वा(शू?)न्यत्वलक्षणवैधर्म्यान्न भेदसाधनमप्रयोजकमिति भावः। ननु महत इति व्यर्थं परमाणावपि गन्धाद्यन्यतमोद्भवनिय-

---

ज्ञानकारणसंयोगाश्रयत्वमिति तु निष्कर्षः। अन्त्यज्ञानपदेन निर्विकल्पकं विवक्षितमतो न स्वप्नवहनाड्यामतिप्रसङ्गः। प्राणात्मसंयोगवत् प्राणमनःसंयोगोऽपि न ज्ञानकारणमिति मणौ व्यक्तम्। इति दीधितिः।

(१) मनोभिन्नपरत्वे इति द्वितीयपुस्तके पाठः।

दूभूतत्वेन व्याप्तत्वात् । तादृशस्य च प्रत्यक्षबाधितत्वात् । अन्यथा वायावपि पार्थिवस्पर्शस्यैव प्रतीतिप्रसङ्गात् । गन्धस्यैव व्यञ्जकत्वात्तत्त्वमिति चेन्न, नवशरावादौ जलेऽपि तद्दर्शनात् ।

न्यायलीलावतीकण्ठाभरणम्

दित्यत आह—तादृशस्येति । योग्यस्येत्यर्थः । अन्यथेति । अनुद्भूतगन्धरसरूपोद्भूतस्पर्शा पृथिव्येव वायुः स्याद् यदि गन्धरसरूपान्यतरोद्भवनियमः पृथिव्या न स्यादित्यर्थः । ननु घ्राणं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतवदिति शङ्कते—गन्धस्यैवेति । ननु नवशरावगन्धव्यञ्जके हेतुरयं व्यभिचारीत्याह—नवेति । ननु नवशरावे जलं गन्धं नाभिव्यनक्ति किन्तूत्पादयतीति न तत्र

न्यायलीलावतीप्रकाशः

त्यर्थः । महत इत्युद्भूतगन्धादिविशिष्टपरमाणुभिरन्यथासिद्धिवारणार्थः । अन्यथेति । उपाध्यभावेऽपि व्याप्त्यभावे गन्धोद्भवव्याप्यः पार्थिवस्पर्शोद्भवोऽपि न स्यादिति वायुत्वाभिमते पार्थिव एव स्पर्शो भासत इत्यपि स्यादित्यर्थः । गन्धस्यैवेत्येवकारेण रसादिव्यञ्जकमनोनिरासः । व्यञ्जकत्वादिति । व्यञ्जकद्रव्यत्वादित्यर्थः । अन्यथा सन्निकर्षे व्यभिचारात् । 'तत्त्वं' पार्थिवत्वम् । दृष्टान्तश्चात्र वायूपनीतसुरभिभागो न तु कुङ्कुमगन्धाभिव्यञ्जकं घृतम् , तस्य स्वीयरूपादिव्यञ्जकत्वेन

न्यायलीलावतीप्रकाशविवृतिः

मादत आह—महत इति । अयमर्थः-उद्भूतगन्धाद्यन्यतमवत्त्वे व्यापक इष्टापत्तिः । । न चानुपलम्भविरोधः घ्राणस्य परमाणुत्वस्वीकारेणैव तदुपपत्तेः । तथा चाणुघ्राणस्वीकारेणैव नियमोऽन्यथासिद्ध इत्युद्भूतपदं प्रत्यक्षपरं वाच्यम् । तथा च परमाणोरेव व्यभिचार इति महत (इति ?) विशेषणमिति भावः । न चैवं तन्मते आपादकासिद्धिः स्थूलावयवावच्छिन्नगन्धोपलब्ध्या महत्त्वस्यापि साधनीयत्वात् । ननु गन्धमात्रव्यञ्जकत्वमप्रसिद्धं गन्धव्यञ्जकेन गन्धत्वस्यापि व्यञ्जनादत आह—रसादिव्यञ्जकेति । तथा च गन्धादिषु मध्ये गन्धमात्रव्यञ्जकद्रव्यत्वादिति हेतुरिति भावः । तस्य स्वीयेति । यद्यपि परकीयगन्धादिष्वित्यवश्यं वाच्यमन्यथा नवशरावादेरित्यादेरसङ्गत्यापत्तिः, तथा चेदमयु-

जलं गन्धोत्पादकमिति चेन्न, कणभक्षमते आश्रयनाशं विना तदनुपपत्तेः । तन्नष्टमिति चेन्न, तन्नाशहेतोर्घनद्रव्याभिघातस्याभावात् । स्पर्शस्यापि जलं व्यञ्जकमिति चेन्न, अनुष्णाशीतस्पर्शस्य पूर्वमप्युपलम्भात् । शीतस्पर्शस्य च भुवामसम्भ(१)-

न्यायलीलावतीकण्ठाभरणम्

व्यभिचार इत्याह—जलमिति । कणभक्षेति । वैशेषिकानामाश्रयनाशादेवावयविगन्धादिनाशः, आश्रयनाशस्य च नवशरावस्यात्रानाशान्न तत्र पूर्वगन्धादिनाशो न च गन्धवति गन्धोत्पाद इत्यभिव्यञ्जकत्वमेव जलस्येत्यर्थः । तदिति । नवशरावमित्यर्थः । जलमात्रसंयोगस्य नाशकत्वेऽतिप्रसङ्गः । घनद्रव्यस्य मुद्गरादेः संयोगो विनाशकः स चात्र नास्तीत्यर्थः । ननु जलेन शरावे स्पर्शोऽपि व्यज्यते, तथा च गन्धमात्रव्यञ्जकत्वं न तत्रेति न व्यभिचार इत्याशङ्कते—स्पर्शस्येति ।

न्यायलीलावतीप्रकाशः

साधनवैकल्यात् । आश्रयनाशमिति । आश्रयो गन्धस्यावयवी तन्नाशे परं परमाणौ स्वतन्त्रे गन्धोत्पत्तिरित्यर्थः । क्वचित् पाठः "स्वाश्रयनाशमिति" । यद्यप्येतन्न परमाणुगन्धमधिकृत्य परमाणोर्नित्यत्वादवयविनश्चाश्रयस्य नाशे क गन्धोत्पत्तिः, तथापि स्वं परमाणोः स्वरूपमाश्रयो यस्यासौ परमाण्वाश्रयोऽवयवी तन्नाशं विना अवयविनाशे सत्येव परमाणौ स्वतन्त्रे गन्धोत्पत्तेः । घनद्रव्येति । यद्यपि स्थिरजलसंयोगस्यापि लोष्टनाशकत्वं दृष्टं तथापि तेजोवन्न विनाश्याविलक्षणमेव

न्यायलीलावतीप्रकाशविवृतिः

कम् । न च स्वीयरूपाव्यञ्जकजलविशेषपरत्वं तत्र जलपदस्येति वाच्यम्, तथा सति तादृशघृतविशेषस्य दृष्टान्ततापत्तेः। स्वरूपयोग्यता चोभयत्रापि तुल्या तथापि परकीयत्वविशेषणदानेऽपि जलस्य सक्तुरसव्यञ्जकतया वक्ष्यमाणव्यभिचारोऽसङ्गत एवेति आपाततो व्यभिचारप्रदर्शनपरतयैवाग्रिमफक्किका योजनीयेति लाघवात्परकीयत्वविशेषणागर्भ एव हेतुरित्यभिसन्धायैतदुक्तम् । 'तेजोव'दिति

(१) भूमावसम्भ० ।

वात्। अन्यस्य चाननुभवात्। चक्षुरपि न तैजसम्। तस्य क्रोशादिव्यापिनो रूपस्पर्शयोरन्यतरोद्भवनियमात्। अन्यथा जलजातीयतापि कल्प्येत।

त्वगपि न वायवीयमिन्द्रियम्। वायोः स्पर्शशब्दधृतिकम्पलिङ्गस्य(१) तदभाव एवाभावावधारणात्। घ्राणस्येव पाणाविति हेतुसम्भवात्। उद्भूतस्पर्शस्यैवमिति चेन्न, घ्राणेऽपि तत्त्वप्रसङ्गात्।

न्यायलीलावतीकण्ठाभरणम्

ननु जलेन शरावे शीतस्पर्शोऽपि व्यज्यत इत्याह—शीतेति। पार्थिवस्य शीतस्पर्शेऽनाश्रयत्वादित्यर्थः। क्रोशादिव्यापित्वं महत्त्वमात्रोपलक्षकम्। जठरानलेऽपि यदि तेजस्त्वमभ्युपेतं तदा तद्व्यवच्छेदार्थं रूपानुद्भवेऽपि उष्मणः स्पर्शानुभवेऽपि चन्द्रमहसस्तैजसत्वमित्युक्तमन्यतरेति। अन्यथेति। यज्जातीयस्य या गुणोद्भवव्यवस्था तामतिक्रम्यापि चेत्तज्जातीयत्वमित्यर्थः। तदेकप्रमाणगम्यस्य तन्निवृत्तौ प्रमेयस्यापि निवृत्तेरित्यर्थः। घ्राणस्येति। गन्धोपलब्धिमात्रपरिचेयं घ्राणं हस्तावच्छेदेन गन्धानुपलब्ध्या यथा निवर्त्तेत इत्यर्थः। हेतुसम्भवादिति। त्वगिन्द्रियं न वायुत्वाधिकरणं वायुत्वाभिव्यञ्जकरहितत्वात्, यद्यदभिव्यञ्जकरहितं न तत्तद्वत्, यथा घ्राणाभिव्यञ्जकगन्धोपलब्धिरहितो हस्तो न घ्राणवदित्यर्थः। ननूद्भूतस्पर्शस्यैव वायोः स्पर्शादिचतुष्कं लिङ्गं न तु वायुमात्रस्येति शङ्कते—उद्भूतेति। व्यापकानुपलब्धेर्विशेषपरत्वे पाणावपि गन्धोपलब्धिनिवृत्त्या गन्धो-

न्यायलीलावतीप्रकाशः

पार्थिवं जलमुत्पादयतीति नियमः। क्रोशादिव्यापिन इति जठरानलव्यवच्छेदार्थम्। रूपग्रहण चान्द्रकरसङ्ग्रहार्थम्। स्पर्शग्रहणं उष्मसङ्ग्रहार्थम्।

घ्राणस्येवेति। यथा गन्धानुपलब्धिलक्षणव्यापकाभावः पाणौ घ्राणाभावसाधकः, तथा स्पर्शशब्दाद्यभावः प्रकृतेऽपीत्यर्थः। तत्त्वेति। व्यापकानुपलब्धेर्विशेषपरत्वप्रसङ्गादित्यर्थः। तथा च गन्धोपलब्धिलक्षण-

न्यायलीलावतीप्रकाशविवृतिः

व्यतिरेके दृष्टान्तः। विशेषपरत्वप्रसङ्गादिति। गन्धोपलम्भकघ्राणपरत्व-

---

(१) लिङ्गैकस्वभावस्य तदभाव।

रसनमपि नाप्यम् । इन्द्रियत्वेनाभौतिकत्वात् मनोवत् । न चेदेवं मनसोऽपि पार्थिवत्वापत्तिः। श्रोत्रं च न स्वगुणग्राहकम्, इन्द्रियत्वात् मनोवत् । योग्यविशेषगुणशून्यत्वमत्रोपाधिरिति चेन्न, योग्यविशेषगुणशून्यत्वस्या[प्य]त एवानुमानात् ।

न्यायलीलावतीकण्ठाभरणम्

पलम्भकघ्राणमात्रस्य निवृत्तिः स्यान्न तु घ्राणमात्रस्येत्यर्थः । इन्द्रियत्वेनाभौतिकत्वादिति । रसनं नाप्यमभूतत्वात्। अभूतत्वं च इन्द्रियत्वात् मनोवदिति नानार्थः। यद्वा इन्द्रियत्वादभूतत्वाच्चेत्यनाप्य एव हेतुद्वयं तेन नासमर्थविशेषणत्वमसमर्थविशेष्यत्वं चेति । अभौतिकत्वं चाभूतत्वमेव अन्यथा दृष्टान्तस्य साधनवैकल्यं द्वितीयपक्षे, साध्यवैकल्यं वा प्रथमपक्षे स्यात् । न चेदेवमिति । आप्यवैधर्म्ये सत्यपि चेदाप्यत्वं तदा पृथिवीवैधर्म्येऽपि मनसः पार्थिवत्वं स्यादित्यर्थः । श्रोत्रञ्चेति । तथा च स्वगुणग्राहकत्वापत्त्या नभोभिन्नमेव श्रोत्रमित्यर्थः । ननु इन्द्रियस्य स्वगुणग्राहकत्वे योग्याविशेषगुणशून्यत्वं तन्त्रं श्रोत्रं च विशेषगुणवत्वात् स्वगुणग्राहकं स्यादित्याह—योग्येति । इन्द्रियत्वेन हेतुना योग्यविशेषगुणशून्यत्वमपि पक्षे साध्यमिति साधनव्यापकत्वान्नायमुपाधिरित्याह—नेति ।

न्यायलीलावतीप्रकाशः

व्यापकनिवृत्त्या गन्धोपलम्भकघ्राणस्यैव व्यावृत्तिः, न तु घ्राणमात्रस्येति विशेषपरत्वं तथात्रापि शक्यं वक्तुमिति भावः । 'अभौतिकत्वात्' अभूतत्वादित्यर्थः । अन्यथा दृष्टान्तस्य साध्यवैकल्यापत्तेः ।

न्यायलीलावतीप्रकाशविवृतिः

प्रसङ्गादित्यर्थः । (१)अभूतत्वादिति । अभौतिकत्वादित्यस्याभूतजन्यत्वादित्यर्थे साध्यवैकल्यं भूताजन्यत्वपरत्वे च प्रतियोगिगौरवात् तदपेक्षया लघुप्रतियोगिकस्य भूतत्वाभावस्यैव साध्यत्वमुचितमिति भावः। न चाभूतजन्यत्वपरत्वं प्रकृते शङ्कितमेव न, आदिपदवृद्धिप्रसङ्गादिति वाच्यम्, पितृपैतामहादिवदुत्तरपदवृद्ध्या तदर्थे तद्रूपस्य

---

(१) "क्वचिदप्रसङ्गादिति पाठः । तत्र गन्धानुपलम्भकघ्राणपरत्वाप्रसङ्गादित्यर्थः । अग्रे तथाऽप्यापीति पाठे तथा वायुस्थलवदित्यर्थः ।" द्वितीयपुस्तके अधिकोऽयं पाठः ।

इन्द्रियाणि न भौतिकानि इन्द्रियत्वात् मनोवत्(१)। अन्यथा मनोऽपि भूतात्मकमेव स्यात् । अनारम्भकत्वं तत्र बाधकमिति चेन्न, तस्याप्यसिद्धेः। यदा मनः पुरीतति वर्तते तदाल्पमवयविन·

न्यायलीलावतीकण्ठाभरणम्

इदानीं बहिरिन्द्रियत्वावच्छेदेनाभौतिकत्वं साधयति परः—इन्द्रियाणीति। अन्यथेति। यदि इन्द्रियत्वं भूतत्वनियतं स्यादित्यर्थः। तत्रेति। मनसो भौतिकत्व इत्यर्थः। तस्यापीति। मनसो नारम्भकत्व·स्याप्यसिद्धेरित्यर्थः। तर्हि मनसा यदारभ्यते द्रव्यं तदुपलभ्येतेत्यत आह—यदेति। 'पुरीतत्' नाडीविशेषः। तर्हि नाडीवदेव तदपि स्पा· र्शनप्रत्यक्षं स्यादित्यत आह—अल्पमिति। द्व्यणुकादिरूपमित्यर्थः।

न्यालालावतीप्रकाशः

तस्याभूताजन्यत्वात्। इन्द्रियाणीति। पूर्वमसाधारणभूतभेदः साधितोऽधुना भूतमात्राद्भेद इत्यपौनरुक्त्यम्(२)। पुरीततीति। यद्यदा विभुविशेष

न्यायलीलावतीप्रकाशविवृतिः

सम्भवेन दृष्टान्तासिद्धिप्रसङ्गेन तदर्थनिराकरणात्। पूर्वमिति। पूर्वं घ्राणादिषु प्रत्येकं पृथिव्यादिप्रत्येकभेदः साधितोऽधुना त्विन्द्रियत्वावच्छिन्ने भूतत्वावच्छिन्नभेदः साध्यत इत्यपौनरुक्त्यमित्यर्थः। एतेन बहिरिन्द्रियाणीत्यादिना भूतत्वावच्छिन्नभेद एव साधितः। इतरेत्यो भूतेभ्य इति स्वयमेव व्याख्यानादिति तेन पौनरुक्त्यमित्यपास्तम्। तत्र बहि· रिन्द्रियत्वावच्छेदेन साधनादिह त्विन्द्रियत्वावच्छेदेनेति भेदसम्भवात्। न चात्रापि पक्षस्थेन्द्रियपदं बहिरिन्द्रियपरमेवान्यथा दृष्टान्तासम्भवात् पक्षतावच्छेदकहेत्वोरभेदप्रसङ्गाच्चेति वाच्यम्, पक्षस्या· पि दृष्टान्तत्वमभेदानुमानवत् पक्षतावच्छेदकहेत्वोरभेदो न दूषणमेव सामानाधिकरण्यमात्रप्रतीतावपि तदवच्छेदेन प्रतीतेरुद्देश्याया असिद्धेरेवेतिमतावष्टम्भेनैवैतत्प्रयोगकरणादिति भावः।

मूले पुरीततीत्यादेरुपादानप्रयोजनमाह—यद्यदेति। चक्षुषः संसर्गिद्र·

(१) पूर्वं पृथिवीत्वादिरूपेण पृथिव्यादिभ्योऽष्टाभ्यो भेदः साधितः। तेन श्रोत्रं दिगिति भट्टमतमपाकृतम्। सम्प्रति भूतत्वेन रूपेण पञ्चभ्यो भेदः साध्यत इत्यपौनरुक्त्यम। इति दीधितिः।

(२) पूर्वं पृथिवीत्वादिना पृथिव्यादिपञ्चकाद् भेदः साधित इदानीं भूतत्वेन रूपेणेत्यर्थः। इति दीधितिः।

मारप्स्यते(१)ऽपीत्यविरोधात्। प्रयोजनाभावात्तत्सिद्धि(२)रिति चेन्न, सर्वप्रयोजनानामस्मादृशैरनाकलनात्। अपि चान्धतमसमचाक्षुषम्, आलोकासहकृतेन्द्रियवेद्यत्वाद्गन्धवत् [इति]। एवमपि तत्सामर्थ्यकल्पनायां चक्षुरेवैकमिन्द्रियं देहव्यापकमनुद्भूतरूपस्पर्शमस्तु। तच्च कतिभिरपि भागैः स्वाधिष्ठानवृत्ति बहि·

न्यायलीलावतीकण्ठाभरणम्

ननु मनसा यदारम्भणीयं तस्य प्रयोजनं सुखदुःखादिभोगजनकत्वं नास्तीति न तेनारम्भणीयमित्याह—प्रयोजनेति। शरीरान्तरान्तश्चारिकमेरेव तेन किञ्चित् प्रयोजनं स्यादित्याह—सर्वेति। षड्भिन्नं तामसमिन्द्रियं साधयितुं प्रस्तौति—अपि चेति। इन्द्रियान्तरभेदस्य स्फुटत्वेन चक्षुर्मात्रभेदकमाह—आलोकेति। तमसश्चाक्षुषत्वे वाह्यालोकापेक्षा स्यान्न च सास्ति, तथा च न तमश्चाक्षुषमिति यदिन्द्रियग्राह्यं तत्तदन्यदिन्द्रियमित्यर्थः। एवमपि वेति(३)। चक्षुर्नियतसहकारिवैधर्म्येऽपि चाक्षुषत्वे रसादीनामपि चाक्षुषत्वमेव स्यादित्यर्थः। ननु आलोकाभाव एव तमः, तद्ग्रहे चालोकापेक्षायां ग्राह्य·

न्यायलीलावतीप्रकाशः

(गु?)णग्राहकं तत्तदा द्रव्यानारम्भकमितिव्याप्तेः मनसो जाग्रद्दशायां द्रव्यानारम्भकत्वनियमादित्यर्थः। नवैव द्रव्याणि पञ्चैव वहिरिन्द्रियाणीति विभागभङ्गाय पार्थिवादिभिन्नमिन्द्रियं साधयितुमाह—अपि चेति। 'स्वाधिष्ठानवृत्ति'स्वाधिष्ठानसम्बन्धग्राहकम्, 'वहिर्वृत्ति'स्वाधिष्ठाना·

न्यायलीलावतीप्रकाशविवृतिः

व्यतया रूपसाक्षात्कारकाले द्रव्यारम्भकत्वाद्व्यभिचार इति विभुपदम्। यदि च चक्षुषोऽनुद्भूतरूपस्पर्शरूपतया नोद्भूतरूपस्पर्शवत्तेजःसाहित्येनारम्भकत्वं तदा प्रत्यासत्तिघटकतया स्वीयरूपसा(क्षा ?)त्कारजननकाले कपालादेर्घटाद्यारम्भकतया व्यभिचार इति विभुपदं द्रष्टव्यम्। उपनीतादिभानमादाय पूर्वोक्त एव व्यभिचार इति विशेषपदं ग्रहणविशेषणम्, लौकिकत्वं च तदर्थः। उक्तव्याप्तौ च निरु·

---

(१) ०नमारभतेऽपी०। (२) तदसिद्धिरि०।

(३) आदर्शमूलपुस्तकत्रयानुसारेण 'एवमपी"ति प्रतीकधारणं युक्तम्।

र्वृत्ति च स्यादितीन्द्रियनानात्वापलापः । वेद्यप्रच्युति(१)परिच्छेदे नेन्द्रियाणां विषयसहकारित्वं सर्वत्राभाव(२)ग्रहणप्रसङ्गात् इत्यालोकानपेक्षेति चेन्न, अनपेक्षा कथमप्यस्तु(३), तथाप्येतद्धेतुकचक्षुर्वैजात्यसिद्धेः । कथं तर्हि युगपद्घटतिमिरदीपादीनामुपलम्भ इति चेन्न, क्रमेण मनसाऽधिष्ठाने(४) सूक्ष्मकालभेदसम्भवात् तदिन्द्रियाणि मनोवद्द्रव्यान्तराण्येवेति नवैवेति व्याघातः ।

अत्रोच्यते । बहिरिन्द्रियग्राहकमानेनाद्यहेतुबाधात्

न्यायलालावतीकण्ठावरणम्

मेव तन्न स्यादित्याह—वेद्येति । 'वेद्यो' विषयस्तस्य 'प्रच्युति'रभावस्तद्ग्रहे विषय एव न सहकारीत्यर्थः। आलोकानपेक्षायामिदं निमित्तमस्तु तथापि आलोकासहकृतेन्द्रियवेद्यत्वानिबन्धनमचाक्षुषत्वं तमसो दुर्वारमेवेत्यर्थः । ननु घटतिमिरयोर्युगपदुपलम्भबलात् घटग्राहकचक्षुर्ग्राह्यत्वं तिमिरस्यापि स्यादित्याह—कथमिति । युगपत् प्रत्ययो भ्रान्त इत्याह—क्रमेणेति । उपसंहरति—तदिति ।

आद्यो हेतुरिन्द्रियत्वं भूतभेदबाधकं यदुक्तं तद् भूतत्वनियतबहिरिन्द्रियत्वसिद्ध्या बाधितमित्याह—बहिरिति । भूतत्वसाधनायाह—

न्यायलीलावतीप्रकाशः

सम्बन्धग्राहकमित्यर्थः । वेद्येति । अभावज्ञान इत्यर्थः । विषयेति । प्रतियोगिसहकारित्वमित्यर्थः । कथमिति । घटतिमिरग्राहकेन्द्रिययोर्भेदेन न युगपन्मनसाऽधिष्ठानसम्भव इत्यर्थः ।

बहिरिन्द्रियेति । भूतभेदग्राहकानुमानं भूतत्वग्राहकानुमानबाधित-

न्यायलीलावतीप्रकाशविवृतिः

पधिसहचार एव विपक्षबाधकः । मिश्रास्तु तेन युगपदिन्द्रियाधिष्ठानसम्भवाद्व्यासङ्गानुपपत्तिरित्येव विपक्षबाधकमत एव मूले स्वमित्युक्तमिति वदन्ति तदयुक्तम् । विभुविशेषगुणकाले स्वल्पारम्भाविरोधादारब्धस्य मनस्त्वे मानाभावाच्च । अभावरूपविषयसहकारित्वमत्रापीत्यत आह—प्रतियोगीति । ननु भूतत्वाभूतत्वौदासीन्येनैव बहिरिन्द्रियग्राहकमानप्रवृत्तिरित आह--भूतेति । तथा च मूले

---

(१) ग्रपरिष्कृतिप० । (२) ०भावाग्र० । (३) कथञ्चिदस्तु । (४) सा तदधिष्ठाने ।

यद्यद्बाह्यविशेषगुणव्यञ्जकं(१) तत्तद्बाह्यविशेषगुणाश्रय एव, यथा वायुतेजसी(२)। न चास्य शङ्कितव्यभिचारित्वम्। दृश्यादृश्योपाधिव्युदासे साध्येतरतोपाधेर्बाधैकगम्यस्य(३) तदभावेनाभावे तद-

न्यायलीलावतीकण्ठाभरणम्

यद्यदिति। यद्बहिरिन्द्रियं रूपादिषु मध्ये यं विशेषगुणं गृह्णाति तद्बहिरिन्द्रियं तज्जातीयविशेषगुणवदेवेति व्याप्तेर्घ्राणादीनां गन्धववत्त्वादिसिद्धौ पृथिवीत्वादिनियमे भूतत्वस्यैव सिद्धेरित्यर्थः। इयमेव व्याप्तिर्मनोव्यावृत्तये बाह्यपदप्रक्षेपेण सूचिता।

ननु तद्बाह्यगुणग्राहकमपि तज्जातीयविशेषगुणवन्मा स्यादित्याशङ्क्याह—न चेति। उपाधिशङ्कया व्यभिचारशङ्का स्यात् सैव नास्तीत्याह—दृश्येति। तदनुपपत्तेरिति। व्यभिचारशङ्कानुपपत्तेरित्यर्थः।

न्यायलीलावतीप्रकाशः

मित्यर्थः। तदुपपादयति—यद्यदिति। द्रव्यं सदिति शेषः। तेनालोकरूपादौ न व्यभिचारः। बाह्यग्रहणं मनोव्यावृत्त्यर्थम्। द्वितीयं तत्स्पष्टार्थम्। तथा च घ्राणादीनां गन्धवत्त्वादिसिद्धौ भूतात्मकत्वसिद्धेरित्यर्थः। ननु द्रव्यत्वमसिद्धं न चेन्द्रियत्वेन तात्सिद्धिः तस्याप्यसिद्धेः, मनसो दृष्टान्तस्यापीन्द्रियत्वासिद्धेः, क्रियायाः

न्यायलीलावतीप्रकाशविवृतिः

बहिरिन्द्रियग्राहकपदेन तदुपजीवकमानमेवोक्तमिति भावः। द्रव्यं सदिति। व्यञ्जकता चासाधारण्येनोक्ता। तेन न कालादौ व्यभिचारः। मनोव्यावृत्त्यर्थमिति। सा च बाह्यपदस्य व्यञ्जकविशेषणत्वे न तु विशे-

(१) ०गुणाभिव्यञ्जकमिति दीधित्यभिमतः पाठः।

(२) यद् यदिति तत्तदिति वीप्सितम्। यद् यद् द्रव्यम्। अभिव्यञ्जकत्वं त्वभिव्यक्तिजनकविषयसन्निकर्षशालित्वम्। तेनात्मादिव्युदासः। 'बाह्यो' बहिरिन्द्रियग्राह्यः। विशिष्यते इति विशेषोऽनात्मसमवेतः। मनोव्यावर्त्तनाय वैकल्पिकमनयोरुपादानम्। बहिरिन्द्रियग्राह्यविशेषगुणजातीयगुणवत्त्वं भूतत्वमिति ताद्रूप्येणोपादानम्। गुणपदं च गुणत्वव्याप्यजात्या तज्जातीयत्वलाभाय। यद्वा यद् द्रव्यं यस्य बाह्यविशेषगुणस्याभिव्यञ्जकं तत् तज्जातीयगुणवादित्यर्थः। बाह्यत्वमनात्मसमवेतत्वम्। विशेषगुणत्वं च प्रतिनियतेन्द्रियग्राह्यत्वम्। तेन स्नेहसांसिद्धिकद्रवत्वाभिव्यञ्जकदर्शनस्पर्शनयोर्न व्यभिचारः। न वा गन्धाभिव्यञ्जकसलिले व्यभिचारः, उद्भूतरसवदन्यत्वेन विशेषणात्। उद्भूतोपादाने घ्राणरसनयोरसिद्धिः।............'वायुतेजसी, वायुप्रभे। इति दीधितिः।

(३) बाधैकग०।

न्यायलीलावतीप्रकाशः

करणजन्यत्वमात्रव्याप्तेः, तस्य चाद्रव्येऽपि सत्त्वात् । अत्राहुः । गन्धोपलब्धी रसाद्युपलब्ध्यजनकसंयोगिकरणसाध्या तदन्यकार्यत्वादिति व्यावृत्तकरणसिद्धौ तत् पार्थिवं रसाद्यव्यञ्जकत्वे सति गन्धव्यञ्जकद्रव्यत्वात् चम्पकाद्यधिवासाधिकरणविततद्रव्यवदिति द्रव्यत्वग्राहकमुपजीव्यैव बहिरिन्द्रियत्वस्य हेतुत्वं ततश्च पृथिवीत्वादिसिद्धिरिति भवति बहिरिन्द्रियत्वसाधनेन परम्परया बाधः ।

न्यायलीलावतीप्रकाशविवृतिः

षगुणविशेषणत्वे इति ध्येयम् । गन्धोपलब्धिरिति । गन्धलौकिकसाक्षात्कार इत्यर्थः । मनसाऽर्थान्तरमत आह--रसादीति । आदिपदं साध्यान्तरसूचनाय । द्रव्यत्वसिद्धये संयोगीति । चक्षुरादीनामुक्तरूपेणैव कारणत्वमिति नाप्रयोजकता । अत एव न व्यापकांशव्यर्थतापि । तदन्येति । रसोपलब्ध्यन्यकार्यत्वादित्यर्थः । नन्विदं यथाश्रुतमङ्कुरादौ व्यभिचारि । मैवम् । रसोपलब्ध्यन्यबहिर्विशेष्यकलौकिकसाक्षात्कारत्वस्य हेतुत्वात् । अत एव न सुखोपलब्धौ न वा रूपस्योपनीतस्य मानससाक्षात्कारे न वा रूपविशेष्यका(नु?)मितौ व्यभिचारः । दृष्टान्तश्च रसगर्भसाध्ये च रसोपलब्धिः । यदि च बहिरिन्द्रियमात्रासिद्धेर्न सा दृष्टान्तस्तदा व्यतिरेक्येव च्छिदावदिति पाठेऽपि च्छिदापदस्योक्त एव तात्पर्यमिति मिश्राः ।

केचित्तु तदन्यशरीरजन्यकार्यत्वादिति हेतुः । अत एव च्छिदा दृष्टान्तः । न च चेष्टायां व्यभिचारः शरीरनिमित्तकारणत्वस्य हेतुप्रवेशात् । न च तथापि सुखाद्युपलब्धौ व्यभिचारः, मानससाक्षात्कारभिन्नत्वेन विशेषणादित्याहुः । संयोगित्वेन तत्सिद्धौ यद्यद्ग्राह्येत्यादिमूलोक्तव्याप्तिप्रभवानुमानादेव यद्यपि भूतत्वसिद्धिस्तथापि तस्याप्यत्रैव पर्यवसानमित्यभिसन्धानेन वैशद्याय वा पार्थिवत्वं साधयति—तत्पार्थिवमिति । द्रव्यत्वग्राहकमिति । अन्यथा संयोगाश्रयत्वगर्भेन्द्रियत्वस्यैवाग्रहादिति भावः । हेतुत्वं प्रयोजकत्वं पक्षतावच्छेदकतयेति शेषः । न च तथापि न बहिरिन्द्रियत्वग्राहकेन बाधस्तस्य भूतत्वाविषयत्वादित्यत आह—ततश्चेति । द्रव्यत्वमगृहीत्वा न तद्ग्रहस्तद्ग्रहे च तद्गर्भनिरुक्तहेतुना पृथिवीत्वसिद्धौ परम्परया तद्बाध इत्यर्थः । यद्यपि द्रव्यत्वग्राहकेण न बाधः पार्थिवत्वग्राहकस्य [च] नोपजी-

नुपपत्तेः । न च जलेन व्यभिचारः, रसेऽपि(१) व्यञ्जकत्वात् । नापि पार्थिवे योग्यतानियमः, तेजोवदनुद्भूतरूपस्पर्शत्वाद्यविरो-

न्यायलीलावतीकण्ठाभरणम्

घ्राणस्य पार्थिवत्वे साध्ये गन्धमात्रव्यञ्जकत्वस्य हेतोर्नवशरावगन्धव्यञ्जकजले परेणोक्तं व्यभिचारमपाकरोति—न चेति । रसस्यापीति । शक्तादि(सक्त्वादि?)रसस्येत्यर्थः । स्वकीयरसस्य वा । न च कुङ्कुमगन्धाभिव्यञ्जकघृतादेर्दृष्टान्तत्वं न स्यादिति वाच्यम्, यत् पार्थिवं न भवति तद्रूपादिषु मध्ये गन्धमात्रव्यञ्जकमपि न भवतीति व्यतिरेकव्याप्तेरेवाभिमतत्वात् । अन्वयस्तूपेय एव । अत्र न तूपायोऽपीति भावः । महत्यां पृथिव्यां गन्धाद्यन्यतमोद्भवनैयत्यं परोक्तं दूषयति—नापीति । तेजोवदिति । जठरानलो दृष्टान्तः । चक्षुषस्तैजसत्वासिद्धावपि । तर्हि वायुरप्यनुद्भूतगन्धा-

न्यायलीलावतीप्रकाशः

जलेनेति । नवशरावे गन्धव्यञ्जकेनेत्यर्थः । रसस्यापीति । सक्तुप्रभृतौ तथा दर्शनादिति भावः । न च गन्धव्यञ्जकरसाद्यव्यञ्जकजलव्यक्त्या व्यभिचारः, द्रव्यत्वसाक्षाद्व्याप्यभिन्नरूपेण गन्धासाधारणव्यञ्जकत्वस्य घ्राणपार्थिवत्वसाधकत्वात् । पृथिव्या द्रव्यत्वव्याप्यव्याप्येन घृतत्वादिना गन्धव्यञ्जकत्वात्, जलस्य तु जलत्वेनैव तत्त्वात्, महतः पार्थिवस्येत्यादि दूषयति—नापीति। तेजोवदिति। यद्यपि चक्षुषस्तैजसत्वासिद्धेः सुवर्णस्य च चाक्षुषतया उद्भूतरूपत्वान्न दृष्टान्तता तथा-

न्यायलीलावतीप्रकाशविवृतिः

प्यतेति न बाधः, किन्तु समबलतया सत्प्रतिपक्षतैव, तथापि क्लृप्तान्तर्भावलाघवसहकारेण तस्य बलवत्वाद्बाध इत्यभिसन्धिः । अत एव "अभूतत्वसाधनमप्रयोजक"मिति वक्ष्यति। द्रव्यत्वेति। द्रव्यत्वसाक्षाद्व्याप्यघटितभिन्नरूपेणेत्यर्थः । अन्यथा जलस्यापि योग्यजलत्वेन गन्धव्यञ्जकतया व्यभिचारतादवस्थ्यात् । न हि तत्र जलत्वमवच्छेदकमतिप्रसङ्गात् । एवं च तादृशधर्मघटितेन मनस्त्वेन मनसोऽपि गन्धव्यञ्जकतया तद्व्यावृत्त्यर्थमसाधारणेत्युक्तम् । द्रव्यपदञ्चात्र प्रवेश्यमन्यथा सन्निकर्षे व्यभिचारतादवस्थ्यात् । 'जलत्वे-

(१) रसस्यापि ।

धात्(१)। न च(२) वायुबन्दीग्रहः(३) तत्र विशेषस्योक्त-त्वात्। चक्षुश्च विचित्रमपि स्यादविन्धनतेजोवत् तैजसं, गुणेषु

न्यायलीलावतीकण्ठाभरणम्

दिका पृथिवी स्यादिति परोक्तं दूषयति—नापीति। विशेषस्येति। उद्भूतस्पर्शाया पृथिव्या उद्भूतरूपवत्त्वनियमान्न वायुः पृथिवीत्यु-क्तत्वादित्यर्थः। कोशादिव्यापिन इत्यादि परोक्तं दूषयति—चक्षुरिति। विचित्रत्वमनुद्भूतसर्वगुणत्वम्। यथा तेजोविशेषस्याविन्धनत्वं तथैत द्पीत्यर्थः। तैजसमिति। चक्षुरित्यनुवर्त्तनीयम्। गुणेष्विति। रूपादिच-तुर्ष्वित्यर्थः। तथा च परगन्धाद्यव्यञ्जकत्वे सति पररूपव्यञ्जकत्वा-दिति तैजसत्वे हेतुरिति भावः। एवं रसनमपीत्यत्राप्यमिति शेषः। रूपादिषु मध्ये रसस्यैव व्यञ्जकत्वादित्यर्थः। श्रोत्रस्य स्वगुणग्राहक-

न्यायलीलावतीप्रकाशः

पि जाठरानल एव दृष्टान्तः। वस्तुतो घ्राणं यदि पार्थिवं महत्स्या-दुद्भूतगन्धाद्यन्यतमं स्यादित्यत्र विपक्षे बाधकाभावादप्रयोजकत्वम्। अन्यथा महत्त्वमात्रेऽपि तत्प्रयोजकमित्याकाशे महत्त्वं न स्यात्। विशेषस्येति। पार्थिवगन्धस्पर्शयोस्तुल्ययोगक्षेमत्वादित्यस्येत्यर्थः। विचित्रमिति। कोशादिव्यापकमप्यनुद्भूतरूपस्पर्शमित्यर्थः। तैजस-त्वसिद्धावविन्धनं तेजो दृष्टान्तः स्यादिति तत्साधयति—तैजसमिति। गुणेष्विति। परकीयगन्धाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वादि-

न्यायलीलावतीप्रकाशविवृतिः

नैव' जलत्वघटितेनैवेत्यर्थः। घ्राणमिति। अत्रापाद्ये उद्भूतपदं प्रत्य-क्षपरं तेन न घ्राणस्याणुत्वमङ्गीकृत्येष्टापत्तिः। न चैवं मन्मते आपा-(द?)कासिद्धिः स्थूलावयवावच्छिन्नगन्धग्रहानुपपत्त्या महत्त्वसिद्धेरि-ति भावः। एवं च परमाणावेव व्यभिचार इति महदिति विशेषणम्। जठर्यानले व्यभिचार इति पार्थिवमिति। वज्रादौ व्यभिचार इत्यन्य-तमपदम्। संयोगादिव्यञ्जकतया स्वरूपासिद्धेरन्यथा व्याचष्ट—परकीयेति। गन्धाव्यञ्जकत्वे सति व्यञ्जकत्वमप्रसिद्धं व्यञ्जकमात्र-स्यैवोपनीतगन्धाभिव्यक्तिस्वरूपयोग्यत्वादिति परकीयेति विशे-

---

(१) ०स्पर्शवत्त्वाय०। (२) नापीति कण्ठाभरणधृतः पाठः। (३) वायुप्रातिवन्दिग्र०।

षणम् । तदर्थस्तु परः (१)स्वाश्रयस्तद्विशेषणकत्वम् । एवं चाश्रयविशेषणकगन्धाभिव्यक्तिजनकान्यत्वं सत्यन्तार्थः । उपनीतभाने च गन्ध एव विशेषणं न त्वाश्रय इति भावः । तावन्मात्रं च त्वगादौ व्यभिचारीति रूपव्यञ्जकत्वम् । तदपि त्वगादौ व्यभिचारीति परकीयेति । परविशेषणकेत्यर्थः ।

वस्तुतस्तु तादृशव्यञ्जकतावच्छेदकजातिमत्त्वं हेतुरतो न जलशरीरगोलके व्यभिचारः, तत्र व्यञ्जकतावच्छेदकस्य गोलकत्वस्य जनकत्वादिना सङ्करभयेन जातित्वाभावात् । चक्षुरधिष्ठानत्वस्यैव गोलकत्वरूपत्वात् । अत एव सन्निकर्षे व्यभिचार(वार?)णाय नात्र द्रव्यपदमुपात्तम् । तत्र तादृशजात्यभावेनैव व्यभिचाराप्रसङ्गात् । आश्रयविशेषणकेत्यादौ स्वविशेष्यकेत्यर्थस्तेन गन्धविशेष्यकसाक्षात्काराजनकत्वे सति रूपविशेष्यकसाक्षात्कारजनकत्वं हेतुः पर्य्यवस्यति । एवं च घटगन्धसमानाधिकरणः स्पर्श इत्यादिक्रमेण त्वगादीनामप्याश्रयविशेषणकगन्धव्यञ्जकतया नाप्रसिद्धितादवस्थ्यम्, न वा घटरूपसमानाधिकरणः स्पर्श इति प्रतीतिमादाय व्यभिचारतादवस्थ्यम् । न चैवमपि सामान्यजप्रतीतिमादाय तदुभयदोषतावस्थ्यं लौकिकत्वेनापि विशेषणादिति मिश्राः ।

अत्र वदन्ति एवं सति प्रदीपदृष्टान्तानुपपत्तिः, तत्र व्यञ्जकतावच्छेदकजातेरसत्त्वात् । प्रदीपत्वादेरल्पवृत्तितया तेजस्त्वस्य चातिप्रसक्त्या उद्भूतरूपालोकत्वेनैव व्यञ्जकत्वादिति । अत्र ब्रूमः । तेजस्त्वव्याप्योद्भूतरूपसमवायिकारणतावच्छेदकजातेरेव प्रदीपादौ व्यञ्जकतावच्छेदकत्वम् । न च सा परमाण्वादिवृत्तित्वेनातिप्रसक्तेति वाच्यम्, उद्भूतत्वस्य निमित्तभेदप्रयोज्यत्वमितमतेनैतदभिधानेन परमाण्वादौ तदस्वीकारात् । न च सा जातिः पृथिव्यामपीति अतिप्रसक्तिरिति वाच्यम, भास्वरत्वव्याप्यस्योद्भूतत्वस्य जातिसङ्करभयेन स्वीकारात् । तादृशरूपसमवायिकारणतायाः पृथिव्यादावभावात् यदि च तादृशजातिर्न स्वीक्रियत तदा न जातिगर्भो हेतुः किन्तूक्तव्यभिचारवारणाय शरीरावयवान्यत्वं हेतुविशेषणमतो न दृष्टान्तासिद्धिः । द्रव्यपदं च तथा सति सन्निकर्षवारणाय

(१) पर आश्रयस्त० ।

रूपस्यैव व्यञ्जकत्वात् दीपवत्। एवं रसनमपि। क्षित्यादेरश्रोत्रत्वे अजसंयोगाभावात्। शब्दद्रव्यत्वनिषेधे श्रोत्रस्य स्वगुणग्राह-

न्यायलीलावतीकण्ठाभरणम्

त्वेनानिन्द्रियत्वं यत् परेणोक्तं तत्राह—क्षित्यादेरिति। गन्धादिचतुर्णामव्यञ्जकत्वेन श्रोत्रं पृथिव्यादिचतुष्कान्तर्भूतं तावन्न भवति वि-

न्यायलीलावतीप्रकाशः

त्यर्थः(१)। एवमिति। गन्धादिषु रसस्यैव व्यञ्जकत्वादित्यर्थः। इन्द्रियत्वेनाभूतत्वसाधनमप्रयोजकमिति भावः। त्वगिन्द्रियस्य वायवीयत्वं प्रागेव साधितमिति श्रोत्रं न स्वगुणग्राहकमिति दूषयति—क्षित्यादेरिति। क्षित्यादेरश्रोत्रत्वमुभयसिद्धमतः श्रोत्रं न स्वगुणग्राहकमित्यत्र किमभिप्रेतम्? किं श्रोत्रमाकाशादन्यद्विभु द्रव्यं शब्दस्त्वाकाशगुणः द्रव्यमेव वा शब्दः, क्षित्यादेरन्यदविभु द्रव्यं वा श्रोत्रं शब्दस्त्वाकाशगुण एव। आद्ये अजसंयोगेति। विभुद्रव्ययोः संयोगाभावे संयुक्तसमवायाभावाच्छब्दाग्रहणप्रसङ्गः। द्वितीये शब्दद्रव्यत्वेति। बहिरिन्द्रियव्यवस्थापकत्वादिना गुणत्वसिद्धेरित्यर्थः। तृतीये श्रोत्रस्येति। वहिरिन्द्रियस्य तस्य ग्राह्यजातीयासाधारणगुणवत्त्वेन शब्दवत्त्वात् क्षित्यादौ च शब्दनिषेधात् शब्दाश्रयस्य लाघवादैक्यसिद्धेः धर्मि-

न्यायलीलावतीप्रकाशविवृतिः

प्रवेश्यमिति संक्षेपः।

वस्तुतो गुणेषु(२) मध्ये रूपविशेष्यकप्रत्यक्षमात्रजनकत्वादिति मूलानुसारी हेतुः सम्यक्। गोलकस्यापि स्वीयरूपव्यञ्जकतया न व्यभिचारः। प्रदीपप्रभा च दृष्टान्तोऽतो न स्पर्शव्यञ्जकतया साधनवैकल्यमिति। ननु रसनस्येन्द्रियत्वेनाभूतत्वसाधने जागरूके आप्यत्वसाधनं बाधितमित्यत आह—इन्द्रियत्वेनेति। धर्मीति। श्रोत्रं न स्वगुण-

---

(१) गन्धाद्यव्यञ्जकस्यापि दीपस्य स्वीयस्पर्शाभिव्यञ्जकत्वान्न गन्धाद्यव्यञ्जकत्वमित्याद्यं परकीयपदम्। द्वितीयं च परं गन्धाद्यव्यञ्जकस्वीयरूपव्यञ्जकघटादिवारणाय। वस्तुतो गन्धादिसामान्यमेवोपादेयम। स्पर्शघटिते तु प्रभैव दृष्टान्तः। गन्धरसाव्यञ्जकस्येव वज्रादेर्गन्धरसस्पर्शाव्यञ्जकस्य चेन्द्रनीलादिप्रभासम्बद्धस्य पार्थिवभागस्य स्वीयरूपञ्जकत्वात् परकीयेति। इति दीधितिः।

प्रभाया दृष्टान्तत्वपक्षे आद्यपरकीयपदानुपादाने पार्थिवत्रसरेणौ व्यभिचारवारणाय द्वितीयपरकीयपदमित्यस्मद्गुरुचरणाः।

(२) णेषु गन्धादिषु म०।

कत्वात् । न चान्धकारग्राहकमन्यत् । निषेध्यनिषेधयोः समानेन्द्रियवेद्यत्वनियमात् । व्याघाताच्च । प्रतियोगित्वसहकारि-

---

न्यायलीलावतीकण्ठाभरणम्

भुद्रव्यान्तरं यदि श्रोत्रं स्यात्तदा संयुक्तसमवायेन शब्दग्रहः सम्भाव्येतापि, यद्याकाशेन तस्य संयोगः स्यात्, स च नान्यतरकर्मादिजन्योऽतोऽजः स्वीकर्त्तव्यः । स च प्रमाणबाधित एव । संयोगप्रत्यासत्त्या च तदा, यदि शब्दो द्रव्यं स्यात्तथा च परिशेषात् समवाय एव सन्निकर्षः शब्दग्राहक इति परिशेषादाकाशमेव श्रोत्रम् । तच्च स्वगुणग्राहकमेवेत्यर्थः । तथा चेन्द्रियत्वेन श्रोत्रस्य स्वगुणग्राहकत्वे साध्येऽनुद्भूतगुणत्वमेवोपाधिरिति भावः । तामसमिन्द्रियान्तरं निराकरोति—न चेति । निषेध्येति । प्रतियोगिग्राहकेन्द्रियग्राह्यत्वादभावस्य चाक्षुषमेव तम इत्यर्थः । तर्हि तमोग्रहे बाह्यालोकः सहकारी स्यादित्यत आह—व्याघातादिति । तत्सहकारित्वे तम एव तत्र व्याहतं स्यादित्यर्थः

आप्यवैधर्म्ये सत्यपि यदि रसनमाप्यं तदा पृथिवीवैधर्म्ये-

न्यायलीलावतीप्रकाशः

ग्राहकमानबाध इत्यर्थः । यद्यपि यद्यत्प्रतियोगिग्राहकं तत्तदभावग्राहकमित्युपमाने व्यभिचारि । यदिन्द्रियं यद्ग्राहकं तत्तदभावग्राहकमित्यपि मूर्त्तवत्त्वाभावे व्यभिचारि मूर्त्तवत्त्वस्य योग्यायोग्यमूर्त्तघटितत्वेन तदभावस्यातीन्द्रियत्वात्, तथापि यदिन्द्रियं यद्ग्राहकं तत्तदैन्द्रियकाभावग्राहकमितिनियमादालोकस्य चाक्षुषत्वे तदभावस्यापि चाक्षुषत्वमित्याह—निषेध्येति । एतच्च स्वसिद्धान्तावष्टम्भेन अन्धकारस्याभावत्वमभ्युपेत्योक्तम् । ननु चाक्षुषत्वे तस्यालोकसहकारित्वप्रसङ्ग इत्यत आह—व्याघाताच्चेति । आलोकसत्त्वे तत्संसर्गाभावरूपं तमो ग्राह्यमेव न स्यादिति किंग्रहे स सहकारी स्यादित्यर्थः । इन्द्रियाणां भौतिकत्वे मनोऽपि तथा स्यादित्यत

न्यायलीलावतीप्रकाशविवृतिः

ग्राहकमित्यस्येति शेषः ।

ननु चाक्षुष (त्व ?) इति । चक्षु(ष ?)स्तमोवा(ग्रा ?)हकत्व इत्यर्थः । प्रसन्नान्धोऽभग्नगोलकोऽन्ध इत्यर्थः । श्रोत्रतदधिष्ठानयो-

त्वस्यापि प्रतिक्षेपात् । मनःप्रतिबन्दिग्रहस्य [च] मनस्येव निरसनात् । तथापि विशिष्टादृष्टोपगृहीतं गोलकमेवास्तु इन्द्रियं कर्णशष्कुलीवत् । न च व्यवहितोपलम्भापत्तिः । योग्यदेशस्थस्यैव ग्राह्यत्वात् । अन्यथा महानिले(१) ऋजुवस्त्वग्रहणप्रसङ्गः । पवनेन तेजसां दूरमपनयनात् तेजोभेदे नैवमिति चेन्न, करा-

---

न्यायलीलावतीकण्ठाभरणम्

ऽपि मनः पृथिवी स्यादिति यदुक्तं परेण, तद्दूषयति—मन इति। बौद्धः शङ्कते—तथापीति। कर्णशष्कुलीवदिति प्रसाध्याङ्कम्। विशिष्टादृष्टोपगृहीतत्वमात्रे वा कर्णशष्कुली दृष्टान्तः। बहिर्वृत्त्यभावमात्रे वा प्रसन्नान्धव्यावृत्तये विशिष्टादृष्टोपगृहीतत्वं विशेषणम्। ननु प्राप्तिश्चेन्न तन्त्रं तदा व्यवहितमपि गृह्णीयादित्यत आह—न चेति। विषययोग्यताया एव प्रयोजकत्वं न तु प्राप्तेरित्यर्थः। अन्यथेति। यदि प्राप्य गृह्णीयादित्यर्थः। तेजोभेद इति। शीघ्रगमनशील इत्यर्थः। एतादृशस्यानपनेयत्वे करेणापि चक्षुरपनयो न स्यादित्याह—कराभ्यामिति। सन्नि-

न्यायलीलावतीप्रकाशः

आह—मनःप्रतिवन्दीति। यद्यपि चक्षुस्तैजसत्वं प्रागेव साधितं तथापि गोलकसम्बद्धमेव तेजश्चक्षुरस्तु नाश्रयबहिर्वर्त्तीति शङ्कामाह—तथापीति। विशिष्टादृष्टोपगृहीतमिति। प्रसन्नान्धव्यावृत्तये अधिष्ठानादन्यदेशगामित्वाभावसाम्येनाह—कर्णशष्कुलीवदिति। यथा कर्णशष्कुलीबहिर्वृत्त्याकाशं न श्रोत्रमित्यर्थः। ननु चाप्राप्तत्वाविशेषात्कुड्यव्यवहितमपि चक्षुर्गृह्णीयादित्यत आह—न चेति। गोलकाद्बहिर्निर्गच्छच्चक्षुः कियद्दूरमेव गच्छति नातिदूरम्, स्फटिकादिना न प्रतिबध्यते किन्तु कुड्यादिनेति त्वदुपगमवन्मयापि देशस्वभावविशेषस्य योग्यतानियामकत्वोपगमादित्यर्थः। ननु विषयसम्बद्धस्वभावत्वाच्चक्षुषो न पवनेन दूरापनय इत्याह—तेजोभेद इति। कराभ्यामिति। यद्यपि करादिवारणीयमपि काण्डादि वायुना न प्रतिबध्यत इत्यनैकान्तिकं

न्यायलीलावतीप्रकाशविवृतिः

रभेदा(दा?)ह—अधिष्ठानादिति। विषयसम्बद्धेति। अन्याप्रतिरुद्ध(२)

---

(१) ०था महानिशि। (२) ०न्याप्रतिबद्धस्व०।

भ्यामप्यनावरणापत्तेः। शाखाचन्द्रमसोः समसमयवेदनाच्च(१)। न च तद् भ्रान्तं, यौगपद्यमात्रप्रतिक्षेपापत्तेः। तत्र बाधकाभावादिति चेन्न, तुल्यत्वात्। एतेन रसनादिकमप्यपास्तम्(२)।

त्वगपि देहव्यापी उद्भूतस्पर्शः पवन एवास्तामिति नातीन्द्रियतासिद्धिरिति(३) चेन्न, का देशस्य योग्यता, रूपभेदो वा इन्द्रियप्राप्तिर्वा। नाद्यः। दिगन्तरस्थेन सत्यावरणे तदनुपलब्धेः। पुरुषान्तरं प्रति तदावृतमिति चेन्न, एकस्यावृतानावृत-

न्यायलीलावतीकण्ठावरणम्

कृष्टविप्रकृष्टयोरतुल्यकालग्रहणं न स्यादित्याह—शाखेति। तदिति। वेदनयोः समकालीनत्ववेदनमित्यर्थः। तत्रेति। यौगपद्यमात्र इत्यर्थः। रसनादिकमिति। अधिष्ठानातिरिक्तमित्यर्थः।

पवन एवेति। वाह्य एवेत्यर्थः। नेन्द्रियसिद्धिरिति। अतीन्द्रियसिद्धिरित्यर्थः। यद्वा सिद्धान्त्यमतेन्द्रियसिद्धिरित्यर्थः। रूपभेद इति। स्वरूपभेद इत्यर्थः। दिगन्तरस्थेनेति। व्यवहितघटनिकटस्थेनेत्यर्थः। पुरुषान्तरमिति। व्यवहित-

न्यायलीलावतीप्रकाशः

तथापि वेगमान्द्यस्यावश्यकतया यावद्दूरं निर्वाते याति काण्डादि न तावद्दूरं वायावित्यस्ति। चक्षुस्तु वातनिर्वातयोरुभयत्र तुल्यगाम्येव। तथा च करप्रतिबद्धगतिकं वाते मन्दं गच्छतीति नियम इति भावः। रसनादिकमिति। अधिष्ठानसम्बद्धजलादिभिन्नमिति शेषः।

पवन एव प्रत्यक्षस्पर्शाश्रय इति शेषः। दिगन्तरस्थेनेति। सन्निधानवद् व्यवधानेऽपि पर्वतवत्केशस्यापि ग्रहापत्तेर्दूरसाक्षात्कारे

न्यायलीलावतीप्रकाशविवृतिः

स्वभावत्वादित्यर्थः। वेगेति। अन्यथा वातनिर्वातयोः काण्डस्य (४)तुल्यतापत्तेरिति भावः। सन्निधानवदिति। देशस्वरूपभेदात्मकयोग्यताया नियामकत्वे आवृतस्यापि ग्रहणापत्तिरिति मूलोक्तमुपलक्षणम्। दूरस्थकेशस्यापि ग्रहणापत्तिः पर्वतसाक्षात्कारानुरोधेन तद्देशस्य योग्यत्वादित्यर्थः। अत्रेष्टापत्तिमाशङ्क्याह—दूरेति। स चात्र

---

(१) वेदनत्वाच्च। (२) ०नादिकमपास्तम्।
(३) नेन्द्रियसिद्धिरिति कण्ठाभरणधृतः पाठः। (४) तुल्यगत्यापत्तिरिति भा०।

त्वविरोधात् । ज्ञातृभेदेनैकस्यैव ज्ञातृपुरोवर्तिकुड्यादिपरापरदेश-संयोगित्वं तत्त्वमविरुद्धमिति चेन्न, आवृताप्रकाशकत्वेन दीपवत्प्राप्यकारित्वसिद्धेः । नेतरः । तत एवाधिष्ठानबहिर्भूतेन्द्रि-

न्यायलीलावतीकण्ठाभरणम्

मित्यर्थः । ज्ञातृभेदेनेति । ज्ञात्रोश्चैत्रमैत्रयोः पुरोवर्त्ति यत् कुड्यं यत्परापरदेशसंयोगित्वमावृतानावृतत्वमविरुद्धमेवेत्यर्थः । चक्षुः प्राप्यकारि प्रकाशकत्वे सति आवृताप्रकाशकत्वात् प्रदीपवदित्यनुमानात् प्राप्यकारित्वसिद्धिरित्याह—आवृतेति । इन्द्रियप्राप्तियोग्यताभ्युपगमेनैव दूषयति—नेतर इति । तत एवेति । गोलकस्य दूरस्थेनाप्राप्तेरित्यर्थः । महानि-

न्यायलीलावतीप्रकाशः

महत्त्वविशेषः कारणमिति भावः । ननु यत्र क्वचित् कुड्यादिसत्त्वं न प्रतिबन्धकमपि तु ग्राह्यग्राहकमध्यवर्त्ति । न चैवं कुड्यादौ मध्यवर्त्तिनि पर्वताद्यग्रहप्रसङ्गः, ग्राह्याधिकपरिमाणवन्मध्यवर्त्तिनः कुड्यादेः प्रतिबन्धकत्वादित्यभिप्रेत्याह—ज्ञातृभेदे(ने?)ति । आवृतेति । चक्षुः प्राप्यकारि प्रकाशकत्वे सत्यावृताप्रकाशकत्वात् प्रदीपवत् । न च गोलकपक्षी-

न्यायलीलावतीप्रकाशविवृतिः

नास्त्येवेति नेष्टापत्तिरिति भावः । इतिपूर्वोत्तरफक्किकयोर्व्याख्यानमयुक्तं देशस्य योग्यत्वेऽपि महत्त्वविशेषरूपसहकारिविरहादेव दूरस्थकेशानुपलम्भोपपत्तेस्तस्य देशयोग्यतायामबाधकत्वात् । तस्मादेवं व्याख्या । ननु यथेन्द्रियसन्निकर्षनियामकत्वपक्षे तवेन्द्रियसम्बद्धस्यापि व्यवहितकेशस्याग्रहस्तथा देशस्वभावस्यापि नियामकत्वे मम कुतश्चिन्निमित्तादावृताग्रहः स्यादित्याशङ्कायामाह—सन्निधानवदिति । तथा च महत्त्वविशेषकारणाभावाद्दूरे केशाग्रह उपपद्यते न त्वावृताग्रहः, इन्द्रियसन्निकर्षस्यानियामकत्वे ग्रहकारणवैकल्याभावादिति। ग्राह्याधिकेति । अन्यूनेत्यर्थः । समानपरिमाणस्यापि प्रतिबन्धकत्वात् । यद्यप्युपरिस्थेन न्यूनपरिमाणेनापि पर्वतादिग्रहप्रतिबन्धादधिकपरिमाणेनापि किञ्चिद्दूरस्थवस्तूपलम्भाप्रतिबन्धाच्चेदमयुक्तं तथापि प्राप्यकारितापक्षेऽपि किञ्चित् क्वचिन्नयनगतिप्रतिबन्धकमुपेयम । तथा च यादृशमेव नयनप्रतिबन्धकं तादृशमेवोपलम्भप्रतिबन्धकमिति भावः । न च गोलकेति । यद्यप्यतिरिक्ततेजसः

यंसिद्धेः । ऋजुवस्तुग्रहोऽपि तस्यातिशयितवेगवत्त्वेनाप्रतिबन्धात् । तस्य च फलोन्नेयत्वात् अचिरदीधितिसंयोगवत् । अत एव यौगपद्यस्य भ्रान्तत्वं (१) त्वगपि चान्य एव पवनः । तस्येन्द्रियत्वेनानु(२)द्भूतस्पर्शत्वानुमानात् । न चात्रानियम-

---

न्यायलीलावतीकण्ठाभरणम्

त्प्रेर्यत्वं यदुक्तं तत्राह—ऋज्विति । तर्हि करप्रेर्यत्वमपि न स्यादिति यदुक्तं तत्राह—तस्येति । निविडावयवद्रव्यापनेयत्वेऽपि महानिलानपनेयत्वं फलबलोन्नेयमित्यर्थः । अत एवेति । प्राप्यकारित्वादेवेत्यर्थः । सन्निकृष्टविप्रकृष्टयोर्युगपत् प्राप्तिरपि पृथक्तया उपपद्यत इति भावः । इन्द्रियत्वेनेति । शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानजनकमनःसंयोगाश्रयत्वमिन्द्रियत्वमितिव्यवस्थापनादिति भावः । इन्द्रियत्वेऽप्यनुद्भूतस्पर्शत्वं माभूदित्यनियमशङ्कां निरस्यति—न चेति । ननु

न्यालालावतीप्रकाशः

करणे बाधः, अतिरिक्तपक्षत्वे चाश्रयासिद्धिः, रसाद्यव्यञ्जकरूपसाक्षात्कारकारणत्वेनोभयसिद्धेन पक्षत्वात् । नन्वावृतत्वं यदीन्द्रियगतिप्रतिबन्धकमध्यस्थितद्रव्यकत्वं तर्ह्यसिद्धम् । अथाधिष्ठानासम्बन्धार्थग्राहकत्वं तदा शरीरेणानैकान्तिकं शरीरस्य हि स्वावयवोऽधिष्ठानमेव । मैवम् । पूर्वमेव चक्षुस्तैजसत्वसिद्धौ वहिर्वृत्तितार्थमेव विवादात् तैजसत्वेन हेतुविशेषणान्नानैकान्तिकम् । न च तैजस-

न्यायलीलावतीप्रकाशविवृतिः

प्रागेव साधनाद्विकल्पोऽयमसङ्गतः, तथापि गोलकमात्रावच्छिन्नं तेजः पक्षो घटादिसम्बद्धं वेति विकल्पार्थो बोध्यः । नन्वावृतत्वमित्यत्रावृताप्रकाशकत्वमित्यर्थस्तेनाधिष्ठानासम्बद्धार्थग्राहकत्वमित्यनेन सामानाधिकरण्यं घटते । 'असिद्धि'रन्यतरासिद्धिः । प्रकृते तेजोगतेरन्यतरासिद्धत्वात् । तैजसत्वविशेषणासिद्धिपरिहारायाह—पूर्वमिति । तथा चाधिष्ठानासम्बद्धार्थग्राहकत्वमेव तदिति भावः । शरीरे च न व्यभिचार इत्याह—तैजसत्वेनेति । तथा च प्रकाशकपदं तैजसपरमिति अधिष्ठानासम्बद्धार्थग्राहकतेजस्त्वादिति

---

(१) भ्रान्तत्वात् त्व० । (२) शैवत्त्वमनु० ।

काशीसंस्कृतसीरीज़्-पुस्तकमाला ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि । मूल्यम् ।

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) रु० १—८

२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १) रु० ८—०

३ वैशेषिकदर्शनम् । पं० श्रीढुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं १) रु० २—८

४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १) रु० ०—६

५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः-प्रथम भाग अव्ययीभावः । रु० ५—०

५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । द्वितीय भाग (व्याकरणं १) रु० ८—०

६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुण निरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । (न्यायं १) रु० ६—०

७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २) रु० ०—८

८ अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः । रु० ०—८

९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं१) रु० ०—१२

१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १) रु० २—०

११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । (कर्मकाण्डम् १) रु० ०—८

१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २) रु० १—४

१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । (वेदान्तं ३) रु० १—४

१४ कुमारसंभवं महाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २) रु० १—८

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६

१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्यायं २) रु० १—०

१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्ठोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृत-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम्-मधुसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिर्निर्मितिः । (व्याकरणं २) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः—भाषाटीकासहितः (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्यटीका-श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः । अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ४-८

२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्यवि० ३) रु० ०—१२

२९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम् । बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । (काम०२) रु० ८—०

३० न्यायकुसुमाञ्जलीः । न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः । महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासितमहामहोपाध्याय वर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः (न्यायं४) रु० ६—०

३१ परिभाषेन्दुशेखरः । म० म० श्रीनागेशभट्टरचितः । म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या–तत्त्वप्रकाशिकया टीकया च सहितः । (व्याकरणं ४) रु० ३—०

३२ अर्थसंग्रहः । पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः।(मीमां०२) रु०१—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम् । परमर्षिभारद्वाजोद्योतकरविरचितम् । महर्षि-गोतमादिचरितसम्वलितबृहत्भूमिकासहितम् । (न्यायं वि० ५) रु० ६—०

३४ शुक्लयजुर्वेदसंहिता । वाजसनेयिमाध्यन्दिनशाखीया । श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता । (भाग १-२-३-४)(वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता । श्रीसायणाचार्यविरचितभाष्यसहिता । १ अध्यायादारभ्य २० अध्यायपर्यन्ता । (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः । श्रीमदप्पयदीक्षितविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः । (वेदान्तं ४) रु० ६—०

३७ काशिका । श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर–वामन–जयादित्यविनिर्मिता । (व्याकरणं ५) रु० ६—०

३८ प्राकृतप्रकाशः । भामहकृतः । श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः । टिप्पण्या च संयोजितः । (व्याकरणं ६) रु० १—४

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः । भाषानुवादसमेतः । (वेदान्तं ५) रु० २—०

४० श्रीनारदीयसंहिता । ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः । (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः–मेदिनीकारविरचितः । (कोशं १) रु० १—८

४२ मीमांसादर्शनम् । श्रीशबरस्वामिविरचितभाष्यसहितम् (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम् । श्रीगोतममुनीप्रणीतम् । श्रीवात्स्यायनमुनीप्रणीतभाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

४४ दानमयूखः। विद्वद्वरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं १) रु० १—८

४५ कालमाधवः। विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं २) रु० १—८

४६ भास्वती। श्रीमच्छतानन्दविरचिता। श्रीमातृप्रसाद (दैवज्ञभूषण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण भाषाटीकाभ्यां सहिता। (ज्योतिषं ३) रु० २—०

४७ फक्किकाप्रकाशः। उपाध्यायोपाह्ववैयाकरणकेसरीविरुदाङ्कितमैथिलेन्द्रदत्तशर्मविरचितः। पं० सीतारामशर्मकृतटिप्पण्या विभूषितः। (व्याकरणं ७) रु० १—४

४८ मिताक्षरा। श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या-श्रीमत्परमहंसपरिव्राजकाचार्यस्वयंप्रकाशानन्दसरस्वतीस्वामिकृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०६) रु० १—४

४९ काव्यप्रकाशः। श्रीमम्मटाचार्यविरचितः। पं० श्रीहरिशङ्करशर्मणा मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः (काव्य०४) रु०४ —०

५० अधिकरणकौमुदी। श्रीदेवनाथठक्कुरकृता। (मीमां० ४) रु० १—०

५१ रघुवंशमहाकाव्यम्। महाकविश्रीकालिदासविरचितम् महामहोपाध्याय श्रीमल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलालठक्कुरेण विरचितया भावबोधिनी टिप्पण्या समलङ्कृतम् संपूर्णम्। रु० १—४

५२ काथबोधः। साजनीकृत टीकोपेतः। दत्तात्रेय सम्प्रदायानुगतः। रु०—८

५३ रसचन्द्रिका। पर्वतीय-पण्डितप्रवर-श्रीविश्वेश्वरपाण्डेय निर्मिता (काव्य० ६) रु०१—०

५४ अलङ्कारमुक्तावली। पर्वतीय-विद्वद्वर-श्रीविश्वेश्वर पाण्डेय-निर्मिता— (काव्य० वि० ७) रु०-१२-०

५५ वृत्तरत्नाकरः-भट्टकेदारप्रणीतः। नारायणभट्टीयव्याख्यासहितः। सम्पादकनिर्मितविषमस्थलटिप्पणोपेतः। श्रुतबोधच्छन्दोमञ्जरीसुवृत्ततिलकैश्च समेतः। (छंद वि० १) १-८-०

५६ अलङ्कारशेखरः। केशवमिश्रकृतः। साहित्योपाध्याय वेतालोपाह्व श्री अनन्तरामशास्त्रिणा भूमिकादिभिः संभूष्य संशोधितः। (अलं० वि० १) १—४

५७ शक्तिवादः-टीकात्रयोपेतः। श्रीगदाधरभट्टाचार्यप्रणीतः। कृष्णभट्टकृतया मञ्जूषया-माधवभट्टाचार्यनिर्मितया विवृत्या श्रीमन्माध्वसंप्रदायाचार्य्यदार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्यतर्करत्नन्यायरत्न गोस्वामिदामोदरशास्त्रिरचितया विनोदिन्या च समेतः। (न्या० वि० ७) २-०-०

पत्रादिप्रेषणस्थानम्

जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमन्दिर के उत्तर फाटक
बनारस सिटी।